सत्यमेव जयते

# राष्ट्रियशिक्षानीतिः 2020

## शिक्षामन्त्रालयः
## भारतसर्वकारः

| अध्यायः | विषयः | पृष्ठसंख्या |
|---|---|---|
| | परिचयः | |
| | **भागः – I विद्यालयीयशिक्षा** | |
| 1. | प्रारम्भिकबाल्यावस्थापालनं शिक्षा च - अध्ययनस्य मूलाधारः | |
| 2. | मूलाधारभूतं साक्षरता संख्याज्ञानं च - अध्ययनार्थं त्वरिता अत्यावश्यकी प्रेरणा | |
| 3. | विद्यालयपरित्यक्तच्छात्राणां संख्यायां न्येनीकरणम्, शिक्षणस्य सर्वेषु स्तरेषु सार्वत्रिकरूपेण प्रवेशस्य निश्चयः | |
| 4. | विद्यालयेषु पाठ्यक्रमाः शिक्षणशास्त्रं च : अधिगमः समग्रः, एकीकृतः आनन्ददायकः, विनियोगात्मकश्च स्यात् | |
| 5. | शिक्षकः | |
| 6. | समतामूलिका समावेशिशिक्षा सर्वेषां कृते | |
| 7. | विद्यालयसङ्कीर्ण/समुदायमाध्यमेन समर्थसंसाधनं प्रभाविप्रशासनं च | |
| 8. | विद्यालयीयशिक्षायाः कृते मानकनिर्धारणं प्रत्यायनं च | |
| | **भागः – II उच्चशिक्षा** | |
| 9. | गुणवत्तापूर्णविश्वविद्यालयाः महाविद्यालयाः च - भारतस्य उच्चशिक्षाव्यवस्थायाः कृते नवीना भविष्योन्मुखिदृष्टिः | |
| 10. | सांस्थिकपुनारचनं बलवर्धनं च । | |
| 11. | समग्रां बहुविषयिकां शिक्षां प्रति | |
| 12. | अध्ययनार्थम् उत्तमवातावरणं छात्राणां कृते सहयता च | |
| 13. | प्रेरितः सक्रियः सक्षमः सङ्कायः | |
| 14. | उच्चशिक्षायां समता समावेशश्च | |
| 15. | शिक्षकशिक्षा | |
| 16. | व्यावसायिकशिक्षायाः नवीना कल्पना | |

| | | |
|---|---|---|
| 17. | नवीनराष्ट्रियानुसन्धानप्रतिष्ठान (एनआरएफ) माध्यमेन सर्वेषु क्षेत्रेषु गुणवत्तापूर्णशैक्षणिकानुसन्धानस्य प्रेरणा | |
| 18. | उच्चशिक्षायाः नियामकप्रणाल्याम् आमूलाग्रं परिवर्तनम् | |
| 19. | उच्चशिक्षासंस्थानां कृते प्रभावपूर्णप्रशासनं नेतृत्वं च | |
| भागः – III अन्यानि मुख्यानि दृष्टिपातनीयानि क्षेत्राणि | | |
| 20. | व्यावसायिकशिक्षा | |
| 21. | प्रौढशिक्षा आजीवनम् अध्ययनं च | |
| 22. | भारतीयभाषाणां कलानां संस्कृतेश्च संवर्धनम् | |
| 23. | तन्त्रज्ञानोपयोगः समेकीकरणं च | |
| 24. | सद्यस्क-डिजिटल-शिक्षा - तन्त्रज्ञानस्य यथाक्रमम् उपयोगस्य निश्चयः | |
| भागः – IV क्रियान्वयनस्य नीतिः | | |
| 25. | केन्द्रीयशिक्षाशंसनापरिषदः सशक्तीकरणम् | |
| 26. | वित्तपोषणम् - सर्वेषां कृते प्रदानयोग्या गुणवत्ताशिक्षा | |
| 27. | क्रियान्वयनम् | |
| | प्रयुक्तसङ्केताक्षरसूची | |

# राष्ट्रियशिक्षानीतिः 2020
**परिचयः**

शिक्षा मनुष्यस्य सर्वतोमुखविकासाय पूर्णसामर्थ्यस्य संपादनाय, उत्तमसमाजस्य निर्माणाय, राष्ट्रस्याभिवृद्धये च प्रमुखा मूलभूतापेक्षा विद्यते। वैश्विकस्तरे प्रवेशं कर्तुं भारतस्य अभिवृद्धेरारोहणम् अनुवर्तयितुम् आर्थिकस्य अभिवृद्धौ राष्ट्रस्य एकतासंपादने, सामाजिकन्यायसमानतासंपादने, वैज्ञानिकप्रगतौ, भारतीयसंस्कृतेः संरक्षणे, वैश्विकस्तरे नेतृत्वाय च गुणात्मकशिक्षणम् अत्युत्तमा कुञ्चिका विद्यते।वैश्विकात्युत्तमशिक्षणम् अस्माकं देशस्य प्रतिभाधनिकानाम् आधिक्यसंपादनाय, स्वात्मोन्नतये, राष्ट्रस्योन्नतये, विश्वोन्नतये च मूलभूतसाधनानि इति विज्ञातुं च आञ्जसो मार्गः विद्यते। प्रतिभान्वितः जनः एव समाजस्य देशस्य विश्वस्य च मुख्यं संसाधनं भवति। अग्रिमेषे दशसु वर्षेषु विश्वे सर्वाधिकैः युवजनैः समवेतं भवति भारतम्। तेभ्यः गुणसमवेतशिक्षणावसरस्य प्रदानमेव भारतस्य भविष्यं निर्धारयति।

भारतेन 2015 वर्षे अङ्गीकृतं निरन्तरविकासकार्यसूची 2030 लक्ष्यं 4(एसडीजी4)इत्यत्र परिलक्षितायाः वैश्विकशिक्षाविकासकार्यसूच्याः अनुसारं विश्वे 2030 वर्षतः पूर्वं "सर्वेभ्यः समानरूपेण गुणवत्ताशिक्षायाः प्रदानस्य आजीवनं शिक्षार्जनावसरस्य कल्पनायाः च" लक्ष्यं विद्यते। एतादृशोदात्तस्य लक्ष्यस्य साधनाय संपूर्णशिक्षाप्रणालीं समर्थयितुम् अधिगमप्रक्रियायाः अभिवृद्धये च पुनर्घटनस्य अपेक्षा अस्ति येन निरन्तरविकास 2030 कार्यसूच्याः सर्वे महत्त्वपूर्णाः उद्देश्याः लक्ष्याः(एसडीजी4) च साधयितुं शक्येरन् ।

ज्ञानस्य परिप्रेक्ष्ये संपूर्णे विश्वे आशु परिवर्तनं जायमानं विद्यते। बृहत्दत्तांशः यान्त्रिकाध्ययनं कृतकबुद्धिमत्ता इत्यादिषु क्षेत्रेषु जायमानेन वैज्ञानिकस्य तान्त्रिकस्य नाटकीयपरिवर्तन विकासेन विश्वे कौशलानपेक्षितानि कार्याणि यन्त्राणि कर्तुं शक्नुवन्ति किन्तु संगणकविज्ञानं, गणितं,दत्तांशविज्ञानं इत्यादिक्षेत्रेषु एतादृशकुशलकर्मिणाम् अधिका अपेक्षा भवति ये विज्ञानम्, सामाजिकविज्ञानं,मानवीयमौल्यम् इत्यादिनैकेषु विषयेषु दक्षाः भवन्ति। वातावरणस्य परिवर्तनस्य, परिसरमालिन्यस्य, नैसर्गिकसंपन्मूलानां ह्रासतायाः च कारणेन विश्वस्य कृते अपेक्षितां शक्तिं, आहरं, जलं च कथं संपूरयितुं शक्नुमः इति अंशे समग्रपरिवर्तनं भवति तेन कारणेनापि कुशलकर्मकराणाम् अपेक्षा अधिका भवति विशेषतया रसायनशास्त्रे जीवशास्त्रे भौतशास्त्रे, कृषिक्षेत्रे, पर्यावरणविज्ञाने, सामाजिकविज्ञाने, च क्षेत्रे ।महारोगाणां सांक्रमिकरोगाणां निर्वहणे तदौषधाभिवृद्धये च सामूहिकशोधः सामूहिकबहुविषयाधिगमश्च अतीव प्रामुख्यं भजति।मानवीयमौल्यस्य कलायाः अपेक्षा अधिका भवति यतः भारतदेशः विकासशीलेन सह विश्वस्य तिसृषु अर्थव्यवस्थासु अन्यतमः भवितुम् अग्रेसरन् अस्ति।

## राष्ट्रियशिक्षानीतिः 2020

व्यवसाये वैश्विकपरिस्थितौ च तीव्रतरेण जायमानस्य परिवर्तनस्य कारणेन इदम् अनिवार्यं जातं यत् बालानां न केवलम् अध्ययनं किन्तु तदपेक्षया कथम् अध्ययनं करणीयम् इति प्रामुख्यं विद्यते। शिक्षणेन अल्पसामग्र्या अधिकं ज्ञानं कथम् अवाप्तुं शक्यते, विषयस्य विमर्शात्मकं चिन्तनं कथं कर्तव्यं, समस्याः कथं परिहर्तव्याः, रचनात्मकं बहुविषयकं च कथं भवेत् , नूतनविषयस्य समन्वयः कथं करणीयः, तत्र अस्माकं अन्वितिः च कथं भवेत् एवं परिवर्त्यमानक्षेत्रेषु नूतनविषयस्य नूतनसामग्रीणां च कथम् उपयोगः कार्यः इति विषयदिशि शिक्षणस्य प्रवृत्तिः भवेत् । शिक्षणप्रक्रियायाम् अधिकप्रयोगात्मकस्य, समैकिकस्य, संशोधनाधारितस्य, केन्द्रीकृतस्य,परिचर्चायुतस्य, समन्वयक्षमतायाः, रुचिपूर्णस्य च समन्वितिः शिक्षणशास्त्रे अवश्यं भवेत्। अतः पाठ्यक्रमेषु मूलकलाः, करकौशल्यं,मानवीयमौल्यानि, क्रीडाः, शारीरिकस्वास्थ्यम्, भाषाः, साहित्यम्,सामाजिकमौल्यम्, संस्कृतिः,इत्यादिभिः सह विज्ञानम्, गणितं च, अवश्यं भवेयुः येन अध्येतृणां सर्वतोमुखसामर्थ्यस्य अभिवर्धनं कृत्वा शिक्षणं सुसंगतं उपयोगितां च विधाय अध्येतृणां कृते दातव्यम्।शिक्षणेन चारित्र्यनिर्माणम् अवश्यं भवेत् शिक्षार्थिषु नैतिकतायाः, तर्कबद्धायाः, सानुकम्पायाः, संवेदनाशीलतायाः च विकासेन सह उद्योगार्थं सक्षमान् कुर्यात् ।

प्रारम्भिकबाल्यावस्थोपलालनया शिक्षणेन च उच्चतरशिक्षामाध्यमेन च शिक्षणे अधिकगुणवत्तायाः,सामञ्जस्यस्य, व्यवस्थायाम् अखण्डतायाः च संपादकानि प्रमुखपरिवर्तनानि कृत्वा अध्ययनपरिणामस्य वर्तमानस्थितिः, अपेक्षा का इत्यनयोः अन्तरम् अवश्यं प्रपूरयेत्।

2040 वर्षं यावत् भारतस्य सविधे एतादृश्याः शिक्षाप्रणाल्याः लक्षम् एकमेवाद्वीतीयं स्यात् एवं सामजिकार्थिकपृष्ठभूमिसंबद्धशिक्षार्थिनां अन्यशिक्षार्थिनां च कृते अपि समानरूपेण श्रेष्ठगुणवत्ताशिक्षणम् उपलभ्येत ।

राष्ट्रिया शिक्षानीतिः 2020 इयं 21शतब्द्याः प्रथमशिक्षानीतिः अस्ति अस्याः लक्ष्यं अस्माकं देशस्य विकासार्थम् अपेक्षतावश्यकतायाः पूरणार्थम् अस्ति। इयं नीतिः भारतस्य परम्परां सांस्कृतिकमूल्यानि च वर्धयन्ती 21शताब्द्याः शिक्षणस्य एसडीजी-4 अन्तर्भाव्य महत्त्वाकाङ्क्षालक्ष्येन सह संयोजनयोग्यां नूतनव्यवस्थाम् आरचयितुं शिक्षणस्य नियन्त्रणम्, प्रशासनम् इत्यादिभिः सह शिक्षणस्वरूपस्य सर्वान् अंशान् परिष्कर्तुं प्रस्तावं करोति। राष्ट्रियशिक्षानीतिः प्रत्येकं व्यक्तेः सर्जनसामर्थ्याभिवृद्धये अधिकं बलं ददाति। इयं नीतिः एतत्सिद्धान्ताधारिता वर्तते यत् शिक्षणं न केवलं स्वज्ञानसामर्थ्यम् विकासयेत् किन्तु साक्षरतायाः संख्याशास्त्रस्य च विषयावगमस्य मूलसामर्थ्येन, अधिकविषयज्ञानसामर्थ्यं, संशोधनात्मकं चिन्तनं,समस्यापरिहारोपायचिन्तनम् इत्याद्युच्चकोटिकज्ञानसामर्थ्येन च सह व्यक्तेः नैतिकसामाजिकभावनात्मकसामर्थ्यस्य अपि विकासं कुर्यात् ।

प्राचीनभारतीयसनातनप्रकृष्टज्ञानपरम्परा चिन्तनं च अस्याः शिक्षणनीतेः मार्गदीपकः अस्ति। ज्ञानं, प्रज्ञा, सत्यम् इत्येतानि मानवस्य उन्नतं लक्ष्यमिति भारतीयतत्त्वशास्त्रेषु प्रतिपादितमस्ति। प्रचीनभारते शिक्षणस्य लक्ष्यं केवलं सांसारिकजीवनं यापयितुम्, अध्ययनात्परं जीवनयापनार्थं वा ज्ञानसंपादनम् नासीत् किन्तु स्वयं पूर्णज्ञानाप्तये मुक्तये च आसीत्। विश्वप्रसिद्धाः प्राचीनभारतीयाः नलन्दा- तक्षशिला -वल्लभी- विक्रमशिला- विश्वविद्यालयाः बहुविषकपाठ्यक्रमाणां पाठनस्य उच्चानुसंधानस्य च आदर्शस्तरं स्थापितवन्तः तेन विविधविवषयकपृष्ठभूमितः देशतश्च समागताः विद्यार्थिनः विद्वांसः च लाभान्विता आसन् । प्राचिनभारतीयशिक्षापद्धतिः चरकः सुश्रुतः, आर्यभटः,वराहमिहिरः, भास्कराचार्यः, ब्रह्मगुप्तः, चाणाक्यः, चक्रपाणिः, दत्ता,माधवः, पाणनिः, पतञ्जलिः नागार्जुनः, गौतमः, पिंगलः,शंकरदेवः,मैत्रेयी,गार्गी, तिरुवल्लेवेर इत्यादीन् नैकान् पण्डीतान् ससर्ज । ते वैश्विकज्ञानस्तरस्य कृते गणितम्, खगोलविज्ञानं, धातुविज्ञानम्, चिकित्साविज्ञानम्, शल्यविज्ञानं,तान्त्रिकशास्त्रम्,भवननिर्माणम्, नौकायाननिर्माणम्, दिग्ज्ञानम्, चित्रकला आयुर्वेदविज्ञानं, अर्थशास्त्रं, वाणिज्यशास्त्रं वास्तुशास्त्रम्, स्थापत्यशास्त्रं, योगः,चतुरङ्गक्रीडा इत्याद्यनेकज्ञानविज्ञानविषयेषु योगदानं प्रदत्तवन्तः । भारतीयसंस्कृतेः दर्शनस्य च वैश्विकस्तरे महान् प्रभावः विद्यते। वैश्विकमहत्त्वपूर्णायाः समृद्धपरम्परायाः संरक्षणं न केवलम् आगामिसंततेः कृते किन्तु अस्माकं शिक्षाव्यवस्थया तत्र अधिकं शोधं कृत्वा समृद्धिं विधाय अन्योपयोगार्थमपि चिन्तनं कुर्यात् ।

शिक्षकाः एव शिक्षणपद्धतेः मूलभूतपरिवर्तनस्य केन्द्रप्रदेशे भवेयुः। प्रत्येकं स्तरे समाजस्य गौरवान्वितसदस्येषु अन्यतमानां शिक्षकानां कृते स्वात्मविस्ताराय इयं शिक्षणनीतिः उपकरोति यतो हि शिक्षकाः भाविसमाजस्य निर्मातारः सन्ति।अनया शिक्षानीत्या शिक्षकान् सक्षमान् कर्तुम् अपेक्षितानां सर्वांशानां पूर्तिः स्यात् येन शिक्षकाः स्वकार्यं निष्ठया प्रभावरूपेण च कर्तुं शक्नुयुः।नूतनशिक्षानीतिः शिक्षणस्य प्रत्येकं स्तरे अनुत्तमान् श्रेष्ठान् अध्यापनवृत्तौ प्रवेशयितुं सहायं कुर्यात् एतदर्थं तेषाम् आजीविका,सम्मानः,गौरवम्,स्वायत्तता इत्यस्य निश्चयेन सह व्यवस्थायां सामन्यगुणवत्तानिर्वहणस्य सामान्यप्रक्रिया स्थापिता भवेत्।

नूतनशिक्षानीतिः सर्वेभ्यः विद्यार्थिभ्यः वासस्थानम् अविगणय्य गुणयुक्तशिक्षणं प्रदद्यात्। विशेषतया ऐतिहासिकरूपेण क्षीणावस्थाप्राप्तसमुदाये वञ्चितसमुदाये अल्पप्रतिनिधिभूतसमूहे च विशेषलक्ष्यं न्यसेत्। शिक्षा समनतां संपादयति समाजे समानताम्, आर्थिकाभिवृद्धिं, सामाजिकाभिवृद्धिं साधयितुं प्रमुखं साधनं विद्यते।तादृशसमूहस्य विद्यार्थिनां कृते अपेक्षितोपक्रमाः स्वीकार्याः तेन ते परिस्थितिजन्यबाधाभिः सहापि शैक्षणिकव्यवस्थयां प्रवेष्टुम् उत्कर्षमवाप्तुं च समर्थाः स्युः।

एतेषाम् अंशानां भारतस्य स्थानीयापेक्षितांशान् जागतिकांशान् च मनसि निधाय भारतस्य समृद्धविविधतायाः संस्कृतेः च गौरवं प्रयच्छन्तः नीतौ समावेशः भवेत्। भारतस्य उत्कृष्टकलाः, संस्कृतिः, परम्पराः, भाषाः, ज्ञानपरम्पराः च भारतस्य युवकानां कृते नैकसामाजिकसांस्कृतिकतान्त्रिकापेक्षाभिः सह नैतिकशिक्षाप्रदानाय स्वयं ज्ञानावाप्तये, राष्ट्रगौरवाप्तये, आत्मविश्वासाय, परस्परसहयोगाय, ऐक्यतासंपादनाय च महत्त्वपूर्णानि भवन्ति ।

**पूर्वनीतयः**

पूर्वशिक्षानीतयः सर्वेभ्यः शिक्षाप्रदाने समतासंपादने च केन्द्रिताः आसन्।राष्ट्रियशिक्षानीतिः 1986 इत्यस्याः 1992 वर्षे (एनपीई1986/92)संशोधनं कृतमासीत् तदा असम्पूर्णम् एतत् कार्यं संपूरयितुम् अधिकः प्रयासः विहितः आसीत्।1986/92 पूर्वनीतेः परं महत्त्वपूर्णः विकासः निःशुल्कम् अनिवार्यशिक्षा अधिनियमः2009 विद्यते।येन च सार्वभौमिकप्रारम्भिकशिक्षां सुलभं कर्तुं न्यायिकाधारः निरूपितः ।

**नूतनशिक्षानीतेः सिद्धान्ताः**

तर्कसंगतविचारयुक्तस्य कार्यसक्षमस्य, कारुणिकस्य,सहनशालिनः,धैर्यवतः, स्थितप्रज्ञस्य, वैज्ञानिकचिन्तनयुक्तस्य, सर्जनात्मककल्पनाशक्तियुक्तस्य च मानवस्य उत्तमनैतिकाधारेण निर्माणं शिक्षणव्यवस्थायाः मुख्यम् उद्देश्यं विद्यते। अस्य उद्देश्यम् अस्ति यत् अस्माकं संविधानेन कल्पितस्य समतायुक्तस्य, अभिव्यापकस्य बहुत्वसमाजस्य निर्माणे प्रयतमानानाम्, सर्जनरतानाम्, एतदर्थं योगदानं दीयमानानां च नागरिकाणां निर्माणम् ।

उत्तमशैक्षणिकसंस्था इयं भवति यत्र प्रत्येकं छात्रस्य स्वागतं पालनं च क्रियते, यत्र प्रेरणादायकं शिक्षणं वातावरणं च भवति, यत्र सर्वेभ्यः विद्यार्थिभ्यः अध्ययनार्थं नैकप्रकरकाणाम् अनुभवनाम् उपलब्धिः भवति, यत्र अध्ययनार्थम् उत्तमभौतिकसम्पन्मूलानि उपयुक्तसंसाधनानि च उपलभ्यन्ते । एतत्सर्वेषां प्राप्तिः प्रत्येकं शैक्षणिकसंस्थायाः लक्ष्यं भवेत्। अपि च एभिः सह संस्थासु परस्परं समन्वयनं समैक्यं च शिक्षणस्य प्रत्येकं स्तरे स्यात् ।

ये मूलभूतसिद्धान्ताः बृहद्रूपेण शिक्षणव्यवस्थायाः व्यक्तिगतसंस्थानां च मार्गदर्शनं कुर्वन्ति। ते च

- **प्रत्येकं विद्यार्थिनः विशिष्टसामर्थ्यस्य अवगमनं तस्य वर्धनार्थं प्रयासः च -** शैक्षणिकक्षेत्रे शैक्षणिकेतरक्षेत्रे च प्रत्येकं विद्यार्थिनः सर्वतोमुखविकासं कर्तुं शिक्षकाणां मातापित्रोः च कृते संवेदनाशीलताप्रदानम् ।
- तृतीयकक्षातः सर्वेषां छात्राणां कृते **मूलभूतशिक्षायाः संख्याज्ञानस्य च निष्पादने सर्वाधिकप्रामुख्यस्य प्रदानम् ।**
- **आनम्रता -** येन विद्यार्थिनः स्वाध्ययनमार्गं पाठ्यक्रमं च चेतुं समर्थाः भवेयुः तेन स्वप्रतिभानुगिणं स्वरुच्यनुगुणं च जीवने स्वमार्गं विचेतुं शक्नुयुः।
- कलाविज्ञानविभागयोः पाठ्यक्रमस्य पाठ्येतरकार्यक्रमस्य मध्ये, व्यावसायिकस्य शैक्षणिकस्य धारायाः मध्ये अन्यत्र च **अधिकः कठिनविभागः न भवेत्** येन विभिन्नज्ञानक्षेत्रस्य मध्ये विद्यमानानां हानिकारकोच्चनीचश्रेणीनाम् असामञ्जस्यम् अन्तरं च दूरीकर्तुं शक्यते ।
- सर्वज्ञानस्य एकताम् अखण्डतां च संपादयितुं बहुविषययुक्तस्य विश्वस्य कृते विज्ञानम्, सामाजिकविज्ञानम्, कला,मानवीयम्, क्रीडा इत्यादि-**बहुविषयसम्मिलितायाः समग्रशिक्षायाः** विकासः।
- **विचारात्मकावगमने अधिकम् अवदानं** नतु केवलं रटनपद्धतौ अथवा केवलं परीक्षार्थम् अध्ययने वा।
- **रचनात्मकं विमर्शात्मकं च चिन्तनम्** तर्कबद्धचिन्तनस्य निर्णयार्थं नवीनसर्जनार्थं प्रोत्साहयितुं च ।
- **नैतिकता, मानवीयमौल्यानि, संविधानिकमौल्यानि च** यथा कारुण्यम्,अन्यं प्रति सम्मानः,स्वच्छता,सदाचारः,लोकतान्त्रिकभावना, सेवाभवना, सार्वजनिकसम्पत्तिं प्रति सम्मानम्, वैज्ञानिकचिन्तनम्, स्वतन्त्रता, उत्तरदायित्वम्, बहुत्ववादः, समनता, न्यायः च ।
- **बहुभाषितायाः कृते प्रोत्साहनम्,** अध्ययनाध्यपनकार्येषु **भाषाशक्तेः प्रोत्साहनम्** ।
- **जीवनकौशलम् -** यथा परस्परसंवादः,सहयोगः,सामूहिककार्यम्, स्थितिस्थारकता च ।
- अद्यतन-कोचिंग-संस्कृतिं प्रोत्साहयतः संक्षिप्तमौल्यमापनस्य अपेक्षया **अध्ययनस्य निरन्तररचनात्मकमूल्याङ्कने केन्द्रीकरणम् ।**
- **तन्त्रज्ञानस्य अधिकरूपेण उपयोगः** अध्ययने अध्यापने च भाषासंबद्धक्लेशं निवारयितुम्, दिव्याङ्गविद्यार्थिनां शिक्षां सुलभं कर्तुम्, शैक्षणिकनियोजने प्रबन्धने च।
- **विविधतायाः, स्थानीयपरिवेशस्य च कृते सम्मानः** सर्वेषु पाठ्यक्रमेषु, शिक्षणे, नीतौ च भवेत् अपि च शिक्षणं सर्वदा समूहाहिकमिति मनसि स्थापयेत्।
- शिक्षणव्यवस्थायां सर्वे विद्यार्थिनः अभिवृद्धिं प्राप्तुं सामर्थ्यवन्तः इति विज्ञातुं सर्वेषु शैक्षिकनिर्णयेषु मूलाधाररूपेण **पूर्णसमनता सन्निवेशनं च ।**
- बाल्यलालनं शिक्षणं विद्यालयीयशिक्षा इत्यारभ्य उन्नतशिक्षां यावत् **शिक्षणस्य प्रत्येकं स्तरस्य पाठ्यक्रमेषु समन्वयः ।**


- **अध्ययनप्रक्रियायाः हृदयं शिक्षकाः संकायाः च** इति ज्ञातव्यम्, तेषां नियुक्तिः, निरन्तरव्यावसायिकविकासः,धनात्मककार्यकरणवातवरणम्, सेवास्थितिः च भवेत् ।
- शिक्षणव्यवस्थायाम् **अखण्डताम्, पारदर्शिताम्, संसाधनकार्यक्षमतां** च लेखपरीक्षामाध्यमेन सार्वजनिकप्रकाशनेन च विनिश्चेतुं **लघु किन्तु दृढम् नियामकव्यवस्थातन्त्रम्,** अनेन सह **स्वायत्ततया,सुशासनेन, सशक्तीकरणेन** च नवप्रवर्तनां वर्तुलात् बहिर्गत्वा चिन्तनं च कर्तुं प्रोत्साहनम् ।
- **उन्नतस्तरस्य शोधः** गुणात्मकशिक्षायाः कृते तद्विकासार्थं च ।
- शैक्षिकविज्ञातृभिः सातत्यानुसन्धानस्य निरन्तरमूल्याङ्कनस्य च आधारेण **सन्ततसमीक्षा ।**
- **मम मूलम् भारतम् इति अभिमानः,** अपि च अस्य देशस्य उन्नत - वैविध्यमय - आधुनिक -प्राचीनसंस्कृत्या, ज्ञानप्रणाल्या,परम्परया च प्रेरणाप्राप्तिः।
- **शिक्षा सार्वजनिकसेवा** गुणात्मकशिक्षाप्रवेशः प्रत्येकं बालकस्य मूलभूताधिकारः इति परिगणयेत् ।
- **दृढायां स्पन्दात्मिकायां सार्वजनिकशिक्षणप्रणाल्याम् आर्थिकनिवेशः** अपि च सत्ययुक्तस्य लोकोपकारिणः सार्वजनिकस्य सामुदायिकस्य च भागग्रहणाय प्रोत्साहनं सम्माननं च ।

**अस्याः नीतेः दृष्टिः**

इयं राष्ट्रियशिक्षानीतिः भारतीयनीतौ मूलरूपेण अन्तर्निहितां शिक्षाप्रणालीं निरूपयति एवं भारतं साक्षात् परिवर्तयितुं योगदानं प्रयच्छति, अर्थात् भारतं सुस्थिरं, समनतायुतं स्पन्दात्मकज्ञानसमाजं च कृत्वा सर्वेभ्यः उच्चगुणवत्ताशिक्षां प्रदाय भारतं वैश्विकज्ञानमहाशक्तिमत् करोति। इयं नीतिः निरूपयति यत् अस्माकं शैक्षिकसंस्थानां पाठ्यक्रमः, पाठ्चर्या शिक्षणविधिश्च छात्रेषु मूलभूतकर्तव्यानि, संविधानमौल्येषु गौरवम्, देशाभिमानं, परिवर्तमाने जगति नागरिकाणां भूमिकाम्, उत्तरदायित्वानि च उज्जागरयेत् इति । अस्याः नीतेः दृष्टिः यत् विद्यार्थिषु भारतीयताभिमानः न केवलं विचारे किन्तु व्यवहारे,बुद्धौ, कार्येषु च स्यात् एवं ज्ञानवर्धने, कौशलेषु,मूल्येषु, आलोचनासु च अपि स्यात् येन मानवाधिकारस्य समर्थने, स्थिराभिवृद्धौ जीवनयापने, वैश्विककल्याणे च प्रतिबद्धः स्यात् येन सर्वोत्तमः वैश्विकनागरिकः भवेत् इति।

## भागः - I विद्यालयीयशिक्षा

इयं नीतिः अधुना विद्यमानां 10+2 विद्यालयीयव्यवस्थां 3 वर्षतः 18 वर्षं यावत् सर्वेषां छात्राणां कृते पाठ्यचर्याधारेण शिक्षणाधारेण च 5+3+3+4 इति नूतनव्यवस्थया परिवर्तयितुं वदति । यथा अधः मानकचित्रं प्रदत्तमस्ति अपि च विषयेस्मिन् चतुर्थाध्याये विस्तृतविवरणं प्रदत्तं विद्यते।




अधुना 3 तः 6 वर्षीयाः छात्राः 10+2 व्यवस्थायाम् अन्तर्भूताः नासन् यतः 6 वर्षे ते प्रथमकक्षायां प्रविशन्ति ।नवीन 5+3+3+4 व्यवस्थायां त्रिवर्षीयच्छात्राः अपि समाविष्टाः एवं प्रारम्भिकबाल्यावस्थापालनं शिक्षा च (ईसीसीई) दृढाधारे समावेशितम्, येन बालानां उत्तमसर्वतोमुखाध्ययनस्य विकासस्य,योगक्षेमस्य च अभिवृद्धेः लक्ष्यं साधयितुं शक्येत ।

### 1. प्रारम्भिकबाल्यावस्थापालनं शिक्षा च - अध्ययनस्य मूलाधारः

1.1 बालानां मस्तिष्कस्य 85 प्रतिशतं विकासः 6वर्षेभ्यः पूर्वमेव भवति, इदं स्वस्थमस्तिष्कस्य विकासं दृढीकर्तुम् आरम्भिकवर्षेषु मस्तिष्कस्य यथोचितपोषणम् उत्तेजनं च महत्त्वपूर्णमिति सूचयति । अधुना उत्तमं प्रारम्भिकबाल्यावस्थापालनम् शिक्षा च (ईसीसीई) कोटिसंख्याकेभ्यः बालेभ्यः विशेषतया सामाजिकार्थिकप्रतिकूलपरिस्थितौ विद्यमानेभ्यः नोपलभ्यते । अतः(ईसीसीई) इत्यत्र दृढनिवेशः सर्वेभ्य बालेभ्यः अत्र प्रवेशप्रदानार्थं सामर्थ्यं स्थापयति इदम् आजीवनं प्रफुल्लतया शिक्षणव्यवस्थायां भागग्रहणाय अवसरं कल्पयति । प्रारम्भिकबाल्यावस्थाविकासः,पालनम्, शिक्षा च गुणवत्तापूर्णेन सार्वत्रिकरूपेण यथाशीघ्रं 2030 तमपूर्वं प्रयच्छेत् येन इदं निश्चितं स्यात् प्रथमकक्षायां प्रवेशार्थिनः सर्वे बालकाः स्तरः - 1 विद्यालयीयशिक्षार्थं सज्जाः सन्ति इति ।

1.2 ईसीसीई इत्यत्र मुख्यरूपेण एते अंशाः समाविष्टाः यथा आनम्यम्, बहुमुखि,नैकस्तरः, क्रीडाधारितम्, गतिविध्याधारितम्,चिन्तनाधारिताध्ययनम्, वर्णमाला,भाषाः,संख्या, गणनम्,वर्णाः, आकाराः,अन्तरङ्गना बहिरङ्गनाच क्रीडा,प्रहेलिकाः,तार्किकचिन्तनम्, समस्यापूर्तिः,रेखाचित्रम्, वर्णचित्रणम्, दृश्यकलाः, शिल्पम्, नाटकम्,पुत्थलिकानिर्माणम्, संगीतम्, चलनं च ।एभिः सह अन्ये विषयाः अपि केन्द्रीकृताः यथा सामाजिककार्याणि, मानवीयसंवेदना,उत्तमव्यवहारः,उत्तमाचरणम्,नैतिकता,वैयक्तिकसामाजिकस्वच्छता,समूह कार्यम्, परस्परसहकारः इत्यादयः। ईसीसीई इत्यस्य संपूर्णम् उद्देश्यम् बालानां शारीरिकभौतिकविकासः,संज्ञानात्मकविकासः,समाजसंवेगात्मकनैतिकविकासः,सांस्कृतिकविकासः,संवादार्थं प्रारम्भिकभाषा,साक्षरता, संक्ष्यात्मज्ञानम् इत्यादिषु उत्तमपरिणामस्य प्राप्तिः।

1.3 8वर्षपर्यन्तानां बालकानां कृते प्रारम्भिकबाल्यावस्थापालनस्य शिक्षायाः च कृते राष्ट्रियपाठ्यक्रमः शिक्षणतन्त्रम् (एनसीपीएफईसीसीई) इत्यस्य विकासः एनसीईआरटी संस्थया भागद्वयेन क्रियते, तच्च भागद्वयं 0 तः 3वर्षपर्यन्तानां बालकानां कृते एकम् उपतन्त्रम्, 3 तः 8वर्षपर्यन्तानां बालकानां कृते अन्यत् उपतन्त्रं च विद्यते। उपर्युक्तमार्गनिर्देशानुसारम् ईसीसीई विषये राष्ट्रस्तरे अन्ताराष्ट्रस्तरे च कृतेषु आधुनिकशोधेषु सर्वोत्तमाभ्यासान् च अन्तर्भावयति । विशेशरूपेण सहस्रेभ्यः वर्षेभ्यः भारतस्य समृद्धस्थानीयपरम्परासु विकसिताः कलाः, कथाः,काव्यानि, क्रीडाः,गीतानि एवम् अन्ये उत्तमांशाः अपि अपेक्षानुगुणम् ईसीसीई मध्ये संयोज्यन्ते । मातापितरौ प्रारम्भिकबाल्यावस्थापालनशिक्षासंस्था इत्युभयोः कृते मार्गदर्शकरूपेण इदं तन्त्रं कार्यं करोति ।

1.4 संपूर्णे देशे स्तरानुगुणं सर्वोत्तम- ईसीसीई इत्यस्य प्रापणम् एकं बृहद् लक्ष्यम् अस्ति । विशेषतया समाजिकार्थिकरूपेण क्षतिग्रस्तेभ्यः स्थानेभ्यः जनपदेभ्यः च विशेषावधानं प्राधान्यं च दीयते । प्रारम्भिकबाल्यावस्थापालनशिक्षासंस्थाभ्यः विस्तृतया सशक्तया व्यवस्थया ईसीसीई- प्रापयते तत्र (क)पूर्वस्थापित-अङ्गनवाडीमाध्यमेन (ख)प्राथमिकविद्यालयैः सह स्थिताङ्गनवाडीमाध्यमेन (ग)पूर्वप्राथमिकविद्यालयाः प्राथमिकविद्यालयैः सह न्यूनातिन्यूनं 5वर्षतः 6वर्षपर्यन्तं स्थिताः विभागाः तन्माध्यमेन (घ) स्वतन्त्ररूपेणस्थितपूर्वविद्यालयमाध्यमेन । एतेषां सर्वेषामपि विद्यालयानाम् ईसीसीई पाठ्यक्रमे शिक्षणे च प्रशिक्षितकर्मचारिणाम्/शिक्षकाणां च नियुक्तिः क्रियते ।

1.5 ईसीसीई इत्यस्य सार्वत्रिकरूपेण प्रापयितुम् अङ्गनवाडिकेन्द्राणि गुणवत्तापूर्णभवनादिव्यवस्थया,क्रीडोपकरणैः, उत्तमप्रशिक्षिताङ्गनवाडीकार्यकर्तृभिः/शिक्षकैः

च सशक्तीक्रियन्ते ।प्रत्येकम् अङ्गनवाडिकेन्द्राणि उत्तमवायुसंचारयुतैः,उत्तमविन्यासयुतैः,बालस्नेहिना उत्तमभवनैः च सह समृद्धाध्ययनवातावरयुक्तानि भवन्ति। अङ्गनवाडिकेन्द्राणां विद्यार्थिनः गतिविधियुक्तप्रयटनं कुर्युः अपि च अङ्गनवाडिकेन्द्राणां प्राथमिकविद्यालयरूपेण परिवर्तनं सुगमं कर्तुं ते स्थानीयविद्यालयशिक्षकैः विद्यार्थिभिः सह मेलनं कुर्युः। अङ्गनवाडिकेन्द्राणां विद्यालयपरिसर/समूहेषु समेकीकरणं भवति एवम् अङ्गनवाडिबालानां, मातापित्रोः, शिक्षकाणां च आमन्त्रणं विद्यालयानां /विद्यालयपरिसराणां कार्यक्रमेषु भागग्रहणाय क्रियते।

1.6 इयम् परिकल्पिता यत् 5 आयुःपर्यन्तः प्रत्येकं बालः ईसीसीई अर्हशिक्षकयुक्तां सज्जात्मककक्षाम् अथवा बालवाटिकां (प्रथमकक्षातः पूर्वतनम्) प्रविशेत् इति।सज्जात्मककक्षायाः अध्ययनं क्रीडात्मकाध्ययनाधारितं भवति अपि च ज्ञानात्मकस्य,प्रभावपूर्णस्य, चिन्तनासामर्थ्याधारितस्य साक्षरयुतस्य, संख्याज्ञानयुतस्य च विकासाय अधिकम् अवदानं प्रदीयते। मध्याह्नभोजनकार्यक्रमः प्राथमिकविद्यालयेषु सज्जात्मककक्षापर्यन्तं विस्तारितः भवेत्। अङ्गनवाडिव्यवस्थायां सज्जात्मकक्षाबालकानां कृते उपलभ्यमानम् आरोग्यपरीक्षणम्, स्वास्थ्यविकासनिरीक्षणं च प्राथमिकविद्यालयेषु अपि उपलब्धिः भवेत् ।

1.7 अङ्गनवाडिकेन्द्राणानां कृते गुणवत्तायुक्त - ईसीसीई शिक्षकाणां आरम्भिकसमूहस्य निर्माणार्थं अधुना अङ्गनावाडिकार्यकर्तृणां/ शिक्षकाणां कृते एनसीईआरटी इत्यनेन निर्मितस्य पाठ्यक्रमस्य/शिक्षणशास्त्रीयतन्त्रस्य अनुसारं व्यवस्थितरूपेण प्रशिक्षणं प्रदास्यते। 10+2 अथवा तदधिकशैक्षिकार्हतवताम् अङ्गनावाडिकार्यकर्तृणां/शिक्षकाणां कृते ईसीसीई माध्यमेन षाण्मासिकप्रमाणपत्रकार्यक्रमस्य आयोजनं करिष्यते, एवं न्यूनशैक्षिकार्हतवतां कृते प्रारम्भिकसाक्षरता,संख्याशास्त्रम्,ईसीसीईसम्बद्धः इत्याद्यन्यांशयुक्तस्य एकवर्षीय-डिप्लोमा-कार्यक्रमस्य आयोजनं भविष्यति। एते कार्यक्रमाः डिजिटल/दूरस्थमाध्यमेन अनेन सह डीटीएच- चैनेल स्मार्ट-फोन - माध्यमेन च संचाल्यते तत्र शिक्षकाणां कृते स्वकार्ये न्यूनतमबाधया ईसीसीई योग्यतां प्राप्तुम् अवसरः लभ्यते। अङ्गनावाडिकार्यकर्तृणां/ शिक्षकाणां कृते ईसीसीई - प्रशिक्षणं विद्यालयशिक्षणविभागस्य समूहसम्पन्मूलकेन्द्राणि मार्गदर्शनं प्रयच्छन्ति,तस्य निरन्तरमूल्याङ्कनार्थं न्यूनातिन्यूनं एकमासस्य संपर्ककक्षा संचाल्यते। दीर्घावधौ राज्यसर्वकाराः सोपानानुगुणं व्यावसायिकप्रशिक्षणस्य मार्गदर्शनस्य च व्यवस्थमाध्यमेन, वृत्तिमापनानुगुणं च प्रारम्भिकबाल्यावस्थापालनस्य शिक्षायाः च कृते व्यावसायिकरूपेण अर्हशिक्षकाणां समूहस्य निर्माणं कुर्युः।एतेषां शिक्षकाणां

प्ररम्भिकव्यावसायिकसज्ज्ञार्थम् एवं तस्य निरन्तरव्यावसायिकविकासार्थं च (सीपीडी) अपेक्षितसौलभ्यानां विकासोपि क्रियते।

1.8 ईसीसीई इत्यस्य परिचयः यथाक्रमम् आदिवासिजनबाहुल्यक्षेत्रेषु आश्रमशालासु च क्रियते।आश्रमशालासु पर्यायविद्यालयशिक्षणे च ईसीसीई इत्यस्य एकीकरणम्, कार्यन्वयप्रकिया च उपरि दत्तविवरणानुसारमेव भवति ।

1.9 ईसीसीई - पाठ्यक्रमस्य शिश्रणविधेश्च उत्तरदायित्वं शिक्षामन्त्रालयाधीनं भवति येन प्राथमिकविद्यालयतः पूर्वप्राथमिकविद्यालयपर्यन्तम् अस्य निरन्तरतां शिक्षायाः मूलभूतांशान् च विनिश्चेतुं शक्नुयात् । प्रारम्भिकबाल्यावस्थापालनस्य शिक्षायाः च पाठ्यक्रमाणां आयोजना क्रियान्वयनं च शिक्षामन्त्रालयः, महिला एवं बालविकासः (डब्ल्यूसीडी), स्वास्थ्यम् एवं परिवारकल्याणमन्त्रालयः (एमएचएफडब्ल्यू), जनजातीयकार्यमन्त्रालयः च मिलित्वा कुर्युः। विद्यालयशिक्षायां प्रारम्भिकबाल्यावस्थापालनस्य शिक्षायाः च एकीकरणार्थं निरन्तरमार्गदर्शनार्थं च विशेषसंयुक्तसबलकार्यकर्तृसमूहस्य(टास्क फोर्स) रचना क्रियते ।

## 2. मूलाधारभूतं साक्षरता संख्याज्ञानं च - अध्ययनार्थं त्वरिता अत्यावश्यकी प्रेरणा

2.1 अध्ययनलेखनसामर्थ्यं, संख्याभिः सह मूलभूतनिष्पदनप्रक्रिया च भाविविद्यालयीयशिक्षायाः कृते आजीवनाध्ययनार्थम् अत्यपेक्षितमूलभूताधारः अस्ति । यद्यपि नैकसर्वकारीय- सर्वकारेतरसर्वेक्षणैः अयं संङ्केतः लभ्यते यत् अधुना अध्ययनप्रक्रिया कष्टेन प्रचलति इति । अधुना प्राथमिकविद्यालयेषु अधिकसंख्याविद्यार्थिनः (प्रायः पञ्चकोट्यधिकाः इति अनुमानितम्) मूलभूतशिक्षणं, संख्याज्ञानं च नाधिगतवन्तः,अर्थात् एतादृशच्छात्राणां कृते मूलपाठ्यक्रमस्य अध्ययनसामर्थ्यम्, अधिगसामर्थ्यं, संख्यायाः व्यवकलनसंकलनसामर्थ्यं च नास्ति ।

2.2 सर्वेषां विद्यार्थिनां कृते मूलभूतसाक्षरतायाः संख्याज्ञानस्य च अवाप्तिः तत्कालिकं राष्ट्रियम् अभियानं स्यात् येन अनेकेषु अभियानेषु क्रियमाणैः तात्कालिकोपायैः स्पष्टलक्ष्येन सह अल्पकाले एव सत्वरं स्वीकुर्यात् (यत्र प्रत्येकं छात्रः 3 -कक्षां यावत् मूलभूतसाक्षरतां संख्याज्ञानं च प्राप्नोति)। 2025यावत् प्राथमिकविद्यालयेषु सार्वभौमिकमूलभीतसाक्षरतायाः, संख्याज्ञानस्य च प्राप्तिः शिक्षाप्रणाल्याः सर्वोच्चप्राथमिकता स्यात्। अध्ययनस्य मूलभूतापेक्षायाः (अर्थात् मूलभूतस्तरे पठनम्, लेखनम्,अङ्कगणितम्) प्रपूर्तिः यदि स्यात् तदा अस्याः नीतेः अवशिष्टांशाः विद्यार्थिनां कृते प्रासङ्गिकाः भवन्ति। अतः शिक्षामन्त्रालयः (एमई) आद्यापेक्षानुसारम् आधारभूतसाक्षरतायाः संख्याज्ञानस्य च राष्ट्रिय- मिशन इत्यस्य स्थापनां करिष्यति। एतदनुगुणं सर्वराज्यानां/ केन्द्रशासितप्रदेशानां सर्वकारेण सर्वेषु

प्राथमिकविद्यालयेषु सार्वभौमिकमूलभूतसाक्षरतां,संख्याज्ञानं च 2025 यावत् प्रापयितुं योग्या, यथास्तरं लक्ष्यानि, उद्देश्यानि च साधयितुं सूक्ष्मातया परिशीलयितुं,निरीक्षयितुं च अविलम्बम् क्रियान्वयनयोजना निर्मीयते।

2.3 आदौ शिक्षकाणां रिक्तानि पदानि यथाशीघ्रं समयानुगुणं पूर्यन्ते विशेषतया प्रतिकूलप्रदेशेषु शिक्षकच्छात्राणाम् अनुपातान्तरप्रदेशेषु, अधिकनिरक्षरताप्रदेशेषु च पूर्वं भवति । स्थानीयशिक्षकाणां स्थानीयभाषापरिचितशिक्षकाणां च नियुक्तये विशेषावधानं प्रदीयते । प्रतिविद्यालयं शिक्षकविद्यार्थिनोः अनुपातस्तरः (पीटीआर) 30:1 न्यूनः स्यात् एवं सामाजिकार्थिकवञ्चिताधिकच्छात्रयुक्तप्रदेशेषु अनुपातस्तरः(पीटीआर) 25:1 न्यूनः स्यात् इति निश्चीयते।मूलभूतसाक्षरतां, संख्याज्ञानं च अध्यापयितुं शिक्षकाणां कृते निरन्तरव्यावसायिकविकासेन प्रशिक्षणम्, प्रोत्साहः,उत्तेजनं च प्रदास्यते।

2.4 पाठ्यचर्यायां मूलाधारसाक्षरतायां संख्याज्ञाने च अधिकम् अवधानं प्रदीयते एवं सामान्यरूपेण माध्यमिकविद्यालयपाठ्यचर्यासु एकया सुदृढया निरन्तररचनात्मिकया अनुकूलशिक्षाप्रणाल्या सह विशेषरूपेण प्रत्येकं छात्रस्य अध्ययनरीतिः अन्विष्यते एवम् अध्ययनम्,लेखनम्, भाषणम्,गणनम्,अङ्कगणितम्, गणितीयचिन्तनम् इत्यत्र अधिकम् अवधानं भवति ।एतेषु विषयेषु विद्यार्थिनः प्रोत्साहयितुम् उत्तेजयितुं च प्रतिदिनं निर्दिष्टसमये आवर्षं पूर्वोक्तविषयेषु विभिन्नक्रियाकलापानाम् आयोजनं क्रियते। मूलभूतसाक्षरतायाः संख्याज्ञानस्य च कृते अधिकं नूतनबलं प्रदातुं शिक्षकशिक्षायाः, प्रारम्भिकपाठ्यचर्यायाः च पुनर्विन्यासः क्रियते।

2.5 अधुना ईसीसीई इत्यस्य सर्वत्र अनुपलम्भात् अधिकसंख्याकाः विद्यार्थिनः प्रथमस्तरकक्षायां प्रवेशानन्तरं कतिपयेभ्यः सप्ताहेभ्यः परं सहपाठिनः अपेक्षया अध्ययने पृष्ठतो भवन्ति ।अतः सर्वे विद्यार्थिनः विद्यालयं गन्तु सिद्धाः सन्ति इति विनिश्चेतुम् एनसीईआरटी,एससीईआरटी इत्याभ्यां प्रथमस्तरविद्यार्थिनां कृते त्रिमासीयाल्पकालिकक्रीडाधारितं विद्यालयसिद्धताप्रतिमानं निर्मीयते तत्र वर्णमाला,ध्वनिः,शब्दाः,वर्णाः,आकाराः,संख्याः इत्यादिभिः सह अनेके गतिविधयः, कार्यपुस्तकानि च अन्तर्भवन्ति एवम् एतेषां प्रतिमानानां निर्माणार्थं सहपाठिनां मातापित्रोः च योगदानं स्वीक्रियते।

2.6 द डिजिटल इन्फ्रास्ट्रक्चर फॉर नॉलेज शेयरिंग (दीक्षा)इत्यनेन मूलभूतसाक्षरतायाः संख्याज्ञानस्य च उच्चस्तरीयगुणवत्तासंसाधनानां राष्ट्रियभाण्डागारस्य उपलब्धिः कार्यते। शिक्षकाणां कृते सहायकरूपेण कार्यस्य निर्वहणार्थं शिक्षकविद्यार्थिनोः मध्ये

विद्यमानभाषावरोधकान् निवारयितुं तान्त्रिकप्रणालिं शिक्षकाणां कृते सहायकसेतुरूपेण प्रयोगः क्रियते ततःपरं कार्यन्वयनं क्रियते ।

2.7 विद्यार्थिनाम् अध्ययनस्तरस्य ह्रासताकारणेन सर्वेभ्यः मूलभूतसाक्षरतायाः संख्याज्ञानस्य च प्रापणोद्देश्येन अस्मिन् अभियाने शिक्षकान् समर्थयितुम् अपेक्षितानि सर्वाणि विधानानि संशोध्यन्ते। समग्रविश्वे जायमानमध्ययनेन इदं ज्ञायते यत् यदा सहाध्यायिनोः परस्परं प्रशिक्षणं यथा अध्येतृणां कृते प्रभावपूर्णं भवति तथैव प्रशिक्षकाणां कृतेपि अत्यन्तप्रभावपूर्णं भवति ।अतः सहाध्यायिप्रशिक्षणं प्रशिक्षिताध्यापकानां प्रत्यवेक्षणे अपेक्षितसुरक्षांशानाम् अवधानेन सह छात्राणां कृते स्वैच्छिकानन्दपूर्णगतिविधिरूपेण स्वीकर्तुं शक्यते। अतः स्थानीयसमुदायप्रशिक्षितस्वसेविनां स्थानीयेतरप्रशिक्षितस्वयंसेविनां च कृते आधिक्येन अभियाने भागं गृहीतुं सुलभं भवति । यदि समुदायस्य एकः साक्षरसदस्यः एकं छात्रं जनं वा कथं पठेत् इति प्रशिक्षितुं प्रतिबद्धः भवति तर्हि अस्य देशस्य परिदृश्यम् अचिरादेव परिवर्तितं भवति ।राज्यानि मूलभूतसाक्षरतायाः संख्याज्ञानस्य च उत्तेजके अस्मिन् राष्ट्रियाभियाने सहाध्यायिप्रशिक्षणस्य स्वयंसेविक्रियाकलापस्य च अभिवर्धनार्थं नूतनप्रतिमानस्थापनार्थं विचारं कर्तुं शक्नुवन्ति अनेन सह शिक्षार्थिनां प्रोत्साहनार्थम् अन्येषां कार्यक्रमाणामपि प्रारम्भं कर्तुं शक्यते।

2.8 स्थानीयभाषासु भारतीयसर्वभाषासु च उत्तमानुवादसहितानाम् (तन्त्रज्ञानसहायसहितम्) आनन्ददायकानां प्रेरणादायकानां च पुस्तकानाम् अभिवृद्धिं कृत्वा सर्वस्तरीयविद्यार्थिनां कृते विद्यालयेषु स्थानीयसार्वजनिकग्रन्थालयेषु च आधिक्येन उपलब्धिः कार्यते । देशे सर्वत्र पठनसंस्कृतेः निर्माणाय सार्वजनिकविद्यालयग्रन्थालयानां विस्तारः क्रियते ।डिजिटल-ग्रन्थालयानामपि निर्माणं क्रियते । विद्यालयातिरिक्तसमयेपि सार्वजनिकसेवार्थं विशेषतया ग्रामेषु विद्यालयग्रन्थालयाः स्थाप्यन्ते एवं पठनं प्रोत्साहयितुं संवर्धयितुं च पुस्तकसंघसदस्याः विद्यालय/सार्वजनिकग्रन्थालयेषु मेलितुं शक्नुवन्ति। काचित् राष्ट्रियपुस्तकसंवर्धनीतिः सज्जीक्रियते एवं सर्वेषु स्थानेषु ,भाषासु, स्तरेषु,शैलिषु च पुस्तकानाम् उपलब्धिं, गुणवत्तां, प्राप्तिं च पाठकानां कृते विधातुं व्यापकोपक्रमः स्वीक्रियते ।

2.9 यदा बालाः कुपोषिताः अनारोग्यपीडिताः च भवन्ति तदा उत्तमतया अध्ययनं कर्तुं न असमर्था भवन्ति । अतः बालेषु पोषणस्य स्वस्थ्यस्य (मानसिकस्वास्थ्यं च) च विषये पुष्टिकरभोजनप्रदानेन प्रशिक्षितसमाजिकर्यकर्तृभिः,परामर्शदातृभिः विद्यालयव्यवस्थायां सार्वजनिकसहभागितया च जागर्या क्रियते। अपि च अनेकसंशोधनानि वदन्ति यत् प्रातःकाले पौष्टिकोपहारनन्तरस्य वेलासु अनेकाभियाचनाविषयाणाम् अध्ययनम् अधिकप्रभावि भवति इति अतः मध्याह्नभोजनेन सह अतिरिक्ततया लघुं किन्तु

पौष्टिकाल्पहारं प्रदाय तत्समयस्य सदुपयोगं कर्तुं शक्यते । यत्र उष्णभोजनस्य व्यवस्थां कल्पयितुं न शक्यते तादृशस्थलेषु लघुपौष्टिकभोजनस्य व्यवस्थां कल्पयितुं शक्यते यथा गुडेन सह कलाय/चणकम्, अथवा स्थानलभ्यानि फलानि दातुं शक्यते। सर्वेषां विद्यार्थिनाम् आरोग्यपरीक्षणे भागग्रहणं नियतरूपेण भवेत् विशेषतया शतप्रतिशतं रोगनिरोधशक्तिः तस्य पर्यवेक्षणार्थम् आरोग्यपरिचयपत्रं प्रदीयते।

**3.विद्यालयपरित्यक्तच्छात्राणां संख्यायां न्यूनीकरणम्, शिक्षणस्य सर्वेषु स्तरेषु सार्वत्रिकरूपेण प्रवेशस्य निश्चयः।**

3.1 विद्यालयशिक्षाप्रणाल्याः प्राथमिकलक्ष्यम् छात्राणां नामाङ्कनं, नियतरूपेण विद्यालये उपस्थिता भवन्ति वेति विषये स्यात् । सर्वशिक्षाभियानम् (इदानीं समग्रशिक्षा) शिक्षाधिकाराधिनियमः इत्यादियुपक्रमैः भारतेन सद्यः वर्षेषु प्राथमिकशिक्षायां छात्राणां नामाङ्कने अधिकप्रगतिः समासादिता अस्ति ।तथापि आगामिश्रेण्याः दत्तांशाः विद्यालयप्रणाल्यां छात्राणां धारणादिगभीरसमस्यां सूचयन्ति । षष्ठकक्षतः अष्टमकक्षां यावत् जीईआर 90.9 प्रतिशतं विद्यते, किन्तु नवमदशमकक्षयोः एकादशद्वादशकक्षयोः च कृते क्रमात् 79.3 प्रतिशतं 56.5 प्रतिशतम् एव, अयम् अनुपातः सूचयति यत् कथं पञ्चमकक्षायाः परं विशेषतया अष्टमकक्षायाः परं नामाङ्किताः विद्यार्थिनः विद्यालयशिक्षां त्यजन्ति इति । 2017-18 वर्षे एनएसएसओ इत्यस्य 75तमचक्रस्य गृहसमीक्षानुगुणं 6 तः17वर्षस्य मध्ये विद्यमानेषु छात्रेषु विद्यालयम् अनागतानां छात्राणां संख्या 3.22 कोटिः विद्यते । एतेषां छात्राणां यथासंभवं शिक्षाप्रणाल्यां शीघ्रं पुनरानयनम् अस्माकं प्रमुखप्राथमिकता स्यात् । अनेन सह 2030 वर्षं यावत् पूर्वविद्यालयतः माध्यमिकविद्यालयस्तरं यावत् शतप्रतिशतं पूर्णनामाङ्कनानुपातस्य प्राप्तिलक्षेन सह अधिकविद्यार्थिनां विद्यालयशिक्षातः त्यागस्य वारणमपि करणीयम् । पूर्वप्राथमिकविद्यालयतः द्वादशकक्षां यावत् व्यावसायिकशिक्षणेन सह गुणवत्ताशिक्षणं प्राप्तुं देशस्य सर्वेषां छात्राणां सार्वतोभावेन प्रवेशार्थम् अवसरप्राप्तये च कश्चन दृढराष्ट्रस्तरीयप्रयासः क्रियेत ।

3.2 आहत्य उपक्रमद्वयं कर्तुं शक्यते यत् विद्यालयत्यक्तानां बालानां पुनरानयनम्, अग्रे बालानां विद्यालयस्य त्यागे अवरोधश्च । आदिमः प्रभावी विद्यते यत्र मूलभूतसंसाधनानां प्रदानेन सर्वेषां विद्यार्थिनां कृते पूर्वप्राथमिककक्षातः द्वादश कक्षां यावत् सर्वस्तरेषु सुरक्षितायाः अकर्षकायाः शिक्षायाः प्राप्तिः स्यात् । प्रतिस्तरं नियतरूपेण प्रशिक्षिताध्यापकानाम् उपलब्धिं कारयित्वा कस्मिन्नपि विद्यालये मूलभूतसंसाधनानां न्यनता नास्तीति विनिश्चेतुं विशेषास्था स्वीकार्या । सर्वकारीयविद्यालयेषु विश्वासार्हता प्रतिष्ठाप्यते अधुना विद्यमानानां विद्यालयानाम् उन्नयनं विस्तारं च कृत्वा यत्र विद्यालयाः न

सन्ति तत्र यथा विद्यार्थिनः विद्यालयस्य त्यागं न कुर्युः तथा गुणवत्ताविद्यालयान् निर्माय छात्रावासाणां विशेषतया बालिकाछात्रावासाणां सुरक्षा गमनागमनव्यवस्था च प्रकल्प्यते येन विद्यार्थिनां कृते गुणवत्ताविद्यालयं गन्तु उत्तमस्तरे च अध्ययनं कर्तुम् अवसरः लभ्यते । देशान्तरगामिकर्मकरच्छात्राणां विषमपरिस्थितौ विद्यालयस्य त्यागं कुर्वाणानां विद्यार्थिनां च मुख्यधारायां समानेतुं नागरिकसहायेन सह वैकल्पिकस्य नवीनशिक्षाकेन्द्रस्य च स्थापना क्रियते ।

3.3 द्वितीयस्तु विद्यालयेषु सर्वेषां विद्यार्थिनां सहभागिता स्यात्, एतदर्थम् अवधानपूर्वकं सर्वेषां विद्यार्थिनां निरीक्षणं कुर्यात् अपि च तेषाम् अध्ययनस्तरे अपि अवधानं स्यात् येन इदं निश्चितं भवेत् क) विद्यार्थिनः विद्यालयेषु नामाङ्कनं कुर्वन्तः सन्ति, विद्यालयेषु उपस्थिताः भवन्ति ।ख) विद्यालयत्यक्तविद्यार्थिनः पुनरागन्तुं यदि अध्ययने पृष्ठतः सन्ति तेषां कृते पुनःप्रवेष्टुं च अपेक्षितावकाशः वर्तते इति । प्राथमिकस्तरात् द्वादशकक्षां यावत् अष्टादशवर्षपर्यन्तानां विद्यार्थिनां कृते समनागिणवत्ताशिक्षां प्रदातुम् उत्तममूलभूतसौविध्यस्य उपलब्धिः स्यात्। विद्यालयैः/विद्यालयसंकीर्णैः सह संबद्धाः परामर्शदातारः स्वयंसेविनः शिक्षकाः च विद्यार्थिभिः मातापितृभ्यां च सह निरन्तरं कार्यं कुर्युः अपि च ते समुदायेषु संचार्य निश्चयं कुर्युः यत् विद्यलयस्तरीयाः विद्यार्थिनः विद्यालयं गत्वा अध्ययनं कुर्वन्तीति।राज्यस्तरे जिलास्तरे च दिव्याङ्गजनानां सशक्तीकरणार्थं संयुक्तान् नागरिकसमाजसंस्था/सामाजिकन्यायसबलीकरणविभागैः प्रशिक्षितान् अर्हसामाजिककार्यकर्तृन् च राज्य/केन्द्रशासितप्रदेशसर्वकारः स्वीकृतविविधनूत्नकार्यविधानैः एतत्प्रमुखकार्यसंपादनाय विद्यालयैः सह संयोजयितुं शक्नोति।

3.4 यदा विद्यालयेषु उत्तममूलभूतसौविध्यस्य उपलब्धिः विद्यार्थिनां भागग्रहणं च स्यात् ततःपरं विद्यार्थिनां कृते गुणवत्ताशिक्षणं प्रमुखं भवति अतः तादृशाः विद्यार्थिनः ( विशेषतया बालिकाः सामाजिकार्थिकरूपेण वञ्चितसमूहस्य विद्यार्थिनः च) विद्यालये उपस्थातुम् अनासक्ताः न भवन्ति । अधिकतया विद्यालयत्यक्तविद्यार्थियुक्तप्रदेशेषु स्थानीयभाषाज्ञातशिक्षकाणां प्रोत्साहनाय कस्याश्चित् प्रणाल्याः अपेक्षा भवेत् अनेन सह पाठ्यक्रमम् अधिकम् आकर्षकम् उपयोगितां च कर्तुं तस्य सूक्ष्मपरीक्षणमपि अपेक्षितं विद्यते ।

3.5 सामाजिकार्थिकरूपेण वञ्चितसमूहे (एसईडीजी) विशेषावधानेन सह सर्वेषां विद्यार्थिनां कृते अध्ययनावकाशाय औपचारिकानौपचारिकोभयशिक्षणमार्गं सुलभं कर्तुं विद्यालयशिक्षणव्याप्तेः विस्तारः भवति । भौतिकरूपेण विद्यालये अध्येतुमसमर्थानां भारतस्य युवकानां कृते अध्ययनं कर्तुं नेशनल इन्स्टिट्यूट ऑफ ओपन स्कूलिंग (एनआईओएस) एवं राज्यमुक्तविद्यलयैः प्रदीयमानस्य मुक्तदूरस्थशिक्षणकार्यक्रमस्य

(ओडीएल) विस्तारः दार्ढ्यं च संपाद्यते । एनआईओएस राज्यमुक्तविद्यालयैश्च स्वपाठ्यकार्यक्रमैः सह अधोलिखितकार्यक्रमाः अपि प्रदीयन्ते - अ,ब, स स्तराणां शिक्षा औपचारिकविद्यालयप्रणाल्याः 3,5,8 कक्षायाः समनतया, दशमद्वादशकक्षायाः समानरूपेण माध्यमिकशिक्षाकार्यक्रमाः, व्यावसायिकशिक्षापाठ्यक्रमाः/कार्यक्रामाः,वयस्कसाक्षरता, जीवनसंवर्धनकार्यक्रमाः च ।एनआईओएस माध्यमेन राज्यसर्वकाराणां प्रोत्साहनं क्रियते, ते राज्येषु पूर्वस्थापित स्टेट इन्सिट्यूट ऑफ ओपन स्कूलिंग (एनआईओएस) इत्यस्य सशक्तीकरणं विधाय नूतनसंस्थां च संस्थाप्य स्थानीयभाषया उपर्युक्तकार्यक्रमाः संचाल्यन्ते ।

3.6 सर्वकार-सर्वकारेतरसंस्थानां कृते विद्यालयनिर्माणार्थं, संस्कृति-भूगोल-सामाजिकसंरचनाधारेण स्थानीयवैविध्यस्य प्रोत्साहनार्थं,शिक्षणस्य वैकल्पिकप्रतिमानस्य निर्माणप्रोत्साहनार्थं च विद्यालयनिर्माणसम्बद्धनियमाः सरलीक्रियन्ते । अस्य अधिकं लक्षम् आगमने न्यूनम्, किन्तु अभीष्टाध्ययनपरिणामसंबद्धायाः निर्गमनक्षमतायां केन्द्रितं भवति । आगमनसंबद्धविनियमाः कानिचन क्षेत्राणि यावत् परिमितं भवति अस्य उल्लेखः अष्टमे अध्याये कृतः।सार्वजनिक-लोकोपकारिसहयोगाद्यादिभिः सह विद्यालयानाम् अन्यप्रतिमनानामपि प्रायोगिकरूपेण संचालनं क्रियते ।

3.7 बालानाम् अधिगमस्य संवर्धनाय स्वयंसेविप्रयत्नेषु प्राक्तनच्छात्राणां समुदायस्य च अन्तर्भावः क्रियते । तत्र विद्यालयेषु प्रत्येकं विद्यार्थिनः कृते बोधनम्, साक्षरताशिक्षणस्य अन्यसहायार्थं च अतिरिक्तकक्षाणाम् आयोजनम्, शिक्षकेभ्यः शिक्षणस्य मार्गदर्शनं प्रोत्साहनं च, विद्यार्थिनां कृते व्यवसायसंबन्धिमार्गदर्शनस्य प्रदानम्,इत्यादि। एतदर्थं विद्यालयस्य भूतपूर्वविद्यार्थिनां स्वस्थसक्रियवरिष्ठनागरिकाणां, स्थानीयसमुदायस्य सदस्यानां च अपेक्षितसहयोगः स्वीक्रियते ।अस्य उद्देश्यस्य पूर्तये साक्षरस्वयंसेविनाम्, सेवनिवृत्तवैज्ञानिकानाम्/सर्वकारीय/सर्वकारेतरकर्मचारिणां भूतपूर्वविद्यार्थिनाम्, शिक्षाविदां च दत्तांशसंग्रहः क्रियते ।

## 4. विद्यालयेषु पाठ्यक्रमाः शिक्षणशास्त्रं च : अधिगमः समग्रः, एकीकृतः आनन्ददायकः, विनियोगात्मकश्च स्यात् ।

### नवीन 5+3+3+4 विन्यासेन विद्यालयपाठ्यक्रस्य शिक्षणशास्त्रस्य च पुनारचनम् ।

4.1 विद्यालयशिक्षापाठ्यक्रमस्य शैक्षणिकसंरचनायाः च पुनारचना क्रियते येन 3-8,8-11,11-14, 14-18 वयःश्रेण्यां कृते अध्ययनस्य विविधस्तरानुगुणं ,विद्यार्थिनां विकासस्य भिन्नभिन्नस्तरानुगुणं, तेषां रुच्यनुगुणं च अपेक्षितविकासार्थं समुचितं लक्षं प्रदातुं शक्येत। अतः विद्यालयशिक्षार्थं पाठ्यक्रमशिक्षणसंरचना, पाठ्यक्रमरूपरेखा च 5+3+3+4

विन्यासेन निर्देशितो भवति, एतदनुसारं क्रमशः मूलस्तरः ( भागद्वये अर्थात् अङ्गनवाडी/प्राग्विद्यालयस्य वर्षत्रयम्, प्राथमिकविद्यालयस्य 1-2कक्षयोः वर्षद्वयं, एतद्वयं 3 तः 8वर्षपर्यन्तस्य बालानाम् अन्तर्भावः)पूर्वसिद्धतास्तरः (कक्षा 3-5 स्तरः, 8वर्षतः 11वर्षीयाणां बालानाम् अन्तर्भावः ) माध्यमिकस्तरः ( कक्षा 6-8,स्तरः 11वर्षतः 14वर्षीयाणां बालानाम् अन्तर्भावः) उच्चमाध्यमिकस्तरः (9 -12 स्तरद्वये, 9 -10 प्रथमस्तरे,11-12द्वितीयस्तरे च 14वर्षतः 18वर्षीयाणां बालानाम् अन्तर्भावः ) च भवति।

4.2 पञ्चवर्षीये आनम्ये मूलस्तरे नैकस्तरीया क्रीडा/गतिविध्याधारिताध्ययनम्, 1.2 इत्यत्र उल्लिखितम् ईसीसीई पाठ्यक्रमः शिक्षणशास्त्रं च अन्तर्भूतं भवति।पूर्वसिद्धतास्तरः वर्षद्वयस्य भवति तत्र क्रीडाधारितः अन्वेषणाधारितः,गतिविध्याधारितं शिक्षणम्, मूलस्तरे विद्यमापाठ्यक्रमशैली च अन्तर्भूतं भवति। पठनम्, लेखनम्, भाषणम्, शारीरिकशिक्षा, कला, भाषा, विज्ञानम्, गणितम् इत्यादिविषयेषु दार्ढ्यसंपादनाय अधिकौपचारिकस्य किन्तु संवादात्मककक्षाधिगमस्य लघुपाठ्यपुस्तकाधारितशिक्षणस्य अन्तर्भावः च क्रियते ।माध्यमिकस्तरः वर्षत्रयान्तर्भूतो भवति तत्र प्राथमिकस्तरस्य पाठ्यक्रमशिक्षणशैल्यनुरूपं विषयनिर्माणं भवति किन्तु अत्र विषयविशेषज्ञशिक्षकैः विषयस्य अमूर्तकल्पनायाः परचर्चायाश्च आरम्भः क्रियते एतदर्थम् अस्मिन् स्तरे विद्यर्थिनाम् अपक्षितसज्ज्ञां कर्तुम् अत्र विज्ञानम्, गणितम्,कला,सामाजिकविज्ञानम्,मानवीयशिक्षा इत्यादीनां विषयाणाम् अन्तर्भावः क्रियते । प्रत्येकं विषये प्रायोगिकं शिक्षणं, विभिन्नविषयैः सह अन्तःसम्बन्धस्य अन्वेषणं च प्रति एवम् अधिकविशिष्टविषयाणां शिक्षकाणाम् उपलब्धौ अपि प्रोत्साहनं क्रियते । माध्यमिकस्तरः चतुर्वर्षीयः बहुविषयसमाविष्टश्च भवति, अपि च अयं स्तरः विषयाधारितः शिक्षणशास्त्रीयशैल्याधारितः च भवति, किन्तु अधिकतलस्पर्शी विश्लेषणात्मकचिन्तनयुक्तः जीवनाकाङ्क्षां प्रति अधिकावधानयुक्तः विद्यार्थिनां कृते अपेक्षितविषयचयनं प्रति अधिकनम्रतायुक्तश्च भवति । विशेषतया दशमकक्षायाः परं निर्गमनविद्यार्थिनां कृते व्यावसायिकशिक्षणे अथवा विशेषविषययुक्तविद्यालयेषु 11-12 स्तरे अन्यप्रणालिषु प्रवेशस्य विकल्पः सर्वदा भवति ।

4.3 उपर्युक्तस्तराः शैक्षणिकाधारिताः शिक्षणशास्त्रीयाश्च सन्ति, विद्यार्थिनां कृते संज्ञानात्मकविकासाधारेण विद्यार्थिनः सुलभरूपेण अवगन्तुं पाठ्यक्रमस्य विन्यासः कृतः अस्ति ।ते स्तराः राष्ट्रियराज्यपाठ्यक्रमाणाम् अध्ययनाध्यापनयोः कार्यतन्त्रस्य विकासाय मार्गदर्शनं कुर्वन्ति किन्तु भौतिकसंरचनायाः परिवर्तनस्य अपेक्षा न भवति ।

**विद्यार्थिनां समग्रविकासः**

4.4 सर्वेषु स्तरेषु पाठ्यचर्यायाः शिक्षणविधेश्च समग्रकेन्द्रबिन्दुः विद्यते यत् शिक्षाप्रणालीं रटनशिक्षणात् पृथक् रूपेण वास्तविकं ज्ञानं प्रति कथम् अध्येयम् इत्येतत् प्रति च नयनम्। शिक्षणस्य मुख्यम् उद्देश्यं न केवलं संज्ञानतमकं किन्तु चरित्रनिर्माणं 21शतमानस्य कौशलपूर्णं च विधातुं विद्यते । वास्तवरूपेण ज्ञानं गुप्तनिधिः विद्यते एवं शिक्षा अन्तर्निहितप्रतिभया पूर्णतां साधयितुं सहकरोति । एतल्लक्ष्यावाप्तये शिक्षाविधीनां पाठ्यचर्यायाश्च सर्वे अंशाः परिष्क्रियन्ते । प्राग्विद्यालयतः उच्चशिक्षापर्यन्तं प्रत्येकं स्तरस्य समेकीकरणार्थं विभिन्नक्षेत्रेषु विशिष्टकौशलस्य मूल्यस्य च अभिज्ञानं क्रियते ।शिक्षणे अधिगमप्रक्रियायां च एतेषां कौशलानां मूल्यानां च आत्मासात् कृतमिति विज्ञातुं पाठ्यचर्याप्रतिमानस्य संपर्कतन्त्रस्य विकासः क्रियते । एनसीईआरटी अपेक्षितानां कौशालानाम् अभिज्ञां करोति एवं बल्यावस्थायाः विद्यालयशिक्षायाः च कृते राष्ट्रियपाठ्यचर्याप्रतिमानेषु व्यवहाराय तन्त्रांशस्यापि समावेशं करोति ।

**अनिवार्याधिगमस्य आलोचनात्मकचिन्तस्य च विकासाय पाठ्यक्रमस्य विषयाणां न्यूनीकरणम्**

4.5 पाठ्यक्रमस्य अध्ययनविषयं प्रत्येकं विषये न्यूनीकृत्य अपेक्षितविषये केन्द्रीक्रियते येन आलोचनात्मकचिन्तनस्य, समग्रस्य, अन्वेषणात्मकस्य, परिचर्चाधारितस्य, विमर्शनाधारितस्य अधिगमे लक्ष्यं स्थापयितुं शक्येत । इमे विषयाः मुख्यतया मुख्यावधरणानां, विचाराणां, अनुप्रयोगाणां, समस्यासमाधानानाम् उपरि केन्द्रिताः भवन्ति । शिक्षणम् अधिगमश्च संवादात्मकरूपेण संचालितं भवति प्रश्नकरणे प्रोत्साहनं क्रियते एवं कक्षासु नियतरूपेण रुचिकराः, रचनात्मकाः, सहयोगात्मकाः, अन्वेषणात्मकाश्च गतिविधयः भवन्ति येन गहनचिन्तनस्य प्रायोगिकात्मकाध्ययनस्य च कृते प्रोत्साहनं स्यात् ।

**प्रायोगिकाधिगमः**

4.6 सर्वेषु स्तरेषु प्रायोगिकाधारितस्य अधिगमात्मकशिक्षणस्य समायोजनं क्रियते । तत्र अन्यविषयैः सह स्वयम् अध्ययनम् एवं प्रत्येकं विषये कलायाः क्रीडायाश्च समेकीकरणं , कथाधारितशिक्षणस्य च समावेशः भवति । एवं प्रत्येकं शिक्षणे मानकशिक्षणरूपेण विभिन्नविषयैः सह संबन्धान्वेषणस्य प्रोत्साहनं क्रियते । अधिगमप्रतिमानस्य (लर्निंग आउटकम) वाञ्छनीयाधिगमपरिणामानां च मध्ये विद्यमानम् अन्तरं न्यूनीकर्तुं केषुचित् विषयेषु कक्षासंबद्धप्रक्रियासु च परिवर्तनं भविष्यति । यत्र अपेक्षा भवति तत्र दक्षताधारिताधिगमस्य शिक्षायाश्च विषये उन्मुखीक्रियते ।आकलनोपकरणानां ( यत्र मापनं

तेन रूपेण, तस्य, तदर्थम्, इत्याद्याकलनम् अन्तर्भूतम् ) कृते प्रदत्तस्य वर्गस्य प्रत्येकं विषयस्य अधिगमपरिणामस्य , क्षमतायाः प्रवृत्तिभिः सह संयोज्यते ।

4.7 कला-समन्वयः (आर्ट इन्टिग्रेशन ) पाठ्यक्रमस्य शिक्षणपद्धतिः विद्यते । तत्र विविधविषयाणाम् आवधारणानाम् अधिगमार्थं कलायाः संस्कृतेश्च विभिन्नविषयाः मूलाधाररूपेण उपयोगः क्रियते । प्रायोगिकाधिगमस्य भागरूपेण कलासमन्वितशिक्षणं कक्षाप्रक्रियासु समन्वितं भवति येन कक्षा न केवलम् आनन्दपूर्णं भवति किन्तु भारतीयकलायाः संस्कृतेश्च समेकीकरणेन भारतीयतायाश्च परिचयं प्राप्नुवन्ति छात्राः ।इदं शिक्षणस्य संस्कृतेश्च मध्ये विद्यमानं संबन्धं दृढयति ।

4.8 क्रीडा- समन्वयः कश्चन संकरपाठ्यक्रमः विद्यते । यत्र स्थानीयक्रीडाभिः सह विविधशारीरिकगतिविधयः शिक्षणप्रक्रियासु उपयुज्यते । येन परस्परसहयोगः, स्वयमुपक्रमः, स्वतन्त्रतया कार्यकरणम्, स्वयम् अनुशासनम्, समूहभावना, दायित्वम्, नागरीकता इत्यादीनां कौशलानां विकासाय सहायको भवति । क्रीडासमन्वयाधिगमः कक्षाधिगमे समन्वितो भवति येन छात्राः शारीरिकक्षमताम् आजीवनप्रक्रियारूपेण स्वीकुर्युः अपि च फिट इण्डिया मूवमेन्ट मध्ये समाविष्टेन शारीरिकक्षमतास्तरेण सह जीवनकौशलं प्राप्तुं सहायो भवति । शिक्षायां क्रीडायाः समन्वयस्य अवश्यकता पूर्वमेव ज्ञातं विद्यते। यतः क्रीडया बालकानां शारीरिकमनासिकयोगक्षेमेण सह सर्वतोमुखविकासः भवति एवम् अधिगमसामर्थ्यमपि वर्धते ।

**विषयचयने नम्यतामाध्यमेन छात्राणां सशक्तीकरणम्**

4.9 विद्यार्थिनां कृते विशेषतया माध्यमिकविद्यालयेषु अधिकनम्यता अध्ययनार्थम् एवं विषयचयनार्थं विकल्पः प्रदास्यते । यत्र शारीरिकशिक्षा, कला, शिल्पम्, व्यावायिकविषयाः च अन्तर्भूताः भवन्ति । येन छात्राः अध्ययनमार्गं जीवनमार्गं च स्वयं निश्चेतुं स्वतन्त्रः भवेयुः । समग्रविकासः प्रतिवर्षं विषयाणां पाठ्यक्रमाणां च व्यापकता चयनविकल्पश्च माध्यमिकविद्यालयशिक्षयाः नवीनवैशिष्ट्यं विद्यते । पाठ्यक्रमाणां, सहगामिपाठ्यक्रमाणां कलानां, मानवीयमौल्यानां विज्ञानस्य, व्यवसायिकस्य शैक्षणिकस्य च मध्ये कठिनविभागः न भवति । विज्ञान- मानवीयमौल्य- गणितादिभिः सह शारीरिकशिक्षण -कला -शिल्प- व्यावसायिकौशलेत्यादिविषयाणां समावेशः छात्रस्य प्रत्येकं स्तरे अपेक्षितम्, आसक्तिदायकं,सुरक्षाप्रदायकं च परिगणय्य पाठ्यक्रमेषु क्रियते ।

4.10 विद्यालयीयशिक्षायाः चतुर्षु चरणेषु प्रत्येकं स्तरः विभिन्नक्षेत्रस्यानुगुणं सत्रार्धं प्रति अथवा अन्यप्रणालीं प्रति अग्रेसर्तुं विचारं कर्तुं शक्यते । लघुमानकं संयोजयितुम् अनुमतिः प्रदास्यते अथवा एतादृशपाठ्यक्रमः भवेत् यत् वैकल्पिकदिनेषु अपि प्रशिक्षणं भवति । येन

अधिकविषयाणां परिचयः अधिकनम्यतायाःनिश्चयः स्यात् । कला-विज्ञान-मानवीयमौल्य-भाषा-क्रीडा- व्यावसायिकविषयादीनां कृते अधिकनम्यातयाः अधिकमान्यतायाः अधिकानन्दस्य च लक्ष्यस्य अवाप्राप्तये राज्यानि अभिनवरूपेण चिन्तनं कुर्युः ।

**बहुभाषावादः भाषाशक्तिश्च**

4.11 सर्वे जानन्त्येव यत् लघुबालाः गृहभाषया /मातृभाषया वेगेन अर्थम् गृह्णन्ति अवधारयन्ति च । मातृभाषा सामान्यरूपेण स्थानीयजनैः व्यवह्रियमाणा एव भवति । किन्तु बहुभाषिपरिवारेषु परिवारसदस्यैः भाष्यमाणा गृहभाषा भवितुम् अर्हति यतोहि क्वचित् मातृभाषा स्थानीयभाषातः भिन्ना अपि भवितुमर्हति । अपेक्षितानुसारं न्यूनातिन्यूनं पञ्चमस्तरपर्यन्तम् अथवा इदं वरं स्यात् अष्टमस्तरपर्यन्तम् अथवा तदग्रिमस्तरेषु च शिक्षायाः माध्यमः गृहभाषा/ मातृभाषा / स्थानीयभाषा / क्षेत्रीयभाषा स्यात् । ततः परं गृह /स्थानीयभाषायाः संभवतः भाषारूपेण पाठ्यते । इदं सर्वकारीयविद्यालयेषु सार्वजनिकविद्यालयेषु च अनुपाल्यते । विज्ञानसहितं सर्वेषु विषयेषु गृहभाषायाम्/मातृभाषायां गुणवत्तापूर्णपाठ्यपुस्तकानाम् उपलब्धिः कार्यते । इदमपि निश्चीयते यत् बालस्य मातृभाषायाः बोधनाभाषायाः मध्ये विद्यमानम् अन्तरं निवारितम् उत नेति । गृहभाषायाम्/मातृभाषायां पाठ्यसामग्रीणाम् अनुपलब्धौ शिक्षकाणां विद्यार्थिनां संवादभाषा मातृभाषा एव भवति । येषां विद्यार्थिनां गृहभाषा/ मातृभाषा बोधनभाषातः भिन्नश्चेत् द्विभाषया अधिगमसामग्रीणाम् उपलब्धतां कारयितुं शिक्षकाः प्रोत्साहयन्ते । सर्वाः भाषाः उच्चगुणवत्ततया पाठ्यन्ते कस्याश्चित् भाषायाः अध्ययने अध्यापने च सा भाषा शिक्षामाध्यमा एव भवेदिति नास्ति ।

4.12 अनुसंधानम् इदं दर्शयति यत् वर्षद्वयतः अष्टवर्षस्य आयुर्मध्ये विद्यमानाः बालाः अतिवेगेन भाषां अधीयते अनेकभाषिता एतद्वयोविद्यार्थिनां कृते ज्ञानात्मकलाभं प्रददाति इति। प्राथमिकस्तरतः आरभ्य बालानां कृते विभिन्नभाषाभिः (मातृभाषायाः कृते अधिकावदानेन सह) व्यवहर्तुं प्रोत्साह्यन्ते । सर्वाः भाषाः मनोरञ्जकतया संवादात्मकतया पाठ्यन्ते तत्र अधिकसंवादसंभाषणेन सह आरम्भिकवर्षेषु मातृभाषया प्रारम्भिकपाठ्यक्रमस्य ततः परं मातृभाषया लेखनेन सह तृतीयस्तरे एवं तदग्रमिस्तरेषु च अन्यभाषया पठनलेखनकौशलस्य च विकासः क्रियते । देशस्य प्रादेशिकभाषासु विशेषतया भारतसंविधानस्य अष्टमानुसूच्यां वर्णितासु भाषासु अधिकतया भाषाशिक्षकाणां निवेशे केन्द्रसर्वकारेण राज्यसर्वकारेण च अधिकः प्रयासः क्रियते ।राज्यानि विशेषतया क्षेत्रीयराज्यानि स्वस्वराज्ये त्रिभाषासूत्रस्य समावेशार्थं एवं भारतीयभाषाणाम् अध्ययनस्य

प्रोत्साहनार्थम् अधिकसंख्यया शिक्षकाणां नियुक्तये परस्परं द्विपक्षीयसन्धिं कर्तुं शक्नुवन्ति । भिन्नभाषाः शिक्षयितुं भाषाशिक्षणं लोकप्रियं कर्तुं तन्त्रज्ञानस्य अधिकोपयोगः क्रियते ।

4.13 सांविधानिकनिबन्धनानि जनाः, क्षेत्राणि एकतायाः आकाङ्क्षा बहुभाषावादः इत्यादीनां प्रोत्साहनेन सह भारतस्य अखण्डतां च मनसि निधाय त्रिभाषासूत्रं समानीयते ।तथापि त्रिभाषासूत्रे अधिकानम्यता भवति एवं कस्मिन्नपि राज्ये कस्याः अपि भाषायाः बलात् समावेशो न भवति । छात्राः स्वयं पठ्यमानस्य भाषात्रयस्य विकल्पराज्यानि, क्षेत्राणि, स्वयं निश्चेतुं शक्नुवन्ति तत्र न्यूनातिन्यूनं भाषाद्वयं भारतीयभाषा भवेत् । विशेषरूपेण यः छात्रः तिसृषु भाषासु एकस्याः अथवा तदधिकायाः भाषायाः परिवर्तनम् इच्छति चेत् तत् षष्ठस्तरे सप्तमस्तरे वा परिवर्तनं कर्तुं शक्नोति किन्तु एतदर्थं तासु तिसृषु भाषासु ( एका भारतीयभाषा तत्साहित्यस्य अध्ययनेन सह )माध्यमिककक्षाध्ययानान्तं यावत् प्रावीण्यं प्रदर्शयितुं शक्नुयात् ।

4.14 एतदर्थम् उच्चतरगुणयुक्तानां विज्ञानस्य गणितस्य विषये द्विभाषापाठ्यपुस्तकानां शिक्षणाधिगमसामग्रीणां संरचनार्थं प्रयासः क्रियते येन विद्यार्थी विषयद्वये गृहभाषया/ मातृभाषया आङ्ग्लभाषया आलोचयितुं भाषितुं च सक्षमः स्यात् ।

4.15 यथा विश्वे विकसितदेशेषु इदं द्रष्टुं शक्यते यत् स्वभाषायाः संस्कृतेः, परम्परायाः च अध्ययने कापि बाधा नास्ति किन्तु वास्तवरूपेण शैक्षिक-सामाजिक-तान्त्रिकाभिवृद्धये अधिकः लाभः विद्यते । भारतीयभाषाः समग्रे विश्वे अधिकसमृद्धाः, वैज्ञानिकाः, रमणीयाः, अधिकभाषितभाषाः च विद्यन्ते यत्र प्राचीनाधुनिकसाहित्यस्य(गद्यं पद्यं च) बृहद्भाण्डागारो विद्यते । आसु भाषासु लिखितानि चलनचित्राणि संगीतम्, साहित्यं च भारतस्य परिचयः संपत् च अस्ति। सांस्कृतिकस्य राष्ट्रियैकीकरणस्य च दृष्ट्या भारतस्य युवकाः देशस्य भाषाणां विशालसमृद्धसाहित्यभाण्डागारस्य विज्ञाताः भवेयुः ।

4.16 अनया रीत्या देशस्य प्रत्येकं विद्यार्थी अध्ययन काले भारतीयभाषाः इति विषये यथा 6 तः8 स्तरे एकं भारतम् श्रेष्ठं भारतम् इत्युपकर्मान्तर्गते आनन्ददायकपरियोजनायां/गतिविधौ भागग्रहणं कुर्यात् । अस्यां परियोजनायां/गतिविधौ छात्राः अधिकांशरूपेण प्रमुखभारतीयभाषाणाम् उल्लेखनीयायाः परस्परसमानतायाः विषयं जानीयुः ,तदन्तर्गतं तासां सामान्यध्वन्यात्मकरूपेण वैज्ञानिकरूपेण व्यवस्थितवर्णमालानां, लिपीनां तासां सामान्यव्याकरणसंरचनानां, संस्कृतम् एवं अन्यभाषातः तस्याः शब्दावलीस्रोतसः उद्भवस्य अन्वेषणेन सह तासां भाषाणां परस्परप्रभावस्य ज्ञानम् अन्तर्भवति । ते इदमपि जानीयुः कस्मिन् क्षेत्रे का भाषा भाष्यते एवं आदिवासिभाषाणां प्रकृतिः संरचनां च ज्ञास्यन्ति एवं भारतस्य प्रमुखभाषासु सामान्यरूपेण उच्यमानाः शब्दाः

एवं तत्रत्यसाहित्यस्य किञ्चित् परिचयं वक्तुं शक्नुयुः ( अवश्यकतानुसारम् अनुवादमाध्यमेन)। एतादृशगतिविधिना भारतस्य एकतायाः सुन्दरसांस्कृतिकपरम्परायाः विविधतायाः च परिचयं प्राप्नुयुः। स्वजीवने भारतस्य अन्यभागस्य जनैः सह यदा मेलनं भवति तदा सहजतानुभूतिं प्राप्नुवन्ति । इयं परियोजना /गतिविधिः रुचिकरः आनन्ददायी गतिविधिः भवति अपि च तत्र केनापि रूपेण मूल्याङ्कनस्य अन्तर्भावो न भवति ।

4.17 भारतस्य शास्त्रीयभाषाणां साहित्यस्य महत्त्वं प्रासङ्गिकतां सौन्दर्यं च कदापि हेयदृष्ट्या वीक्षितुं न शक्यते । संस्कृतं संविधानस्य अष्टमानुसूच्यां वर्णिता महत्त्वपूर्णा आधुनिकभाषा विद्यते । अस्याः साहित्यम् एतादृशं विशालं विद्यते लैटिन-ग्रीक-साहित्यं मेलयित्वा तुलना क्रियते चेदपि समनता न भवति । संस्कृतसाहित्ये गणितम् , दर्शनम्, व्याकरणम्, संगीतम्, राजनीतिः, चिकित्सा, वास्तुकला, धातुविज्ञानम्, नाटकम्, कविता, कथाः, (यस्य संस्कृतज्ञानप्रणाल्यां परिगणना भवति) इत्यादिविषयाणां विशालभाण्डागारो विद्यते । एतेषां साहित्यानां लेखनं भिन्नधार्मिकजनैः सह धार्मिकेतरजनैः सामाजिकार्थिकपृष्टभूमिवर्गीयजनैः अपि सहस्रवर्षेभ्यः लिखितं विद्यते । अनया रीत्या संस्कृतं त्रिभाषासूत्रस्य मुख्याधारविकल्पेन सह विद्यालयेषु उच्चतरशिक्षायाः सर्वेषु स्तरेषु छात्राणां कृते महत्त्वपूर्णेन समृद्धेन विकल्पेन सह प्रदीयते । संस्कृतं रोचकतया अनुभवात्मकेन सह समकालिकप्रासङ्गिकानुगुणं यत्र संस्कृतज्ञानप्रणाल्याः अन्तर्भावः स्यात् विशेषरूपेण ध्वनिमाध्यमेन उच्चारणमाध्यमेन च पाठ्यते । प्राथमिकस्तरस्य माध्यमिकस्तरस्य च संस्कृतपाठ्यपुस्तकानि संस्कृतेन संस्कृतपाठनं (एसटीएस) एवं तदध्ययनम् आनन्ददायकं कर्तुं सरलमानकसंस्कृतेन (एसएसएस) लेखितुं शक्यते ।

4.18 भारतस्य शास्त्रीयाभिः तमिल – तेलुगु- कन्नड- मलयालम-ओडियाभाषाभिः सह अन्यशास्त्रीयभाषासु अत्यन्तं समृद्धं साहित्यं विद्यते शास्त्रीयभाषाभिः सह पालि-फारसि-प्राकृतभाषाणां तत्साहित्यानां च समृद्धये भाविनागरिकाणां सुखसमृध्यर्थं संरक्षणं कुर्यात् । यदा भारतं पूर्णतया विकसितदेशो भवति तदा भाविनागरिकाः भारतस्य सुन्दरशास्त्रीयसाहित्याध्ययने भागं गृहीत्वा सृंमृद्धिं कर्तुम् इच्छेयुः । संस्कृतेन सह भारतस्य तमिल- तेलुगु-कन्नड- मलयालम-ओडिया- पालि- फारसी प्राकृतमित्यादिभाषाःएवं अन्यशास्त्रीयभाषाः साहित्यं च विद्यालयेषु व्यापकरूपेण छात्राणां कृते वैकल्पिकरूपेण संभवतः आनलाईन मानकरूपेण अनुभवात्मकतया अभिनवसन्निवेशेन च सह उपलभ्यते येन इदं निश्चितं स्यात् एताः भाषाः साहित्यं च जीवितं स्यात् ।समृद्धस्य मौखिकलैखिकसाहित्ययुक्तनां सांस्कृतिकपरम्परायुक्तानां ज्ञानसमृद्धयुतानां च अनयभारतीयभाषाणां कृते अपि एतादृशः प्रयासः क्रियते ।

4.19 देशस्य बालानां संवर्धनार्थं समृद्धभाषाणां कलानां च संरक्षणार्थं सर्वकार-सर्वकारेतर-विद्यालयेषु विद्यार्थिनां कृते भारतस्य शास्त्रीयभाषाणां तत्साहित्यस्य च न्यूनातिन्यूनं वर्षद्वयम् अध्येतुं विकल्पः भवेत् ।अनुभवात्मकनवीनविधानेन तन्त्रज्ञानस्य समेकीकरणेन सह 6 तः12स्तरं यावत् विद्यार्थिनः पठितुं शक्नुयुः।माध्यमिकस्तरतः द्वितीयस्तरं यावत् एवम् अग्रेपि तदध्येतुं विकल्पः तेषां सविधे भवति ।

4.20 भारतीयभाषासु आङ्ग्लभाषायां च गुणवत्तापाठ्यक्रमेण सह कोरिईया, जापानी, थाई,फ्रेंच, जर्मन्, स्पेनिश,पुर्तगाली, रूस इत्यादिभाषाः अपि माध्यमिकस्तरेषु अध्येतुम् उपलब्धिः कार्यते येन विद्यार्थिनः विश्वसंस्कृतिं जानीयुः तथा स्वरुच्यनुगुणम् आकाङ्क्षानुगुणं च स्वजागतिकज्ञानम् उत्कृष्टतां विधातुम् अवसरः लभ्यते ।

4.21 सर्वभाषाणां शिक्षणं नवीनाभुवत्मकविधिना समृद्धिः कार्यते तत्र सरलीकरणेन एप्समाध्यमेन च भाषाणां सांस्कृतिकदृष्ट्या यथा चलनचित्रम्, रङ्गमञ्चः,कथावाचनम्, काव्यम्, संगीतम् इत्यादिविषयान् संयोज्य विभिन्नप्रासंङ्गिकविषयैः सह वास्तविकजीवनानुभवानां संबन्धस्य महत्त्वं दर्शयन् तेषां पाठनं भवति । अनया रीत्या भाषाणां शिक्षणमपि अनुभवात्मकम् अधिगमात्मकम्, शिक्षणशास्त्राधारितं च भवति ।

4.22 श्रवणदोषयुक्तानां छात्राणां कृते भारतीयसंकेतभाषायाः(आईएसएल) इत्यस्य आदर्शीकृत्य राष्ट्रियराज्यपाठ्यक्रमाणां विकासः क्रियते । यत्र अपेक्षा प्रासङ्गिकश्च विद्यते तत्र स्थानीयसाङ्केतिकभाषाणां सम्मनः क्रियते एवं तासां शिक्षणमपि भवति ।

**अनिवार्यविषयाः, कौशलानि,समर्थपाठ्यक्रमाणां समेकीकरणं च**

4.23 विद्यार्थिनां कृते स्वपाठ्यक्रमचयने पाठ्यक्रमाः अधिकनम्यतायुक्ताः भवेयुः किन्तु अधुना परिवर्तिनि विश्वे विद्यार्थिनः उत्तमाः यशस्विनः, सफलाः, ग्रहणात्मकाः, उत्पादकशीलश्च भवितुं केषुचित् विषयेषु कौशलस्य क्षमतायाश्च अर्जनं महत्त्वपूर्णं विद्यते। भाषायां प्रावीण्येन सह वैज्ञानिकं साक्षाधारितं चिन्तनं, रचनात्मकं नावीन्यं , सौन्दर्यशास्त्रस्य कलायाः भावना, मौखिकलैखिकाभिव्यक्तिः संवादश्च, स्वास्थ्यं पोषणं च शारीरिकशिक्षा, दैहिकसामर्थ्यम्, स्वास्थ्यं क्रीडा च , सहयोगः सामूहिककार्यम्, समस्यायाः समाधानं तार्किकं चिन्तनं, व्यावसायिकमान्यता कौशलं च, तन्त्रज्ञानसाक्षरता,गणकीकरणं संगणकीयचिन्तनं, नैतिकता, नैतिकतार्किकक्रिया,मानवसंविधानमूल्यानां ज्ञानम् अभ्यासश्च, लिंगसंवेदनाशीलता, मौलिककर्तव्यम्, नगरिकता कौशलं मूल्यं च , भारतस्य ज्ञानम्, पर्यावरणसम्बद्धजागरूकता, तत्र जलस्य संसाधनस्य संरक्षणम्, स्वच्छता इत्यादीनां कौशलानामपि अन्तर्भावः विद्यते । एभिः सह समसामयिकसमस्यासु स्थानीयसमुदायेषु राज्येषु देशेषु विश्वे च संमूखीनानां महत्त्वपूर्णविषयाणां ज्ञानमपि अन्तर्भवति ।

4.24 कृत्रिमबुद्धिमत्ता, प्ररचनालोचनम्, साकल्यारोग्यम्, क्षेत्रीयजीवनम्, पर्यावरणशिक्षा, वैश्विकनागरिकशिक्षा (जीसीईडी) इत्यादीनां समकालिकविषयाणां प्रारम्भेण सह सर्वेषु स्तरेषु छात्रेषु विभिन्नमहत्त्वपूर्णकौशलानां विकासाय संयोजितपाठ्यक्रमस्य उपक्रमस्य च अभिवृद्धिः क्रियते ।

4.25 इदं विज्ञायते यत् गणितस्य तच्चिन्तनं कृत्रिमबुद्धिमत्ता, यान्त्रिकाध्ययनम्, दत्तांशविज्ञानम्, इत्यादियुक्तेषु क्षेत्रेषु वृत्तिषु च भारतस्य भविष्यं तथा एतेषु भारतस्य नेतृत्वभूमिकायाः कृते महत्त्वपूर्णं विद्यते । अनया रीत्या गणितस्य संगणकीयचिन्तनस्य च अभिनवरीत्या प्राथमिकस्तरे आरम्भं कृत्वा विद्यालयस्य पूर्णावधौ गणनाचिन्तनम् आकर्षकम् आनन्ददायकं च विधातुं पदबन्धः इत्यादीन् अन्तर्भाव्य तेन माध्यमेन पाठनार्थम् अधिकं बलं प्रदीयते । माध्यमिकस्तरे कूटसंकेतसम्बन्धिगतिविधीनां प्रारम्भः क्रियते ।

4.26 प्रत्येकं विद्यार्थी षष्ठस्तरात् अष्टमस्तरस्य अन्तरालं राज्यैः स्थानीयसमुदायैः निश्चितं स्थानीयकुशलावश्यकतानुसारं मापितम् आनन्ददायकं पाठ्यक्रमम् अधीते। एतदन्तर्गतं,तक्षककार्यम्, लौहिककार्यम्, विद्युत्सम्बन्धिकार्यम्, सस्यपालनम्, मृत्तिकया पात्रनिर्माणम्, इत्यादिसामान्यानि व्यावसायिकानि कार्याणि कार्यन्ते एतत् कार्यकरणानुभवं प्रददाति । 6तः 8 स्तरस्य कृते अभ्यासाधारितपाठ्यक्रमस्य एनसीएफएसई 2020-21 इत्यस्य निर्माणकाले एनसीईआरटी इत्यनया यथोचितं रूपरेखा निर्मास्यते । 6 तः8स्तरस्य अन्तराले अध्ययनकाले सर्वे विद्यार्थिनः दशदिनानां पाठ्यपुस्तकरहितकक्षायां भागं गृह्णन्ति तत्र ते स्थानीयव्यवसायिकविशेषज्ञैः तक्षककलानिपुणाः, वाटिकापालकाः कुम्भकाराः, कलाकाराः इत्यादिभिः सह प्रशिक्षुरूपेण कार्यं कुर्वन्ति । एतादृशरीत्यैव विरामदिनेषु 6तः 8स्तरं यावत् विभिन्नव्यवसायिकविषयं ज्ञातुम् अवसरः प्रकल्प्यते । आनलाईन-माध्यमेनापि व्यावसायिकपाठ्यक्रमस्य उपलब्धिं कारयितुं शक्यते । आवर्षं एतादृशस्य पाठ्यपुस्तकरहितेषु दिनेषु विभिन्नप्रकारकाणां कला-प्रश्नमञ्च-क्रीडा-व्यावसायिकहस्तकलानां प्रोत्साहनं क्रियते । ऐतिहासिकस्य सांस्कृतिकपर्यटनमहत्त्वस्थानस्य/स्मारकस्य सन्दर्शनं तथा स्थानीयकलाकारैः शिल्पकारैः च सह मेलनम् एवं ग्रामे/तेहसिल/जिला/राज्येषु उच्चतरशैक्षणिकसंस्थानां सन्दर्शनेन च छात्राणां कृते बाह्यगतिविध्यर्थम् अवसरः लभ्यते ।

4.27 भारतस्य ज्ञाने आधुनिकभारतस्य तत्साफल्यस्य प्रत्याह्वानस्य च कृते प्राचीनभारतस्य ज्ञानस्य योगदानस्य च अन्तर्भावः भवति ।तथा शिक्षा, स्वास्थ्यं, पर्यावरणम्, इत्यादिषु भाविभारतस्य आकाङ्क्षाणां समन्वयःअवश्यं भवति । एतदंशानां विद्यालयपाठ्यक्रमेषु अपेक्षानुगुणं वैज्ञानिकरीत्या समुचितपद्धत्या अन्तर्भावः क्रियते।आदिवासिज्ञानपरम्परया पारम्परिकविधानेन च सह भारतीयज्ञानप्रणाली च तत्र संयोज्यते । एवं गणितम् खगोलविज्ञानम्, दर्शनम्, योगः, वास्तुकला,

चिकित्सा,कृषिः,अभियान्त्रिकम्, भाषाविज्ञानम्, साहित्यम्, क्रीडया सह शासनम्, राज्यव्यवस्था, संरक्षणम्, इत्यादिविषयाणाम् अन्तर्भावः क्रियते । आदिवासिजनजातीय-औषधपद्धतयः, वनप्रबन्धनम्, पारम्परिक(जैविकम्) कृषिपद्धतिः,प्राकृतिककृषिपद्धतिः, इत्यादिविशिष्टपाठ्यक्रमाणाम् उपलब्धिः कार्यते । भारतीयज्ञानप्रणाल्याः विषये आकर्षकपाठ्यक्रमः वैकल्पिकरूपेण माध्यमिकविद्यालयेषु छात्राणां कृते उपलब्धो भवति । विनोदयुक्तस्वदेशिक्रिडया विभिन्नविषयाणाम् अध्ययने विद्यालयेषु स्पर्धाः समायोज्यन्ते । पाठ्यक्रमसमये विज्ञानस्य तथा भारतस्य अन्यक्षेत्रस्य प्राचीनाधुनिकप्रेरकमहापुरुषाणां व्यक्तित्त्वं दृश्यरूपेण वृत्तचित्ररूपेण दर्शयिष्यते । ठात्राणां कृते सांस्कृतिकादानाप्रदानकार्यक्रमेषु भागग्रहणार्थं प्रोत्साहनं क्रियते ।

4.28 विद्यार्थिनां कृते न्यूनवयसि उचितस्य करणम् इत्यस्य महत्त्वम् अध्याप्यते तथा नैतिकनिर्णयस्य स्वीकारार्थं तार्किकमानकं प्रदीयते । अग्रिमेषु वर्षेषु तस्य मानकस्य वञ्चना,हिंसा,कृतिचौर्यम्, मालिन्यम्,सहिष्णुता, समानता, सहानुभूतिः,इत्यादिविषयैः सह विस्तारः क्रियते तत्र छात्राणां कृते स्वजीवनं संचालयितुं नैतिकमौल्यानां संयोजनार्थं नैकदृष्टिकोणैः सह नैतिकविषये चर्चा तथा निर्णयस्य स्वीकारार्थम् एवं सर्वेषु कार्येषु नैतिकाचरणस्य स्वयं सक्षमं कर्तुं बलं प्रदीयते । अनया रीत्या नैतिकावबोधाय पारम्परिकभारतीयमूल्यानां मूलभूतमानवीयसंवैधैनिकमूल्यानां च (यथा सेवा, अहिंसा, स्वच्छता, सत्यम्, निष्कामकर्म, शान्तिः, त्यागः,सहिष्णुता, विविधता, बहुत्ववादः, नैतिकाचरणम्, लैङ्गिकसंवेदनाशीलता, वृद्धानां कृते सम्मानम्, सर्वेषु जनेषु अन्तर्निहितक्षमतानां सम्मानम्, पर्यावरणं प्रति सम्मानम्, सहायः, शिष्टाचारः, धैर्यम्, क्षमा, समानुभूतिः,करुणा, देशभक्तिः, लोकतान्त्रिकदृष्टिकोणः, अखण्डता, दायित्वम्, न्यायः, स्वतन्त्रता, समानता, बन्धुत्वम् च) विद्यार्थिनां कृते विकासः क्रियते । बालानां कृते पञ्चतन्त्रकथानां, हितोपदेशस्य अन्यानन्दप्रदायककथानाम्, भारतीयपरम्पराप्रेरककथानां च पठनार्थं ज्ञानार्थं च अवसरः प्राप्यते एवं वैश्विकसाहित्ये तस्य साहित्यस्य प्रभावविषयमपि ज्ञास्यन्ति। भारतसंविधानस्य केचन अंशाः अपि सर्वच्छात्राणां कृते पाठ्यन्ते । स्वास्थ्यविषये मूलभूतप्रशिक्षणं तत्र निवारकस्वास्थ्यम्, मानसिकस्वास्थ्यम्, उचितपोषणम्, वैयक्तिकसार्वजनिकस्वच्छता, आपत्कालप्रतिक्रिया, प्राथमिकचिकित्सा च अन्तर्भूतं भवति । तथा मद्यपानस्य, तम्बाकूसेवनस्य, अन्यमादकपदार्थानां सेवनस्य हानिकारकप्रभावस्य विपरीतप्रभावस्य च वैज्ञानिकरूपेण व्याख्या च पाठ्यक्रमे आन्तर्भाव्यते ।

4.29 प्रारम्भिकस्तरतः आरभ्य दार्ढ्यसंपादनाय भारतीयसन्दर्भे स्थानीयदृष्ट्या च पाठ्यचर्यायाः शिक्षणशास्त्रस्य च पुनर्घटनं क्रियते । संस्कृतिः,परम्परा, पद्धतिः, भाषा, तत्त्वशास्त्रम्, भूगोलम्, प्रचीनसमकालिकज्ञानम्, सामाजिकवैज्ञानिकावश्यकताः, स्वदेशिपारम्परिकाध्ययनरीतिः, इत्यादि सर्वेविषयाः अन्तर्भवन्ति तेन शिक्षा यथासम्भवं

अस्माकं छात्राणां कृते अधिकापेक्षा प्रासङ्गिकी रोचकयुक्ता प्रभावपूर्णा च स्यात्। कथानां, कलानां, क्रीडानाम्, उदाहरणानाम्, समस्यानां च चयनं यथासम्भवं भारतस्य स्थानीयभौगोलिकाधारेण क्रियते। शिक्षायाः कृते एतादृशाधारस्य उपलब्धौ निश्चितरूपेण अमूर्तचिन्तनस्य नवीनविचारस्य रचनात्कतायाः च उत्फूल्लाय अवसरो लभ्यते।

**विद्यालयीयशिक्षार्थं राष्ट्रियपाठ्यचर्यारूपरेखा (एनसीएफएसई)**

4.30 विद्यालयीयशिक्षार्थं नूतयव्यापकराष्ट्रियपाठ्यचर्यारूपरेखा एनसीएफएसई 2020 - 21 एनसीईआरटी इत्यनेन राष्ट्रियशिक्षानीतेः 2020 सिद्धान्ताः अग्रणीपाठ्यचर्यायाः आवश्यकतायाः आधारेण राज्यसर्वकारैः,मन्त्रालयैः केन्द्रसर्वकारसंबद्धविभागैः अन्यविशेषज्ञसमितिसदस्यैः च सह परामर्शं विधाय आरच्यते एवं सर्वासु क्षेत्रीयभाषासु उपलब्धिः कार्यते । ततःपरम् एनसीएफएसई अभिलेखायाः प्रत्येकं 5 -10 वर्षेषु महत्त्वपूर्णपाठ्यचर्यां मनसि निधाय समीक्षा नवीरकरणं च क्रियते।

**स्थानीयविषयैः अभिरुचिभिः सह राष्ट्रियपाठ्यपुस्तकानि**

4.31 विद्यालययीयपाठ्यक्रमभारस्य न्यूनता अधिकनम्यता कण्ठस्थीकृत्य अध्ययनापेक्षया संरचनात्मकाध्ययनार्थम् अधिकबलप्रदानेन सह विद्यालयीयपाठ्यपुस्तकेषु परिवर्तनं च क्रियते । सर्वेषु पाठ्यपुस्तकेषु राष्ट्रियस्तरे महत्त्वपूर्णमूलसामग्रीणां ( चर्चया, विश्लेषणेन, उदाहरणेन, अनुप्रयोगेण सह ) समावेशः क्रियते अनेन सह स्थानीयापेक्षानुसारं सूक्ष्मपरिवर्तनेन सह अपेक्षितसामग्रीणां समावेशः भवेत् । अपेक्षानुगुणं नियोजितपाठ्यपुस्तकेषु अपि विद्यालयानां शिक्षकाणां च समीपे वैकल्पिकं भवति ।तेषां सविधे एतादृशपाठ्यपुस्तकानां अनेकं गुच्छं स्यात् तत्र अपेक्षितानां राष्ट्रियस्थानीयसामग्रीणाम् अन्तर्भावः स्यात् । ते विद्यार्थिनः स्वशिक्षणशास्त्रीयशैल्यनुगुणं छात्राणां समुदायस्य अपेक्षानुगुणं च पाठयितुं शक्नुयात् ।

4.32. छात्राणां शिक्षाव्यवस्थायाश्च कृते पाठ्यपुस्तकानां मूल्यभारं न्यूनीकर्तुं गुणवत्तायुक्तपाठ्यपुस्तकानां न्यूनमूल्येन उत्पादनानुगुणं/मुद्रणमूल्यानुगुणं प्रदानम् अस्य उद्देश्यं विद्यते । एससीईआरटी संयोजनेन सह एनसीईरटी इत्यनया निर्मितस्य उच्चतरपाठ्यपुस्तकसामग्रीणाम् उपयोगं कृत्वा आपूर्तिः कार्यते । अतिरिक्तपाठ्यपुस्तकसामाग्रीणां सार्वजनिकलोकोपकारिसहयोगेन समुदायसहयोगेन वित्तपोषणं भवति अपि च एतत् विशेषज्ञानां कृते उच्चतरगुणवत्तापूर्णपाठ्यपुस्तकानि क्रयमूल्यानुसारं लेखितुं प्रोत्साहनं क्रियते । राज्यानि स्वपाठ्यक्रमान् ( यथासंभवम् एनसीईआरटी इत्यनेन सज्जीकृतं एनसीईएफएसई आधारितं भवितुमर्हति ) निर्मातुं शक्नुवन्ति एवं पाठ्यपुस्तकानि ( यथासंभवम् एनसीईआरटी सामग्र्याधारितं भवितुमर्हति ) निर्मीयन्ते

तत्र स्थानीयविषयाणाम् अपेक्षानुगुणम् अन्तर्भावः क्रियते । निर्माणकाले इदं मनसि स्थापयेत् यत् एनसीईआरटी पाठ्यक्रमः राष्ट्रस्तरीयमापदण्डत्वेन स्विकृतिः स्यात् इति। सर्वासु क्षेत्रीयभाषासु एतदृशपाठ्यपुस्तकानाम् उपलब्धिः आद्यं स्यात् येन सर्वेषां छात्राणां कृते गुणवत्तापूर्णायाः शिक्षायाः उपलब्धिः भवेत् । विद्यालयेषु यथाकालं पाठ्यपुस्तकानाम् आपूर्तौ अधिकः प्रयासः क्रियते । पर्यावरणस्य संरक्षणार्थं व्यवस्थात्मकभारं न्यूनीकर्तुं च राज्यानि / केन्द्रशासितप्रदेशाः एनसीईआरटी च पाठ्यपुस्तकानाम् डाउनलोड एवं मुद्रणस्य व्यवस्थां कारयन्ति ।

4.33 पाठ्यक्रमे शिक्षणशास्त्रे च अपेक्षिकपरिवर्तनेन विद्यालयस्य स्यूतस्य पाठ्यपुस्तकानां च भारं न्यूनीकर्तुम् एनसीईआरटी, एससीईआरटी विद्यालयैः शिक्षकैः च अधिकप्रयासः क्रियते ।

**विद्यार्थिनां विकासार्थम् आकलनपद्धतौ आमूलाग्रं परिवर्तनम्**

4.34 अस्माकं विद्यालयीयशिक्षाप्रणाल्याम् आकलनस्य उद्देश्यं मुख्यरूपेण कण्ठस्थीकरणस्मरणकौशलस्य परीक्षणं विद्यते एतत् अपसार्य नियतरचनात्मकाकलनं प्रति आनयनं स्यात् एवम् तत् अधिकदक्षताधारितं भवेत् येन अस्माकं छात्रेषु ज्ञानसामर्थ्यं तस्य विकासम् उत्तेजयेत् । एवं तेषाम् उच्चस्तरीयदक्षतायाः तद्यथा विश्लेषणस्य, तार्किकचिन्तनस्य, अवधारणात्मकस्पष्टतायाः च परीक्षणं स्यात् । आकलनस्य आद्यम् उद्देश्यं मूलरूपेण ज्ञानार्थं स्यात् ,एतत् शिक्षकाणां विद्यार्थिनां विद्यालयशिक्षाप्रणाल्याः च कृते सहायं कुर्यात्। विद्यार्थिनां कृते अध्ययनार्थं विकासार्थं च सहायं कर्तुं शिक्षणस्य अध्ययनप्रक्रियायाः पुनः पुनः परिष्कारं कर्तुं सहायम् आचरेत् । एतदेव शिक्षणस्य सर्वेषां स्तराणां मूल्याङ्कनार्थं मूलसिद्धान्तो विद्यते ।

4.35 प्रस्तुतं राष्ट्रियाकलनकेन्द्रम् एनसीईआरटी,एससीईआरटी इत्यनयोः मार्गदर्शने राज्यैः/केन्द्रशासितप्रदेशैः विद्यार्थिनां कृते विद्यालयाधारिताकलनस्य आधारेण सज्जीक्रियमाणानां मातापित्रोः कृते प्रदीयमानानां प्रगतिपत्राणां पूर्णतया नवीनस्वरूपं प्रदीयते । एतत् प्रगतिपत्रं पूर्णस्वरूपयुक्तं बह्वायामि पत्रं भवति यत्र प्रत्येकं छात्रस्य संज्ञानात्मकस्य भावात्मकस्य मनोविज्ञानात्मकस्य च विकासस्य सूक्ष्मैक्षिकया विश्लेषितस्य विस्तृतविवरणेन सह विद्यार्थिनः वैशिष्ट्यं च समेकितं भवति । तत्र स्वमूल्याङ्कनम्, सहाध्यायिमूल्याङ्कनम्, परियोजनाकार्यं, अन्वेषणाधारिताध्ययने भागग्रहणम्, प्रश्नमञ्चः, पात्राभिनयः, समूहकार्यम्, संवहनात्मकं, शिक्षकाणां मूल्याङ्कनम् इत्यादीनि अन्तर्भवन्ति।इदं प्रगतिपत्रं गृहस्य विद्यालयस्य च मध्ये संबन्धं कल्पयति ।एतत् मातापित्रोः स्वसन्तानस्य समग्रशिक्षणे अभिवृद्धौ च सक्रियरूपेण भागग्रहणाय मातुः पितुः शिक्षकस्य च उपवेशनेन सह भवति । अनेन प्रगतिपत्रेण शिक्षकाणां मातापित्रोः च कृते स्वबालकस्य

महत्त्वपूर्णसूचनाः उपलभ्यन्ते येन कक्षासु कक्षातः बहिः विद्यार्थिनां कृते सहायं कर्तुं शक्येत । एआई आधारितसाफ्टेवेयर-इत्यस्य विकासः उपयोगश्च मातापित्रोः छात्रस्य शिक्षकाणां च कृते अध्ययनदत्तांशेन संवादात्मकपप्रश्नावल्याधारेण च शैक्षणिकवर्षे छात्रस्य विकासं परिशीलयितुं सहायम् कुर्यात् । तेन छात्रस्य कृते तस्य सामर्थ्यस्य, अभिरुचिक्षेत्रस्य, अवधानक्षेत्रस्य च मौलिकसूचनां प्रादातुं शक्येत येन तस्य कृते स्वाभीष्टक्षेत्रं चेतुम् अवसरः लभ्यते ।

4.36 बोर्डपरीक्षायाः प्रवेशपरीक्षया सह माध्यमिकविद्यालयपरीक्षायाः च अद्यतनस्वरूपं तथा अद्यतन कोचिंगसंस्कृतिश्च विशेषतया माध्यमिकस्तरे अधिकक्षतिं प्रददाति । अनेन विद्यार्थी स्वामूल्यसमयं सार्थकाधिगमस्यापेक्षया परीक्षायाः सिद्धतायै परीक्षाप्रशिक्षणार्थं व्ययीकुर्वन् अस्ति । एताः परीक्षाः विद्यार्थिनां कृते चयनविकल्पेषु आनम्यतायाः यत् भविष्ये व्यक्तिकेन्द्रितशिक्षाप्रणाल्याः कृते योगदानप्रदानस्य अपेक्षया कस्याञ्चित् धारायां संकुचितमनोभावनाम् उत्पादयितुं प्रेरयत्यः सन्ति ।

4.37 यद्यपि 10स्तरे 12स्तरे च बोर्डपरीक्षा यथावत् भवति किन्तु प्रशिक्षणव्यवस्थां समाप्तिं कर्तुं बोर्ड एवं प्रवेशपरीक्षायाः प्रणाल्याः परिवर्तनं क्रियते । अधुना मूल्याङ्कनप्रणाल्याः हानिकारकप्रभावं सम्मुखीकर्तुं बोर्डपरीक्षायाः प्रोत्साहनार्थं पुनर्विन्यासः क्रियते । छात्राः बोर्डपरीक्षां प्रदातुं स्वरुच्यनुगुणं विद्यमानेषु विषयेषु कस्यपि विषयस्य चयनं कर्तुं शक्नुवन्ति । बोर्डपरीक्षाः अपि सुलभीक्रियन्ते येन प्रशिक्षणस्य कण्ठस्थीकरणस्य च अपेक्षया मुख्यरूपेण क्षमतायाः/योग्यतायाः एव आकलनं भवेत् ।यः कोपि छात्रः विद्यालयं प्रति गत्वा मूलभूतप्रयासं करोति चेत् सः अतिरिक्तप्रयासं विना बोर्डपरीक्षायाम् उत्तीर्णो भवति एवम् उत्तमप्रदर्शनं कर्तुं प्रभवति । बोर्डपरीक्षायाः अधिककीलकं समापयितुं सर्वेषां छात्राणां कृते कस्मिन्नपि विद्यालये शैक्षणिकवर्षे द्विवारं बोर्डपरीक्षां प्रदातुम् अनुमतिः प्रदीयते तत्र एका मुख्यपरीक्षा अपरा अपेक्षानुगुणं श्रेण्यभिवृद्धये च भवति।

4.38 अधिकनम्यता, विद्यार्थिनां कृते विषयचयने विकल्पः, सर्वोत्तमप्रयासद्वययुक्तम् आकलनं यत् मुख्यरूपेण क्षमतायाः परीक्षणं करोति तत् सर्वासु बोर्डपरीक्षासु मुख्यपरिवर्तनम् अचिरात् स्यात् । एवं बोर्डपरीक्षाणां कृते अन्यसमुचितमानकानि निर्मातुं शक्नोति येन प्रशिक्षणसंस्कृतेः परीक्षाभारस्य च न्यूनीकरणं स्यात् । काश्चन संभावनाः अत्र अन्तर्भवितुम् अर्हन्ति वार्षिक/सत्रार्ध/मानक-बोर्डपरीक्षाणां काचित् प्रणाली विकसिता स्यात् तत्र न्यूनसामग्र्या विद्यालयेषु सम्बद्धपाठ्यक्रमस्य स्वीकृतेः परं प्रत्येकं परीक्षायाः स्वीकृतिः स्यात् येन माध्यमिकविद्यालयेषु परीक्षाभारस्य विभजनं न्यूनता च स्यात् । गणितविषयादारभ्य सर्वेषां विषयाणाम् आकलनं स्तरद्वये उपलब्धिः कार्यते कानिचन

कक्षास्तरे कानिचन उच्चस्तरे च । केषुचित् विषयेषु बोर्डपरीक्षा भागद्वये भवितुं शक्यते प्रथमभागे बहुवैकल्पिकप्रश्नाः द्वितीयभागे वर्णनात्मकप्रश्नाः भवितुम् अर्हन्ति ।

4.39 उपर्युक्तस्य विषये एनसीईआरटी बोर्ड आफ असेसमेन्ट(बीओए) स्थापनार्थम् उद्दिष्टं राष्ट्रियाकलनकेन्द्रम् (एनएसीएसई) इत्यादिभिः शिक्षकैः च सह परामर्शं कृत्वा मार्गदर्शी निर्मीयते येन 2020-23 शैक्षणिकसत्रं यावत् एनसीएफ 2020-21इत्यस्य अनुरूपम् आकलनप्रणाल्याः परिवर्तनं स्यात् ।

4.40 न केवलं 10स्तरस्य अन्ते 12स्तरस्य अन्ते च छात्रप्रगतिम् अन्वेष्टुं किन्तु विद्यालयस्य संपूर्णशैक्षणिकवर्षे छात्रस्य मातापित्रोः, शिक्षकाणां, प्राचार्याणां विद्यालयव्यवस्थायाः च कृते लाभाय एवं संपूर्णशिक्षाप्रणाल्याः शिक्षणाधिगमप्रक्रियायाः च अभिवृद्धये सर्वेषां विद्यार्थिनां कृते उपयुक्तप्राधिकरणेन 3स्तरे 5स्तरे 8स्तरे च परीक्षा संचाल्यते । इयं परीक्षा कण्ठस्थीकृत्य स्मरणापेक्षया प्रासङ्गिकोच्चतरकौशलानि नैजजीवस्थितिं च विज्ञातुम् एवं ज्ञानस्य अनुप्रयोगेण सह राष्ट्रियस्थानीयमूलावधारणेन ज्ञानमूल्याङ्कनेन चल मूलभूतशिक्षणपरिणामस्य परीक्षणं करोति । विशेषरूपेण तृतीयस्तरस्य परीक्षा मूलभूतसाक्षरता, संख्याज्ञानम्, अन्यमूलभूतकौशलम् इत्यस्य परीक्षणं करोति । विद्यालयीयपरीक्षापरिणामस्य उपयोगः केवलं विद्यालयीयशिक्षाप्रणाल्याः विकासार्थं क्रियते। तत्र विद्यालयेन छात्रस्य परिणामस्य (विना छात्रस्य नाम) उद्घोषणा तथा विद्यालयप्रणाल्याः सततावेक्षणम् अभिवृद्धिश्च अन्तर्भूतम् अस्ति ।

4.41शिक्षामन्त्रालयस्य अन्तर्गतं मानकनिर्धारकसंकायरूपेण राष्ट्रियमूल्याङ्कनकेन्द्रम् परख (समग्रविकासार्थं ज्ञानस्य मूल्याङ्कनम्, समीक्षा विश्लेषणं च ) स्थापयितुं प्रस्तावः विद्यते । एतत् भारते मान्यताप्राप्तविद्यालयबोर्ड इत्यस्य कृते विद्यार्थिनाम् आकलनार्थं मूल्याङ्कनार्थं च मापदण्डं मानकं मार्गनिर्देशिकां च निर्मातुं मूलोद्देशस्य आपूर्तिं करोति । तेन सह राज्योपलब्धिसर्वेक्षणम् (स्टेट अचीवमेंट सर्वे) (एसएसएस) इत्यस्य मार्गदर्शनं तथा राज्योपलब्धिसर्वेक्षणम् (स्टेट अचीवमेंट सर्वे) (एसएसएस)इत्यस्यापि संचालनं करोति । अनेन सह देशे अध्ययनपरिणामस्य सर्वेक्षणमपि करोति । अस्यां नीतौ घोषितोद्देश्यस्यानुरूपम् एकविंशतिशताब्देः कौशलावश्यकतायाः आपूर्तये मूल्याङ्कनप्रणाल्याः परिवर्तनार्थं विद्यालयबोर्ड इत्यस्य कृते सहायताचरणम् अस्य उद्देश्यं विद्यते । इदं केन्द्रं मूल्याङ्कनप्रणाल्याः नवीनशोधस्य च विषये विद्यालयबोर्ड इत्यस्य कृते सहायम् आचरति तथा विद्यालयस्य बोर्ड मध्ये सामरस्यं वर्धयति । सर्वेषां विद्यालयानां बोर्ड मध्ये उत्तमाभ्यासं वितरितुं शैक्षणिकमानकानां निश्चयार्थं विद्यालयबोर्ड इत्यस्य कृते साधनं भवति ।

4.42 विश्वविद्यालयप्रवेशपरीक्षार्थं सिद्धान्ताः समानाः भवन्ति राष्ट्रियपरीक्षणप्राधिकारः (एनटीए) गुणवत्तासामान्ययोग्यतापरीक्षां तथा विज्ञाने मानवीयमौल्यविषये, भाषायाम्, कलायाम्, व्यावसायिकविषये च प्रतिवर्षं न्यूनातिन्यूनं द्विवारं विशिष्टसामान्यविषयपरीक्षां च आयोजयति । आसु परीक्षासु अवधारणात्मकचिन्तनस्य ज्ञानान्वितक्षमातायाः च परीक्षणं भवति एतासां परीक्षाणां कृते प्रशिक्षणस्य आवश्यकतां समापयितुम् अधिकं बलं प्रदीयते । विद्यार्थिनः स्वाभिरुच्यनुगुणं विषयं चेतुं शक्नुवन्ति । प्रतिविश्वविद्यालयं प्रतिविद्यार्थि व्यक्तिगतविषयं स्वाभिनिवेशं च द्रष्टुं शक्नुवन्ति तथा विद्यार्थी स्वाभिरुच्यनुगुणं प्रतिभानुसारं स्वाभीष्टपाठ्यक्रमे प्रवेशं स्वीकर्तुं शक्नुवन्ति । एनटीए उच्चतरशिक्षासंस्थायाः स्नातककक्षासु स्नातकोत्तरकक्षासु च प्रवेशार्थं विद्यार्थिवेतनं च प्रदातुं प्रवेशपरीक्षायाः आयोजनार्थं प्रमुखविशेषज्ञस्वायत्तापरीक्षणसंघटनरूपेण कार्यं करोति । एनटीए परीक्षणं सेवायोग्यं गुणवत्तापूर्णं श्रेण्यनुगुणम् आनम्ययुक्तं स्यात् तेन नैके विश्वविद्यालयाः सामान्यप्रवेशपरीक्षायाः उपयोक्तुं सक्षमाः भवन्ति तेन प्रतिविश्वविद्यालयं पृथग्रूपेण स्वस्वपरीक्षायाः आयोजने तथा संपूर्णशिक्षाव्यवस्थायाः च भारं न्यूनीकरिष्यते । एनटीए इत्यस्य पर्वेशपरीक्षास्वीकार्यः उत नेति निर्णयः विश्वविद्यालयस्य महाविद्यालयस्य च अधीनः भवति ।

**प्रतिभावतां मेधावतां विद्यार्थिनां कृते सहायः**

4.43 प्रत्येकं विद्यार्थिषु जन्मजाता काचित् प्रतिभा भवति । तां प्रतिभां जानियात् पोषणं प्रोत्साहनं विकासं च कुर्यात् । तासां प्रतिभानां भिन्नरूच्यनुगुणं संरचनया क्षमतया च अभिव्यक्तिं कर्तुं शक्नोति । यः छात्रः स्वाभीष्टक्षेत्रे विशेषाभिरुचिं क्षमतां च प्रकटयति तं विद्यालयीयपाठ्यक्रमम् अतिरिच्य तस्मिन् क्षेत्रे अग्रे सर्तुं प्रोत्साहयेत् । शिक्षकशिक्षायां विद्यार्थिनां प्रतिभायाः अभिरुच्याः च अभिज्ञानस्य तत्प्रोत्साहनस्य च विधानम् अन्तर्भवति । एनसीईआरटी, एससीआरटी प्रतिभवतां छात्राणां शिक्षायाः कृते मार्गनिर्देशस्य विकासं करोति ।बी.एड पाठ्यक्रमेषु प्रतिभावतां छात्राणां प्रशिक्षणार्थं विशेषज्ञस्य नियुक्तिः क्रियते ।

4.44 शिक्षकाः कक्षासु एकस्मिन् विषये अभिरुच्युक्तानां प्रतिभावतां छात्राणां कृते तत्पूरकसंवर्धनसामग्रीणाम् उपलब्धिं कारयित्वा प्रतिभायाः प्रोत्साहनं कुर्युः । विषयकेन्द्रितस्य, परियोजनाधारितसमुदायस्य, वलयस्य, विद्यालयसंकीर्णस्य,च जनपदस्तरे तदग्रिमस्तरे च प्रोत्साहनं समर्थनं च क्रियते । विज्ञानवलयम्,गणितवलयम्, संगीतनृत्यप्रदर्शनवलयम्, चदुरङ्गवलयम्, कवितावाचनवलयम्, भाषावलयम्, नाटकवलयम्, चर्चावलयम्, क्रीडावलयम्, परिसरस्नेहिवलयम्,स्वास्थ्यकल्याणवलयम्, योगवलयम् इत्यादीनि कानिचन उदाहरणानि सन्ति । अस्मिन् उपक्रमे विभिन्नविषयेषु माध्यमिकविद्यालयस्य छात्राणां कृते गुणवत्तापूर्णः राष्ट्रियावासीयग्रीष्मकालिककार्यक्रमः

प्रोत्साहितो भवति । तत्र देशस्य सामाचिकार्थिकरूपेण वञ्चितसमूहस्य छात्रैः शिक्षकैः सह योग्यच्छात्राः शिक्षकाः भागं ग्रहीष्यन्ति । कार्यक्रमस्य गुणवत्तां वर्धयितुम् आकर्षयितुं च अर्हताधारिता समानप्रवेशप्रक्रिया भवति ।

4.45 आदेशं विभिन्नविषयेषु ओलंपियाड स्पर्धाः समायोज्यन्ते । तत्र विद्यालयाद् आरभ्य स्थानीयस्तरे राष्ट्रियस्तरे च अपेक्षितसमन्वयेन इदं निश्चीयते यत् सर्वे छात्राः सर्वेषु स्तरेषु समुत्तीर्य तत्र भागं गृहीतुं शक्नुयात् इति । तत्र आधिक्येन भागग्रहणाय ग्रामीणक्षेत्रे क्षेत्रीयभाषासु ओलंपियाड उपलब्धिं कारयितुं प्रयासः क्रियते । आईआईटी, एनआईटी सदृश्यः प्रमुखसंस्थाः तथा सार्वजनिकविश्वविद्यालयाः सर्वकारेतरविश्वविद्यालयाः च स्वावरस्नातकप्रवेशप्रक्रियायाः मापदण्डत्वेन राष्ट्रियान्ताराष्ट्रिय- ओलम्पियाडपरिणामोपि स्वीकर्तुं प्रोत्साह्यन्ते ।

4.46 इन्टरनेट सह योजितानि स्मार्टफोन अथवा टैबलेट सर्वेषु गृहेषु /विद्यालयेषु यदा उपलभ्यन्ते तदा प्रश्नमञ्चः,स्पर्धाः, आकलनम्, संवर्धनसामग्रीयुत-आनलाईन-एप इत्यादीनाम् अभिवृद्धिः क्रियते । उपर्युक्तोपक्रमं समृद्धतां विधातुं कार्यं क्रियते यथा मातापित्रोः शिक्षकाणां च निरीक्षणे समूहगतिविधिश्च कार्यते । विद्यालयान् यथाक्रमं स्मार्टकक्षारूपेण परिवर्तनं क्रियते येन डिजिटलशिक्षणशास्त्रस्योपयोगः स्यात् । अनेन माध्यमेन आनलाईन-संसाधनैः सह अध्ययनाध्यापनप्रक्रिया समृद्धा भवेत् ।

## 5. शिक्षकः

5.1 वास्तवरूपेण शिक्षकाः एव बालकानां भविष्यं निरूपयन्ति ।अतः ते अस्माकं राष्ट्रस्य भविष्यमपि निर्मान्ति । अतः एतेषाम् उदात्तयोगदानस्य कारणेनैव भारतस्य समाजे शिक्षकाः अधिकसम्मानितसदस्याः सन्ति । अतः सर्वोत्तमः विद्वान् एव शिक्षकः भवितुम् अर्हति । विद्यार्थिनां कृते ज्ञानस्य कौशल्यस्य नैतिकमौल्यस्य च सर्वोत्तमतया संक्रमणार्थं समाजः शिक्षकाणां कृते गुरूणां कृते अपेक्षितानि सर्वाणि संसाधनानि प्रददाति । अध्यापकाशिक्षायाः गुणवत्ता, वृत्तिः, पदानि, सेवानियमाः, शिक्षकाणाम् आधिकारिकी स्थितिः च यथा स्यात् तथा नास्ति । तेन शिक्षकाः गुणवत्ताम् अपेक्षितमापदण्डं च प्राप्तुम् असफलाः संजाताः सन्ति । शिक्षणव्यवसाये उत्तमजनानां प्रवेशार्थं प्रेरयितुं शिक्षकाणां कृते सम्मानादरभावं पुनरुज्जीवयेत् ।अस्माकं बालकानां देशस्य च कृते उत्तमभविष्यं विनिश्चेतुं शिक्षकाणां कृते प्रेरणा सबवीकरणं च अपेक्षितम् अस्ति ।

### प्रवेशः पदस्थापनञ्च

5.2 उत्कृष्टाः विद्यार्थिनः एव विशेषतः ग्रामीणक्षेत्रतः शिक्षणव्यवसाये प्रवेशं प्राप्नुयुः इति सुनिश्चयाय एका उत्कृष्टा एकीकृतचतुर्वर्षीये बी.एड् कार्यक्रमे अध्ययनार्थं समुचितसंख्यायाम्

योग्यतानुगुणं छात्रवृत्तिः सम्पूर्णे देशे स्थापयिष्यते ।ग्रामीणक्षेत्रे विशेषयोग्यतानुगुणं कतिपया छात्रवृत्तिः स्थापयिष्यते येन चतुर्वर्षीय बी. एड् उपाधिं प्राप्य स्थानीयक्षेत्रेषु निश्चितरूपेण आजीविकाप्राप्तिर्भवेत् । एवम्भूता छात्रवृत्तिः स्थानीयविद्यार्थिभ्यः विशेषतः छात्राभ्यः स्थानीय-आजीविकायाः अवसरं प्रदास्यति ।येन एते विद्यार्थिनः आदर्शव्यक्तिरूपेण(रोल माडल) उच्चतरयोग्यशिक्षकरूपेण च स्थानीयभाषायाम् कार्यं कर्तुं शक्नुयुः । उत्कृष्टशिक्षकेभ्यः ग्रामीणक्षेत्रेषु शिक्षणकार्यार्थं प्रोत्साहनं प्रदास्यते । विशेषतः यत्र शिक्षकाणां न्यूनता विद्येत , उत्कृष्टशिक्षकाणाम् आवश्यकता च विद्येत । ग्रामीणविद्यालयेषु पाठनार्थं प्रमुखं प्रोत्साहनं विद्यालयपरिसरे अथवा सामीप्ये स्थानीयावासव्यवस्थाप्रदानं भविष्यति । अथवा ग्रामीणक्षेत्रेषु निवासाय आवासव्यये वृद्धिः भविष्यति ।

5.3 शिक्षकसमाजयोर्मध्ये सम्बन्धस्थापनं भवेत् तथा स्वसमाजेन सह आत्मीयता स्यात् येन विद्यार्थिभ्यः आदर्शव्यक्तित्वस्य शैक्षिकवातावरणस्य च प्राप्तिर्भवेत्। तदर्थं अत्यधिकशिक्षकस्थानान्तरणस्य हानिकारकप्रक्रियायाम् प्रतिबन्धो भविष्यति ।राज्य-केन्द्रशासितप्रदेशसर्वकारेण यथानियमं स्थानान्तरणं विशषपरिस्थितौ एव करिष्यते। तथा च अस्मिन्कर्मणि पारदर्शितासंपादनार्थम् सद्यस्कव्यवस्थया एव स्थानान्तरणं भविष्यति ।

5.4 शिक्षकपात्रतापरीक्षा (टीईटी ) सामग्रीमध्ये तथा शिक्षाशास्त्रे परीक्षणसामग्रीविकासार्थं प्रयासो भविष्यति ।विद्यालयशिक्षायाः सर्वेषु स्तरेषु ( मूलाधारः, प्रारम्भिकम्, मध्यमम्, माध्यमिकम्) शिक्षकैः सह शिक्षकपात्रतापरीक्षायाः अपि विस्तरणं भविष्यति । विषय-शिक्षकाणां नियुक्तिप्रक्रियायां सम्बद्धविषयेषु -टीईटी परीक्षायाम् अथवा एनटीएपरीक्षायां प्राप्ताङ्कानामपि योजनं भविष्यति ।शिक्षणं प्रति उत्साहपरीक्षणार्थं शिक्षकनियुक्तिप्रक्रियायाः साक्षात्कारः अथवा विद्यालये पाठनप्रदर्शनम् अभिन्नमङ्गं भविष्यति । एतेषां साक्षात्काराणामुपयोगः स्थानीयभाषायां शिक्षणे नैजतायाः तथा दक्षतायाः आकलनकरणार्थं भविष्यति । येन प्रत्येकं विद्यालये अथवा विद्यालयसंकुलमध्ये केचन अध्यापकाः तादृशाः अपि भवेयुः ये स्थानीयभाषायां तथा छात्राणां व्यवहारभाषायां वार्तालापं कर्तुं जानीयुः।असर्वकारीयविद्यालयेष्वपि शिक्षकाणां योग्यता सर्वकारीयविद्यालयवद् भवेत् । तत्रापि नियुक्तिप्रक्रियायां शिक्षकपात्रतापरीक्षा , विद्यालये पाठनप्रदर्शनं च अवश्यं भविष्यतः ।

5.5 विषयेषु अध्यापकानां पर्याप्तसंख्यासुनिश्चयाय विशेषतः कला, शारीरिकशिक्षा, व्यावसायिकशिक्षा तथा भाषा एषु विषयेषु शिक्षकाणां नियुक्तिः विद्यालये अथवा विद्यालयसंकुले भवितुमर्हति । विद्यालयेषु शिक्षकाणां सहभागिता राज्य-केन्द्रशासितप्रदेशसर्वकारेण स्वीकृत सामूहिकविद्यालय (ग्रुपिंग आफ स्कूल )प्रारूपानुसारं कर्तुं शक्यते ।

5.6 विद्यालये विद्यालयसंकुले वा छात्रहितार्थं स्थानीयज्ञानस्य विशेषज्ञतायाश्च समुन्नत्यर्थं , विभिन्नविषयेषु यथा – पारम्परिकस्थानीयकलासु , व्यावसायिकशिल्पेषु , उद्यमशीलेषु , कृषिकार्येषु ,अथवा अन्यत्र यत्र स्थानीयविशेषज्ञता विद्यते ।तत्र स्थानीयप्रतिष्ठितव्यक्तीनाम् अथवा विशेषज्ञानां विशेष-प्रशिक्षकरूपेण कार्यकरणार्थं प्रोत्साहनं भविष्यति ।

5.7 आगामिनि दशकद्वये अपेक्षितविषयानुगुणं शिक्षकाणां रिक्तपदानाम् आकलनार्थम् एका व्यापक-शिक्षक-आवश्यकतायोजनायाः आवश्यकतानुरूपं कार्यं प्रत्येकं राज्यसर्वकारेण समायोजयिष्यते। चयनप्रक्रियायां पदस्थापनप्रक्रियायाम् उपर्युक्तापेक्षितनियमैः सह समयानुगुणं नूतनानां नियमानां स्वीकरणं भविष्यति ।येन सर्वेषु रिक्तपदेषु स्थानीयशिक्षकैः सह योग्यशिक्षकाणाम् अधोवर्णित-आजीविकाप्रबन्धनाय समुन्नत्यर्थञ्च उपयुक्तगुणवत्ताप्रोत्साहनेन चयनं भवेत्। इत्थं शिक्षकशिक्षाकार्यक्रमः तथा उपहरणकार्यक्रमः शिक्षकाणां रिक्तसन्दर्भे भविष्यति ।

**सेवाकाले कार्यसंस्कृतिः वातावरणं च**

5.8 विद्यालयेषु कार्यवातावरणे तथा संस्कृतौ आमूलपरिवर्तनार्थं प्राथमिकं लक्ष्यं शिक्षकक्षमतासु वृद्धिकरणं भविष्यति यस्मात् ते स्वकीयं कार्यं सम्यक् कर्तुं शक्नुयुः । ते शिक्षकाणां ,छात्राणां , अभिभावकानाम् ,प्रधानाध्यापकानाम्, अन्यसहायककर्मचारिणां समावेशिसमुदायस्य च भागरूपेण स्युः । येषां परमं लक्ष्यं छात्रेषु विद्यार्जनं सुनिश्चितरूपेण भवेत् इति स्यात् ।

5.9 अस्यां दिशि प्रथमा आवश्यकता विद्यालयेषु सभ्यः तथा सुखदकार्यस्थितिस्थापनं भविष्यति । विद्यालयेषु पर्याप्तरूपेण सुरक्षितभौतिकसंसाधनम्, शौचालयव्यवस्था, स्वच्छपेयजलव्यवस्था , अवगमनार्थम् आकर्षकस्थानम् , विद्युत्व्यवस्था , संगणकोपकरणानि , अन्तर्जाल(इण्टरनेट्)व्यवस्था , पुस्तकालयः क्रीडा तथा मनोरञ्जनार्थम् अन्येषां साधनानां च व्यवस्था भविष्यति । येन विद्यालयेषु सर्वे शिक्षकाः दिव्याङ्गसहिताः सर्वेऽपि बालकाः सुरक्षितं तथा प्रभावीवातावरणं प्राप्नुयुः । तथा विद्यालयेषु पाठनार्थं अवगमनार्थं च प्रेरिताः भवेयुः । सेवाकालीनप्रशिक्षणकार्यक्रमेषु विद्यालयेषु सुरक्षा , स्वास्थ्यम्,पर्यावरणम् इत्येतेषां विषये विशेषावधानं भविष्यति । येन समेऽपि शिक्षकाः एतान् प्रति जागरूकाः भवेयुः ।

5.10 प्रभावशालि-विद्यालयप्रशासनम् , संसाधनेषु सहभागिता तथा समुदायनिर्माणार्थं राज्य/केन्द्रशासितराज्यसर्वकारः विद्यालयसंकुलं विद्यालयं वा वैज्ञानकीकरणार्थं स्वयमेव प्रोन्नतिशीलं प्रारूपं स्वीकर्तुं शक्ष्यति ।यथा - विद्यालयसंकुलनिर्माणं क्रियाशीलशिक्षकसमुदायनिर्माणे श्रेष्ठोपायो विद्यते । विद्यालयपरिसरेषु कार्यकरणेन

विद्यालयेषु मिथः सम्बन्धस्थापनं स्वयमेव भविष्यति ।तथा च शिक्षकाणां विषयानुगुणं वितरणार्थमपि साहाय्यं भविष्यति ।येन सम्यक् शिक्षकज्ञानस्य आधारनिर्माणं भविष्यति । अत्यन्तलघुविद्यालयेषु नियुक्ताः शिक्षकाः अपि विद्यालयसंकुले विद्यालयान्तरैः सह कार्यं कर्तुं शक्नुयुः ।तथा व्यवहारेषु सहभागित्वमपि भविष्यति । विद्यार्थिनः अवगच्छन्तु इति मनसि निधाय संभूय कार्यमपि कर्तुं शक्नुयः। शिक्षकाणां प्रोन्नत्यर्थमवगमनार्थं प्रभावि-सामुदायिकवातावरणनिर्माणार्थं च विद्यालयसंकुलपरामर्शदातृणां प्रशिक्षितसामाजिककार्यकर्तृणां अन्येषां कर्मचारिणां च सहभागित्वमपि स्वीकर्तुं शक्नुयात् ।

5.11 अभिभावकैः तथा अन्यप्रमुखस्थानीयहितैषिभिः सह सहयोगेन शिक्षकाः अपि विद्यालयस्य विद्यालयसंकुलस्य प्रशासने विद्यालय-प्रबन्धन-समितेः अथवा विद्यालयसंकुलप्रबन्धनसमितेः सदस्यरूपेण भागं गृहीतुम् शक्ष्यन्ति ।

5.12 अशैक्षणिककार्यकरणार्थं शिक्षकाणां कृते अनुमतिः न भविष्यति ।विशेषतः शिक्षकाणां कृते दुरूहप्रशासनिककार्यं मध्याह्नभोजनसम्बन्धिकार्यं तथा कार्यान्तरार्थं अपेक्षितसमयं परित्यज्य अधिकसमयव्यतीताय अनुमतिः न भविष्यति । येन ते शिक्षणाधिगमकार्येषु ध्यानं दद्युः ।

5.13 विद्यालयेषु अवगमनार्थं सकारात्मकं वातावरणं भवेत् तदर्थं प्रधानाचार्याः शिक्षकाश्च स्वीयेषु विद्यालयेषु प्रभाव्यधिगमकार्यार्थं सर्वेषां हितधारकाणां हितार्थं संवेदनशीलायाः समाविष्टायाश्च संस्कृतेः निर्माणं कुर्युरिति ।

5.14शिक्षकाः पाठ्यक्रमे तथा शिक्षणप्रक्रियायां स्वतन्त्राः भवेयुः येन ते विद्यार्थिनां कृते कक्षायां प्रभावरूपेण पाठयितुं प्रभविष्यन्ति। शिक्षकाः विद्यार्थिनां सर्वाङ्गीणविकासाय सामाजिक-भावनात्मकपक्षेष्वपि अधिकं बलं दद्युः । शिक्षकाणां कृते तादृशशैक्षणिकविधिं स्वीकर्तुं प्रोत्साहनमपि भविष्यति ।येन कक्षायां विद्यार्थिनाम् अवबोधने वृद्धिः भवेत् ।

**सतत-व्यावसायिक-विकासः (सीपीडी)**

5.17 शिक्षकाणां कृते शिक्षणविधौ समुन्नत्यर्थम् आधुनिकविचारं नवाचारं च स्वीकर्तुम् अवसरो भविष्यति।एतेभ्यः स्थानीय-क्षेत्रीय-राज्य-राष्ट्रिय-अन्ताराष्ट्रिया-कार्यशालाभिः सह अन्तर्जालमाध्यमेन (आनलाइन)शिक्षकविकासमानकरूपेण नैके उपायाः करिष्यन्ते। विशेषतः अन्तर्जालमाध्यमेन आधारशिलायाः विकासो भविष्यति येन शिक्षकाणां सर्वोत्तमविचारेषु-प्रथासु च सहभागित्वं स्यात् । शिक्षकाः स्वव्यावसायिकविकासाय स्वेच्छया प्रतिवर्षं पञ्चाशत्होरापरिमितं कालम् अत्र सीपीडीकार्यक्रमे व्यतीतं शक्नुयुः । सीपीडीकार्यक्रमेषु विशेषतः साक्षरतायाः संख्यात्मकज्ञानस्य नवीनतमं शिक्षणशास्त्रम् , अधिगमपरिणामस्य रचनात्मकम् अनुकूलाकलनं च , योग्यताधारिताधिगमम्, सम्बन्धितशिक्षणशास्त्रम् यथा -

अनुभवात्मकं शिक्षणम् , समावेशिकला, समावेशिक्रीडा, कथाधारितदृष्टिः इत्यादीनाम् क्रमबद्धरूपेण प्रशिक्षणं भविष्यति ।

5.16 विद्यालयस्य प्रधानाचार्येभ्यः विद्यालयसंकुलस्य प्रमुखेभ्यश्च स्वप्रशासनिककौशलविकासाय समानमानकनेतृत्वप्रबन्धनकार्यशालाः एवम् अन्तर्जालमाध्यमेन विकासस्य अवसराः भविष्यन्ति । येन ते सर्वोत्तमानुभवान् मिथः विनियोक्तुं शक्नुयुः । संस्थाप्रमुखानां कृते प्रतिवर्षं पञ्चाशत् होरापरिमितः कालः सीपीडीकार्यक्रमे अवश्यं देयो भविष्यति। अत्र योग्यतां- तथा परिणामाधारितशिक्षाम् आश्रित्य शैक्षणिकयोजनां सज्जीकर्तुं स्वीकर्तुं च प्रशासनिकदायित्वेन सह विषयवस्तुकार्यक्रमः तथा शिक्षणशास्त्रसम्बद्धकार्यक्रमाः अपि भविष्यन्ति ।

**आजीविकाप्रबन्धनं प्रगतिश्च – (सीएमपी )**

5.17 ये अध्यापकाः उत्कृष्टं प्रदर्शनं कुर्वन्ति तेषां शिक्षकाणाम् चयनं कृत्वा तेषां पदोन्नतिः वेतनवृद्धिश्च कर्तव्या ।येन समेऽपि शिक्षकाः स्वकार्यं कर्तुं प्रोत्साहिताः भवेयुः । अतः सशक्त-योग्यतानुगुणं कार्यकालस्य, पदोन्नतिव्यवस्थायाः, तथा वेतनव्यवस्थायाश्च निर्माणं करिष्यते ।यत्र शिक्षकाणाम् प्रत्येकं स्तरः बहुस्तरीयो भविष्यति।येन योग्यतमशिक्षकाणाम् प्रोत्साहनं तथा विशिष्टसम्माननं भविष्यति । शिक्षकाणां प्रदर्शनस्य समुचितरूपेण आकलनार्थं राज्य/केन्द्रशासितप्रदेशानां सर्वकारेण मल्टीपल- पैरामीटर्स व्यवस्था भविष्यति । यत्र सहकर्मिभिः कृतायाः समीक्षायाः, उपस्थितेः ,समर्पणभावनायाः, सीपीडीकार्यक्रमे व्यतीतस्य कालस्य, विद्यालये समुदाये वा कृतायाः सेवायाः वा, अथवा एनपीएसटीमध्ये कृतायाः सेवायाः आधारं स्वीकृत्य चयनं भविष्यति । अत्र नीतौ कार्यसंपादनकाले इत्यंशस्य आशयः- प्रदर्शनयोगदानयोः आकलनं कृत्वा स्थायिवृत्तिरूपेण संबद्धो विद्यते । वृत्तिजीवनानुपदिक-पदस्य आशयः स्थायिवृत्तितः प्राक् पूर्वपरिवीक्षाकालेन अस्ति ।

5.18 वत्तिजीवनवृद्धौ (कार्यकालः ,पदोन्नतिः, वेतनवृद्धिः इत्यादिषु) एका एकलविद्यालय( मूलभूतः , प्रारम्भिकः ,मध्यमः माध्यमिकः च)प्रक्रिया शिक्षकाणां कृते स्यात् । तथा प्रारम्भिकावस्थानन्तरचरणेषु शिक्षकाणां कृते(यद्यपि चरणेषु तादृशजीवनम्बद्धविषये अग्रेगमनस्य अनुमतिः स्यात् किन्तु शिक्षकाणां सविधे तादृशपदन्यासाय इच्छा योग्यता च स्यात् ) अथवा वृत्तिजीवनप्रगतये प्रोत्साहनान्तरं न स्यात् । अनेन तथ्यमिदं समर्थ्यते यत् विद्यालयशिक्षायाः सर्वेषु चरणेषु सर्वोत्तमशिक्षकाणाम् आवश्यकता भविष्यति । तथा अन्यचरणस्य चरणान्तरैः सह तुलना न भविष्यति ।

5.19 योग्यतानुगुणं शिक्षकाणाम् अधिकचलशीलता अपि सर्वश्रेष्ठा भविष्यति । उत्कृष्टाः शिक्षकाः ये नेतृत्वं प्रबन्धनम् इत्यादिकौशलेषु दक्षाः भवन्ति । तेभ्यः समयानुगुणं

प्रशिक्षणदानं भविष्यति ।येन ते अग्रे गत्वा विद्यालयस्य ,विद्यालयसंकुलस्य ,बीआरसी, सीआरसी , बीआईटीई, डीआईईटी,इत्यादिभिः सह सम्बद्धसर्वकारीयविभागेषु मन्त्रालये च नेतृत्वं कुर्युः ।

**शिक्षकाणां कृते व्यावसायिकमानकः**

5.20 राष्ट्रियशिक्षकशिक्षापरिषदा एनसीईआरटी, एससीईआरटी, सर्वेषु स्तरेषु तथा क्षेत्रेषु शिक्षकाणां , शिक्षकाणां विकासाय संस्थानैः उच्चशिक्षणसंस्थानैः च सहयोगेन परामर्शेन सामान्यमानकपरिषदन्तर्गतं (जीईसी) व्यावसायिकमानकप्रत्यायननिकायः (पीएसएसबी) इत्यनेन पुनर्घटितेन नवस्वरूपेण व्यावसायिकमानकानां सामान्यमार्गदर्शकगुच्छः 2022 यावत् विकासितो भविष्यति । मानकेषु विशेषज्ञता/श्रोणी इत्यस्य विभिन्नेषु स्तरेषु शिक्षकाणां भूमिका तथा श्रेणीनिर्धारणाय आवश्यकदक्षतानां स्वीकृतिः भविष्यति। अत्र प्रत्येकं स्तरेषु कृतकार्याणां मूल्याङ्कनमपि भविष्यति ।येषां यथासमये परिवर्तनमपि भविष्यति । एनपीएसटी सेवापूर्वशिक्षकशिक्षाकार्यक्रमाणां प्रारूपमपि सूचयिष्यति । तदनन्तरमेव राज्यसर्वकारेण स्वीकर्तुं शक्यते । एतदनुसारेणैव शिक्षकाणां सेवावृत्तिप्रबन्धनं भविष्यति । यत्र कार्यकालः ,व्यावसायिकविकासस्य प्रयासाः , वेतनवृद्धिः , पदोन्नतिः इत्यादयः भविष्यन्ति । कार्यकालावधिः अथवा ज्येष्ठक्रमः इत्यादि परित्यज्य केवलं निर्धारितमानकानाश्रित्यैव पदोन्नतिः वेतनवृद्धिश्च भविष्यतः। 2030वर्षे राष्ट्रस्तरे व्यावसायिकमानकानां समीक्षा तथा संशोधनं भविष्यति । तथा तदनन्तरं प्रत्येकं दशवर्षानन्तरं व्यवस्थायाः आनुभविकविश्लेषणं भविष्यति ।

**विशिष्टः शिक्षकः**

विद्यालयशिक्षायाः कतिपयक्षेत्रेषु अतिरिक्तविशिष्टशिक्षकाणाम् अत्यावश्यकता विद्यते । एतासाम् आवश्यकतानाम् कतिपयोदाहरणानि इत्थम् वर्तन्ते।मध्यमस्तरेषु माध्यमिकस्तरेषु च दिव्याङ्गबालकाः, तादृशाः छात्राः येषामध्ययने काठिन्यं भवति तेषाम् अध्यापनाय विषयाणां शिक्षणमपि विद्यते। एतेषां शिक्षकाणं कृते न केवलं विषयज्ञानमपेक्षितं भवति , अपि तु विद्यार्थिनां का अपेक्षा इति परिज्ञातुं विशिष्टकौशलमपि अपेक्ष्यते । अत एव एषु क्षेत्रेषु शिक्षकाणां तथा सामान्यशिक्षकाणां कृते प्रारम्भिकसमये अथवा सेवापूर्वशिक्षकप्रशिक्षणानन्तरं द्वितीयविशेषज्ञतारूपेण विकासं कर्तुं शक्यते ।एतदर्थं शिक्षकाणां कृते सेवाकाले अथवा पूर्वसेवाकाले , अंशकालिकः पूर्णकालिकः मिश्रितविषयाः च महाविद्यालयेषु विश्वविद्यालयेषु च उपलब्धाः भविष्यन्ति । विषयविशेषज्ञाः ये विषयशिक्षणमपि जानन्ति तेषां पर्याप्तसंख्या सुनिश्चेतुम् एनसीटीई तथा आरसीआई पाठ्यक्रममध्ये अधिकसम्बन्धस्थापनं भविष्यति ।

**शिक्षकशिक्षायाः दृष्टिः**

5.22 शिक्षकेभ्यः उच्चगुणवत्तायाः सामग्र्या सह शिक्षणशास्त्रे प्रशिक्षणस्यापि आवश्यकता भविष्यति। अध्यापकशिक्षायाः अपि शनैः शनैः 2030वर्षं यावत् बहुविषयकविद्यालयेषु विश्वविद्यालयेषु च अन्तर्भावः क्रियते । यथा यथा सर्वे महाविद्यालयाः विश्वविद्यालयाश्च बहुविषयकाः भविष्यन्ति तथा तेषाम् लक्ष्यम् उत्कृष्टशिक्षाविभागस्य स्थापना। यत्र शिक्षायाम् शिक्षाशास्त्रम् (बीएड्), शिक्षाचार्यः(एमएड्), विद्यावारिधिः (पीएचडी) इत्येतेषाम् उपाधिप्रदानं भविष्यति ।

5.23 2030 वर्षं यावत् शिक्षणस्य कृते न्यूनतमयोग्यता चतुर्वर्षीयः एकीकृतः शिक्षाशास्त्रि(बी.एड्.) उपाधिः भविष्यति यत्र विस्तृतज्ञानसामग्र्या अध्यापनसामग्र्या च शिक्षणं भविष्यति । अत्र स्थानीयविद्यालयेषु छात्रशिक्षणरूपेण व्यावहारिक-अभ्यासप्रशिक्षणमपि सम्मिलितो भविष्यति । चतुर्वर्षीय-एकीकृत-शिक्षाशास्त्रि(बी.एड्.)उपाधिप्रदात्रा एतेनैव बहुविषयकसंस्थानेन द्विवर्षीयः शिक्षाशास्त्रि(बी.एड्.)कार्यक्रमोऽपि भविष्यति। अयञ्च तादृशेभ्यः एव आवश्यको भविष्यति यैः विषयान्तरेषु स्नातकोपाधिः प्राप्तः । एषाम् शिक्षाशास्त्रि(बी.एड्.) कार्यक्रमाणाम् एकवर्षाभ्यन्तरेऽपि कर्तुं समुचितरूपेण प्रयासो भविष्यति। अयञ्च तादृशेभ्यः भविष्यति यैः चतुर्वर्षीय-बहुविषयकस्नातकोपाधिः अथवा अन्यत्र विशिष्टतायां स्नातकोत्तरोपाधिः प्राप्तः स्यात् तथा च तैः तस्मिन्नेव विशिष्टविषये शिक्षकाः भवितुम् इष्यते चेत् । इत्थं सर्वोपि शिक्षाशास्त्रि(बी.एड्.) उपाधिः केवलं चतुर्वर्षीय- एकीकृत-शिक्षाशास्त्रि(बी.एड्.)प्रदात्रा मान्यताप्राप्तबहुविषयक-उच्चशिक्षासंस्थानेनैव प्रदातुम् शक्यते । चतुर्वर्षीय-एकीकृत-शिक्षाशास्त्रि(बी.एड्.)प्रदातृ-बहुविषयक-उच्चशिक्षासंस्थानां सविधे मुक्तदूरस्थशिक्षणम् (ओडीएल)इत्यस्यापि मान्यता विद्यते तादृशं संस्थानं दूरस्थानां दुर्गमभौगोलिकस्थाने स्थितानां छात्राणां सेवारतेच्छुकाध्यापकानां च कृते मिश्रितरूपेण अथवा ओडीएलरूपेणापि उच्चगुणवत्तायाः शिक्षाशास्त्रि(बी.एड्.) कार्यक्रमस्य आयोजनं कर्तुं शक्यते । तदर्थं ते कार्यक्रमस्य व्यावहारिकं प्रशिक्षणं ,छात्रशिक्षणं, प्रशिक्षकाणं कृते उपयुक्तव्यवस्थां च करिष्यन्ति ।

5.24 सर्वेषु शिक्षाशास्त्रि(बी.एड्.)कार्यक्रमेषु शिक्षणशास्त्रस्य प्रशिक्षणम् आधुनिकप्रणाल्या भविष्यति । यत्र आधारभूतसाक्षरतायाः तथा संख्याज्ञानस्य शिक्षणशास्त्रम्, बहुस्तरीयशिक्षणं मूल्याङ्कनम्, दिव्याङ्गविद्यार्थिनाम् अध्यापनम्, विशिष्टप्रतिभाशालिनाम् बालकानाम् अध्यापनम्, शैक्षिक-प्रौद्योगिकीप्रयोगः शिक्षार्थिकेन्द्रितं सहयोगात्मकं शिक्षणमपि च भविष्यति । सर्वेषु शिक्षाशास्त्रि(बी.एड्.) कार्यक्रमेषु स्थानीयविद्यालयेषु कक्षायाः शिक्षणं व्यावहारिकप्रशिक्षणरूपेण भविष्यति। सर्वेषां शिक्षाशास्त्रि(बी.एड्.)कार्यक्रमाणां

प्रशिक्षणसमये भारतीयसंविधानानुसारं मौलिककर्तव्यानां (अनुच्छेद51ए) संवैधानिकनियमानामनुपालनं च भविष्यति । अत्र पर्यावरणं प्रति जागरूकता, पर्यावरणसंरक्षणम्, तथा सततविकासाय संवेदनाशीलतायाः प्रमुखं स्थानं भविष्यति । तथा पर्यावरणशिक्षा विद्यालयशिक्षायाः अभिन्नाङ्गं भविष्यति ।

5.25 कतिपयाः अल्पावधिस्थानीयशिक्षकशिक्षाकार्यक्रमाः वीआईटीई, डीआईईटी अथवा विद्यालयपरिसरेष्वपि भविष्यन्ति । येन स्थानीयव्यवसायज्ञानं तथा कौशलम् – यथा स्थानीयकला, संगीतम्, कृषिः, व्यवसायः,क्रीडा, इत्याद्यन्यव्यावसायिकशिल्पानां प्रोत्साहनार्थं प्रख्यातस्थानीयव्यक्तीनां विद्यालयेषु विद्यालयपरिसरेषु वा अधीशप्रशिक्षकरूपेण नियुक्तिः भविष्यति ।

5.26 बहुविषयकविद्यालयेषु विश्वविद्यालयेषु च शिक्षाशास्त्रि(बी.एड्.)अनन्तरं कतिपयान् अल्पावधिपार्माणपत्रीयपाठ्यक्रमान् अपि व्यापकरूपेण आयोजयिष्यन्ते।ये शिक्षणस्य विशिष्टक्षेत्रेषु यथा योग्यविद्यार्थिनां प्रशिक्षणे ,अथवा विद्यालयशिक्षाप्रणाल्यां नेतृत्वपदेषु तथा प्रबन्धनपदेषु प्रारम्भिक-उच्चतरमाध्यमिक-माध्यमिकस्तरेषु एकस्मात् अन्यं स्तरं प्रति गन्तुकामाः सन्ति तेषां कृते ।

5.27 विशेषविषयप्रशिक्षणार्थम् अन्ताराष्ट्रियस्तरेषु नैके शिक्षाविधयः भवन्ति । एनसीईआरटीसंस्था विभिन्नविषयेषु शिक्षणस्य विविधविधीनां अध्ययनं , शोधप्रलेखनं च करिष्यति ।तेषु उपयुक्तानां शिक्षाविधीनां भारतेऽपि स्वीकारो भविष्यति ।

5.28 2021वर्षं यावत् एनसीटीई, एनसीईआरटी संस्थया नूतनशिक्षानीतिः 2020 इत्यस्य सिद्धान्तानाश्रित्य नूतन-व्यापकाध्यापकशिक्षाप्रदानार्थं राष्ट्रियपाठ्यचर्यायाः रूपरेखा एनसीएफटीई 2021 भविष्यति। इयम् रूपरेखा राज्यसर्वकारस्य/केन्द्रसर्वकारस्य सम्बद्धमन्त्रालयविभागेण नियुक्तविशेषज्ञैः निर्मिता भविष्यति । तथा सर्वासु क्षेत्रीयभाषासु उपलब्धा भविष्यति । एनसीएफटीई 2021मध्ये व्यावसायिकशिक्षार्थम् अध्यापकपाठ्यचर्यायाः स्थानमपि भविष्यति। तदनन्तरं संशोधित- एनसीएफटीई-मध्ये परिवर्तनार्थं तथा अपेक्षानुगुणम् अध्यापकशिक्षायां परिवर्तनार्थम् एनसीएफटीई मध्ये प्रत्येकं 5-10वर्षाभ्यन्तरे संशोधनं भविष्यति ।

5.29 अन्ततः अध्यापकशिक्षाप्रणाल्याः प्रमाणार्थं देशे स्थितानां अवमानकस्वतन्त्राध्यापक-शिक्षासंस्थानाम् (टीईआई) कृते समुचितदण्डव्यवस्थायाः प्रावधानम् अथवा अपेक्षानुगुणं संस्थानां स्थगनमपि भविष्यति ।

## 6. समतामूलिका समावेशिशिक्षा - सर्वेषाम् अधिगमः

6.1 शिक्षा सामाजिकन्यायसमानताप्राप्त्यर्थं च एकमात्रं प्रभावशालिसाधनं विद्यते। समतामूलकसमावेशिशिक्षा समाजनिर्माणार्थम् अनिवार्यसोपानम् वर्तते । यत्र सर्वेषां कृते स्वसमुन्नत्यर्थं राष्ट्रोत्थानार्थं च स्थानं विद्यते। इयं शिक्षानीतिः भारतदेशस्थविद्यार्थिनां समुत्थानार्थं बाधकं विना सर्वेभ्यः अवसरं दास्यति। विशेषतः विद्यालयशिक्षायां सहभागिता तथा अधिगमपरिणामेषु बाधकसमाजिकतत्त्वानाम् अपाकरणम् अस्याः नीतेः प्रधानं लक्ष्यं भविष्यति ।अस्य अध्यायस्य योजनं चतुर्दशाध्यायमध्ये कर्तव्यम् । यत्र उच्चतरशिक्षायां समताविषये समावेशनविषये च विचारो वर्तते ।

6.2 भारतीयशिक्षाप्रणाल्यां क्रमिकसर्वकारीयनीतौ च विद्यालयीयशिक्षाव्यवस्थायाः सर्वेषु स्तरेषु लिङ्गभेदस्य सामाजिकश्रेणीभेदस्य न्यूनीकरणाय प्रयासः प्रचलति तथापि असमानतायाः स्तरोऽद्यापि दृश्यते। विशेषतः माध्यमिकस्तरेषु - सामाजिकरूपेण तथा आर्थिकरूपेण वञ्चिताः जनाः दृश्यन्ते । ये शिक्षाक्षेत्रेषु अद्यापि प्रताडिताः सन्ति।एषु समुदायेषु लिङ्गं (विशेषतः महिलाः तृतीयप्रकृतिकाः अर्थात् ट्रांसजेन्डर),सामाजिकवर्णाः (अनुसूचितजनजातिः,अनुसूचितजातिः, अन्यपृष्ठजनवर्गः, भाषा तथा धार्मिक-अल्पसंख्यकाःच),भौगोलिकस्तराः(ग्रामीणाः उपनगरिवास्तव्याः) विशेषावश्यकताशालिनः (अधिगमे-अक्षमाः),सामाजिकार्थिकदृष्ट्या त्रस्ताः (प्रवासि-समुदायः, निर्धनाः, दीनाः, बालतस्करताग्रस्ताः बालकाः ,मातृपितृविहीनाः बालकाः , बालयाचकाः इत्यादयः) विद्यन्ते ।साम्प्रतं विद्यालयेषु प्रथमकक्षातः 12कक्षां यावत् शिक्षानामाङ्कनस्य ह्रासो दृश्यते । विशेषतः ह्रासोऽयम् सामाजिकार्थिकरूपेण वञ्चितसमुदायेषु(एसईडीजी) अधिको विद्यते । तत्रापि बालिकाविषये संख्यायाः आधिक्यं वर्तते।उच्चशिक्षाक्षेत्रे तु इतोऽपि संख्या वर्तते। एसईडीजी इत्यस्य संक्षिप्तस्थितिः अनुवर्ति-उपखण्डेषु संलग्ना वर्तते ।

6.2.1 यू-डीआईएसई 2016-17 सन्दर्भानुसारेण प्राथमिकस्तरेषु अनुमानितः 19.6% छात्राः अनुसूचितजातीयाः विद्यन्ते।उच्चतरमाध्यमिकस्तरेषु 17.3% छात्राःसन्ति। नामांकनेषु ह्रासोऽयम् अनुसूचितजनजातीयछात्रेषु (10.6% तः6.8%) तथा दिव्याङ्गबालकेषु (1.1%तः0.25%) विद्यते।एषु सर्वत्र महिलास्तरेषु अतिह्रासो वर्तते। उच्चतरशिक्षास्तरेषु तु इतोऽप्यधिको विद्यते ।

6.2.2 अनुसूचितजातीयानाम् छात्राणाम् नामाङ्कने निर्धनता ,सामाजिकप्रथाः ,भाषा-भेदः इत्यादीनि बाधकतत्त्वानि विद्यन्ते । अनुसूचितछात्रेषु शिक्षणान्तरालस्य पूर्णतः अपाकरणं अस्या शिक्षानीतेः प्रमुखलक्ष्यं विद्यते ।तथा ओबीसीछात्रसमुदायेष्वपि विशेषावधानम् भविष्यति ।

6.2.3 ऐतिहासिक-भौगोलिककारणेन जनजातीयछात्राः तथा अनुसूचित-जनजातीयछात्राः विभिन्नस्तरेषु कष्टम् अनुभवन्ति। आदिवासि-छात्राः विद्यालयशिक्षणस्य सांस्कृतिकरूपेण शैक्षणिकरूपेण च प्रसङ्गहीनम् अनुभवन्ति । यद्यपि अधुना आदिवासिछात्राणां समुत्थानाय विभिन्नाः कार्यक्रमाः विद्यन्ते । आदिवासि-छात्राणां लाभार्थमग्रेऽपि कार्यक्रमाः भविष्यन्ति ।

6.2.4 विद्यालये तथा उच्चतरशिक्षायाम् अल्पसंख्यकानाम् प्रतिनिधित्वमपि पर्याप्तं नास्ति । नीतिरियम् अल्पसंख्यकानाम् प्रतिनिधित्ववर्धनार्थं विशेषतः बालकानां शिक्षाप्रदानार्थं हस्तक्षेपं स्वीकरिष्यति ।

6.2.5 विशेष-बालकाः (सीडब्ल्यूएसएन)अथवा दिव्याङ्गबालकाः सामान्यबालकासदृशां शिक्षां प्राप्नुयुः तदर्थं प्रयासो भविष्यति ।

6.2.6 विद्यालयशिक्षणे सामाजिकश्रेणीभेदमपाकर्तुं विशेषावधानं भविष्यति ।तदर्थं योजनानिर्माणमपि भविष्यति।यस्योल्लेखः निम्नलिखितेषु उपभागेषु विद्यते ।

6.3 ईसीसीई ,मूलभूत-साक्षरता, संख्या-ज्ञानम् , विद्यालये नामाङ्कनम् इत्यादि- 1-3अध्यायेषु वर्णितसमस्यानां निवारणार्थम् एसईडीजीसन्दर्भे 1-3अध्यायेषु वर्णितानाम् उपायानाम् दृढेन स्वीकारो भविष्यति ।

6.4 विद्यालयगमनार्थं द्विचक्रियाप्रदानम् ,छात्रवृत्तिप्रदानम् , शिक्षायां प्रोत्साहनार्थं धनप्रदानम् इत्यादियोजनाः सन्ति। आसां योजनानां सम्पूर्णदेशे अत्यधिकदृढरूपेण आरम्भो भविष्यति ।

6.5 इदमप्यत्रावधेयम् – यत् के उपायाः अत्र प्रभावशालिनः सन्ति । उदाहरणार्थं – द्विचक्रिकाप्रदानं विद्यालये बालिकानामुपस्थितिवर्धनार्थं सफलीभूतः उपायोऽस्ति। विशेषतः ग्रामीणक्षेत्रेषु अत्यन्तप्रभावशाली विद्यते । एवमेव दिव्याङ्गबालकानां कृते प्रत्येकं बालकेन सह एकः शिक्षकः , सहपाठिशिक्षणं , मुक्तविद्यालयीयशिक्षा , तथा विशिष्टतान्त्रिकानां प्रयोगः विशेषतः प्रभावी भवितुमर्हति। ये विद्यालयाः गुणवत्तया प्रारम्भिकस्तरेषु शिक्षाप्रदानं कुर्वन्ति ते निर्धनच्छात्राणां कृते विशेषोपकारकाः सन्ति। एवमेव निर्धनक्षेत्रेषु परामर्शकाः, अथवा प्रशिक्षितसामाजिककार्यकर्तारः ये छात्रैः, अभिभावकैः, विद्यालयशिक्षकैः सह मिलित्वा कार्यं कुर्वन्ति । तेषामुपस्थितिः अधिगमपरिणामस्य सफलीकर्तुम् विशेषसहायिका भविष्यति ।

6.6 विशिष्टसन्दर्भेण ज्ञायते यत् भौगोलिकक्षेत्रेषु एसईडीजी इत्यस्य महानुपातो विद्यते । अन्यान्यपि भौगोलिकस्थानानि सन्ति यत्र शैक्षिकविकासार्थं विशेषयोजनानाम् आवश्यकता विद्यते । अत एव शैक्षिकदृष्ट्या एसएडीजी निर्देशित-कतिपयस्थानस्य विशेषशिक्षाक्षेत्ररूपेण

परिवर्तनं कर्तव्यम्। यत्र केन्द्र / राज्यसर्वकारेण एषु क्षेत्रेषु शैक्षिकपरिदृश्यस्य परिवर्तनार्थं विशिष्टयोजनानाम् आवश्यकता विद्यते ।

6.7 अल्पप्रतिनिधीनां समुदायेषु अर्द्धसंख्या महिलानां विद्यते । अतः दौर्भाग्यवशात् एसईडीजीमध्ये अन्यायस्य व्यवहारः एताभिः सह अत्यधिको विद्यते।अतः समाजे महिलानाम् विशिष्टभूमिकायाः निर्वाहार्थं एसईडीजीमध्ये बालिकानां गुणवत्तापूर्णशिक्षाव्यवस्था शैक्षिकस्तरस्य समुन्नत्यर्थं सर्वोत्तमः उपायोऽस्ति । अतः शिक्षानीतिः अनुशंसति यत् एसईडीजीमध्ये बालिकानां शैक्षिकस्तरोत्थानाय नीतिषु योजनासु च विशेषतः एतादृशीनाम् बालिकानां केन्द्रितं भवेत् ।

6.8 तथा च भारतसर्वकारः सर्वासां बालिकानां कृते एवञ्च तृतीयाप्रकृतिकानां (परिवर्तितलिङ्गाः)छात्राणां कृते गुणवत्तापूर्णन्यायसंगतशिक्षाप्रदानार्थं देशस्य विकासाय लिङ्ग-समावेशिनिधिसंघटनस्य निर्माणं करिष्यति।केन्द्रसर्वकारेण निर्धारितप्राथमिकतानां प्राप्त्यर्थं राज्यानां कृते कोषस्य व्यवस्था भविष्यति ।महिलानां कृते तथा च तृतीयाप्रकृतिकानां छात्राणां शिक्षाप्राप्त्यर्थं नियमोऽयम् अतीवोपयोगी विद्यते ।(यथा – स्वच्छता तथा शौचालयसम्बद्धव्यवस्थाप्रदानम् , गमनार्थं द्विचक्रिकाप्रदानम् सप्रतिबन्धधनप्रदानम् इत्यादि) कोशोऽयं समुदायाधारितकार्यक्रमान् सफलीकर्तुं तथा महिला तृतीयाप्रकृतिकानां छात्राणां कृते शिक्षासम्बन्धिसमस्यानां निवारणाय उपयोगी भविष्यति । अन्यत्र एसईडीजीशिक्षायामपि समस्यासमाधानार्थम् इत्थमेव समावेशिनिधिः इत्यस्य व्यवस्था भविष्यति।इत्थं संक्षेपेण वक्तुम् शक्यते अस्याः नीतेः उद्देश्यं लिङ्ग-आर्थिक-सामाजिकरूपेण वञ्चितानां छात्राणाम् कृते समानरूपेण शिक्षा तथा व्यावसायिकशिक्षाप्रदानम् अस्ति।

6.9 यत्र विद्यालयगमने दूरवशात् छात्राः कष्टम् अनुभवन्ति तत्र जवाहरनवोदयविद्यालयवत् निशुल्कच्छात्रावासानां निर्माणं भविष्यति।विशेषतः सामाजिकार्थिकरूपेण वञ्चितानां कृते भविष्यति । अत्र सर्वेषां बालकानां विशेषतः बालिकानां सुरक्षाविषये विशेषावधानं भविष्यति । कस्तूरबा गांधी बालिकाविद्यालयानां विकासो भविष्यति ।तथा सामाजिकार्थिकरूपेण वञ्चितानां बालिकानां गुणवत्तापूर्णशिक्षाविद्यालयेषु (ग्रेड12 यावत् ) प्रतिभागितावर्धनार्थं विस्तारो भविष्यति । सम्पूर्णदेशे उच्चगुणवत्तापूर्णशिक्षाप्रदानार्थं विशेषतः आकांक्षात्मकजनपदेषु वञ्चितशिक्षाक्षेत्रेषु नूतनजवाहरविद्यालयस्य केन्द्रीयविद्यालयस्य च स्थापना भविष्यति । देशस्य केन्द्रीयविद्यालयेषु तथा अन्यप्राथमिकविद्यालयेषु एकवर्षस्य प्रारम्भिकबाल्यावस्थाशिक्षायाः अपि समन्वयो भविष्यति ।

6.10 ईसीसीईमध्ये दिव्याङ्गबालकानां सहभागिता अस्याः नीतेः सर्वोच्चप्राथमिकता विद्यते । प्रारम्भिकस्तरात् उच्चतरस्तरं यावत् तेषां सहभागिता भवेत् तदर्थमत्र प्रयासो भविष्यति।दिव्याङ्गजन अधिकार- अधिनियमः 2016 (आरपीडब्ल्यूडी अधिनियमः) समावेशिशिक्षायाः प्राधान्यमस्ति ।यत्र सामान्यबालकाः तथा दिव्याङ्गबालकाः मिलित्वा शिक्षणं प्राप्नुवन्ति।तत्र शिक्षणम् अवबोधनञ्च समानरूपेण भवति। राष्ट्रियपाठ्यचर्यायाः रूपरेखानिर्माणसमये एनसीईआरटी द्वारा दिव्याङ्जनविभागस्य राष्ट्रियसंस्थानेन सह परामर्शः सुनिश्चितरूपेण भविष्यति ।

6.11 एतदर्थं दिव्याङ्गबालकानाम् एकीकरणाय विद्यालये तथा विद्यालयपरिसरे कुशलसामग्रीणां व्यवस्था भविष्यति । तथा च एतादृशेषु विद्यालयेषु पाठनार्थं प्रशिक्षणप्राप्तशिक्षकाणां नियुक्तिः भविष्यति। तथा च आवश्यकतानुसारेण गंभीररूपेण तथा अधिकदिव्याङ्गबालकानां संसाधनकेन्द्रस्य स्थापना अपि भविष्यति । आवश्यकतानुसारं संसाधनकेन्द्रं संस्थापिष्यते। आरपीडब्यूडी-अधिनियमानुरूपं दिव्याङ्गच्छात्रेभ्यो बाधामुक्ताभिगमः सुनिश्चितः करिष्यते। विशेषापेक्षावतां छात्राणां विभिन्नश्रेण्यनुरूपं विद्यालयो विद्यालयपरिसरो वा कार्यं विधास्यति येन प्रत्येकं छात्रस्य आवश्यकतानुरूपं साहाय्यं सुनिश्चितं कर्तुमुपयुक्तप्रणाल्या विकासं करिष्यते, तेन च कक्षाकक्षे तेषां पूर्णरूपेण प्रतिभागिता समावेशनं वा सुनिश्चेष्यते। कक्षायां शिक्षकैरन्यसहपाठिभिर्वा सार्धं सरलतया योक्तुं विशेषापेक्षावद्भ्यः छात्रेभ्यः कानिचित्सहायकोपकरणानि, उपयुक्तप्राविधिकोपकरणानि भाषोपयुक्तशिक्षणसामग्री (यथा बृहत् मुद्रितरूपेण ब्रेलरूपेण वा सुलभपाठ्यपुस्तकानि) च पर्याप्तमात्रायामुपलब्धिः करिष्यन्ते। एतत्कलाक्रीडाव्यावसायिकशिक्षासहित सकलविद्यालयीय -गतिविधीनामुपर्यपि विनियोजिष्यते। एनआईओएस भारतीयसङ्केतभाषामध्यापयितुं भारतीयसङ्केतभाषायाः उपयोगेन अन्यमौलिकविषयाध्यापनाय चोच्चतरगुणवत्प्रतिमानं विकासिष्यते। अपि च दिव्याङ्गच्छात्राणां सुरक्षायाः कृते अपि पर्याप्तमवधानं दास्यते।

6.12 2016 वर्षस्य आरपीडब्ल्यूडी-अधिनियमानुसारेण, दिव्याङ्गच्छात्राणां सविधे नैयत्येन विशिष्टायाः वा विद्यालयीयशिक्षायाः विकल्पो भविष्यति। विशिष्टशिक्षकमाध्यमेन स्थापितसंसाधनकेन्द्रम्, गम्भीराम् अथवा एकाधिकविशेषामवश्यकताम् अपेक्षितच्छात्राणां पुनर्वासेन शिक्षया वा सम्बद्धावश्यकतासु साहाय्यं करिष्यति, तथैव उच्चतरगुणवत्तायाः शिक्षां गृहे (होमस्कूलिंग) एव अपलब्धिं कर्तुमथवा कौशलविकासदिशायां तेषां मातापित्रोः वा साहाय्यं करिष्यति। विद्यालयान् गन्तुमसमर्थेभ्यो गभीरगहनदिव्याङ्गेभ्यः छात्रेभ्यः गृहाधारितशिक्षारूपेण कश्चिदेको विकल्पः उपलब्धो भविष्यति। गृहाधारितशिक्षायाः अधीने

शिक्ष्यमाणच्छात्रा अन्यसामान्यशिक्षाप्रणाल्यन्तर्भूत-च्छात्राणां समतुल्याः मंस्यन्ते। गृहाधारितशिक्षायाः दक्षतायाः प्रभावशीलतायाः वा निरीक्षणाय समतावसरयोः समानतायाः सिद्धान्ताधारितां परीक्षां (ऑडिट) कारयिष्यते। 2016वर्षस्य आरपीडब्ल्यूडी-अधिनियमानुरूपम्, एतत्परीक्षाधारेण गृहाधारितविद्यालयीयशिक्षार्थं मार्गनिर्देशाः मानकानि च विकसितानि करिष्यन्ते। यद्यपि इदं स्पष्टं वर्तते यद्दिव्याङ्गच्छात्राणां शिक्षा राज्यानां कर्तव्यभूता, तदर्थं मातापित्रोः अवधातॄणां वोन्मुखीकरणप्रभृति उच्चस्तरीयप्राथमिकतया सहाधिगमसामग्र्या व्यापकप्रचारप्रसारयोः प्रौद्योगिक्याधारितसमाधानं करिष्यते, यन्माध्यमेन पितरौ अवधातारश्च स्वबालानामावश्यकतानुरूपं साहाय्यं कर्तुं प्रभवेयुः।

6.13 अधिकांशकक्षास्वेतादृशाः छात्राः वर्तन्ते येषु अध्ययनदृष्ट्या काश्चिद्विशिष्टा अक्षमताः भवन्ति तेषां कृते निरन्तरं साहाय्यमपेक्षते। शोधैः स्पष्टो भवति यदेतादृशविषयेषु यावच्छीघ्रं साहाय्यम् आरप्स्यते प्रगतेः सम्भावना अधिकं भवति। अध्ययनसम्बद्धानामित्थम्प्रकारकाक्षमतानां परिज्ञानाय तथा तन्निवारणार्थं योजनानिर्माणाय च विशेषरूपेण शिक्षकाः साहाय्यं प्राप्नुयुः। एतदर्थं करिष्यमाणविशिष्टकार्याणि, येषु उपयुक्तप्राविधेः साहाय्येन क्रियमाणप्रयाससहितान्यन्तर्भविष्यन्ति।छात्रेभ्यः स्वसामर्थ्यानुगुणं कार्याणि कर्तुं स्वातन्त्र्यप्रदानम्, प्रत्येकं छात्रस्य क्षमतानां लाभस्वीकरणदृष्ट्या पाठ्यक्रमस्य सक्षमीकरणं नम्यीकरणञ्च, तथैव उपयुक्ताकलनार्थं प्रमाणनार्थं उत्तमपरिसरस्य (इकोसिस्टम)निर्माणम्।परखनामकप्रस्तावितनवीनराष्ट्रियमूल्याङ्कनकेन्द्रसहिता मूल्याङ्कन -प्रमाणनसंस्था दिशानिर्देशान् निर्मास्यन्ति, एवं मौलिकस्तरादुच्चतरशिक्षास्तर-पर्यन्तम् (प्रवेशपरीक्षासहितम्) एतादृशमूल्याङ्कनसञ्चालनाय उपयुक्तविधीन् उपदेक्ष्यन्ति येन अध्ययनाक्षमतावद्भ्यः समेभ्यश्छात्रेभ्यः समानाः अभिगमाः अवसराश्च निश्चिताः भवन्ति।

6.14 विशिष्टदिव्याङ्गतावतश्छात्रान् (अध्ययनसम्बद्धाक्षमतासहितान्) कथमध्यापयितुं शक्यत इत्येतत्सम्बद्धं ज्ञानं जागरूकता च समस्तशिक्षकप्रशिक्षणानामनिवार्याङ्गं स्यात्। अपि च लैङ्गिकसंवेदनशीलतावतामल्पप्रतिनिधित्ववतां वा समूहान् प्रति संवेदनशीलता विकासनीया यया तेषां प्रतिभागितायाः स्थितिः वरीयसी जायेत।

6.15 विद्यालयानां वैकल्पिकरूपाणां स्वपरम्पराणां तथा वैकल्पिकशिक्षणशास्त्रीयाभ्यासानां च संरक्षणाय प्रोत्साहनं करिष्यते। अपि च तेभ्यः स्वविषयान्, शिक्षणक्षेत्राणि पाठ्यक्रमं च राष्ट्रियपाठ्यचर्यानुरूपतयैकीकृतीकर्तुं साहाय्यं प्रदास्यते येन चोच्चस्तरीयशिक्षाक्षेत्रेषु तेषां विद्यार्थिनां न्यूनप्रतिभागितायाः शनैश्शनैः वृद्धिः सम्भवेत्। एतादृशविद्यालयेभ्यः विज्ञान-

गणित-सामाजिकाध्ययन-हिन्दी-आङ्ग्ल-राज्यभाषाद्यन्यप्रासङ्गिकविषयाणां स्वपाठ्यक्रमे अन्तर्भाविाय वित्तीयसहायतापि प्रदास्यते, यथा एतैर्विद्यालयैर्वाञ्छ्येत। एतच्च पारम्परिकेषु सांस्कृतिकेषु धार्मिकेषु वा विद्यालयेष्वधीयानच्छात्रान् 1-12कक्षाभ्यः परिभाषिताधिगमपरिणामान् प्रापयितुं सक्षमान् कारिष्यति। एतदतिरिच्य एतादृग्विद्यालयेषु छात्राः एनटीए-द्वारा राज्यीयपरीक्षार्थम् अन्यपरिषत्(बोर्ड)परीक्षार्थं मूल्याङ्कनार्थं चोपस्थातुं प्रोत्साहयिष्यन्ते, इत्थञ्च उच्चस्तरीयशिक्षासंस्थानेषु प्रवेशं स्वीकर्तुं ते शक्ष्यन्ति। विज्ञान-गणित-भाषा-सामाजिकाध्ययनानां शिक्षणे शिक्षककक्षमताः नवीनशैक्षणिकाभ्यासेभ्यः उन्मुखीकरणपूर्वकं विकसिताः करिष्यन्ते। पुस्तकालयाः प्रयोगशालाश्च सुदृढीकरिष्यन्ते तथा पुस्तकपत्रिकादिपर्याप्तपाठनसामग्री अन्यशिक्षणसामग्री च प्रापयिष्यते।

6.16 एसईडीजी-अन्तर्गतानां तदूर्ध्वं वर्णितानां नीतिगतानां बिन्दूनां सन्दर्भे अनुसूचितजातीनां तथा जनजातीनां शैक्षणिकविकासे असमानतायाः दूरीकरणे विशेषलक्ष्यं प्रदास्यते। विद्यालयीयशिक्षायां भागग्रहणवर्धनप्रयासानां भागरूपेण, समस्तेभ्यः एसईडीजी इत्येतेभ्यः प्रतिभाशालिभ्यः मेधाविभ्यश्च छात्रेभ्यो आधिक्येन समर्पितक्षेत्रेषु विशेषच्छात्रावासाः, सेतुपाठ्यक्रमाः, शुल्कत्यागः, छात्रवृत्तिमाध्यमेन वित्तीयसहायता च विशेषतो माध्यमिकस्तरे प्रदास्यन्ते येन उच्चस्तरीयशिक्षायै तेषां प्रवेशः सुलभः स्यात्।

6.17 रक्षामन्त्रालयस्य तत्त्वावधाने राज्यसर्वकारा जनजातिबहुलप्रदेशसहितेषु माध्यमिकोच्चतरमाध्यमिकविद्यालयेषु एनसीसीविंग-उद्घाटनाय प्रोत्साह्यते। अनेन छात्राणां स्वाभाविकप्रतिभा अद्वितीयक्षमता चोपयुज्येते येन च ते रक्षासेनासु सफलोद्यागाय प्रेरिता भवेयुः।

6.18 एसईडीजीतः छात्रेभ्यः उपलब्धासु सकलासु छात्रवृत्ति-अवसर-योजनासु प्रतिभागितायाः दृष्ट्या समतावर्धनाय च केचित्सरलीकृतविधयः स्थापयिष्यन्ते,यथा - कयाचिदेकलया संस्थया जालस्थानेन वा आवेदनस्वीकरणं विद्यार्थिभ्यः एतेषां योजन-छात्रवृत्ति-अवसराणां विनिश्चयं कुर्यात्, तथा एकलगवाक्षप्रणालीमाध्यमेन तेषामावेदनस्यापि निश्चयं कुर्यात्।

6.19 उपर्युक्ताः सकला नीतय उपायाश्च समेभ्य एसईडीजी इत्येतेभ्यः पूर्णसमावेशाय समताप्राप्त्यै च महत्त्वपूर्णा वर्तन्ते, किन्तु पर्याप्ता न। एतदर्थं विद्यालयीयसंस्कृतौ परिवर्तनमावश्यकम्। विद्यालयीयशिक्षाप्रणाल्यां सर्वेऽपि प्रतिभागिनः, येषु शिक्षकाः,

प्रधानाचार्याः, प्रशासकाः, परामर्शदातारः (काउंसलर), छात्राश्चान्तर्भवन्ति, तेऽखिलच्छात्रा-वश्यकताः, समावेशन-समताधारणाः, सर्वव्यक्तीनां सम्मानं प्रतिष्ठां निजतां च प्रति संवेदनशीला भवेयुः। एतादृशशैक्षिकसंस्कृतिः छात्रान् सबलीकर्तुम् उयुक्ततमत्साधनं वर्तते, येन सः स्वयं सबलो भूत्वा समाजं प्रति दुर्बलनागरिकं प्रति दायित्वनिर्वहणे सक्षमं करोति। समावेशनं समता च शिक्षकशिक्षायाः प्रमुखपक्षौ भविष्यतः (एवं विद्यालयेषु सकलस्य नेतृत्वस्य प्रशासनिकस्य अन्यपदसम्बद्धेषु प्रशिक्षणेषु ); अपि च सर्वच्छात्रेभ्यः उत्कृष्टस्य प्रेरणास्रोतसः (रोल मॉडल) आनयनदिशि प्रयासोऽयं करिष्यते येन एसईडीजी इत्यस्मिन् उच्चतरगुणवत्तायाः शिक्षकाणां नेतृत्वकर्तॄणां चाधिकाधिकं चयनं क्रियेत।

6.20 शिक्षकैरन्यविद्यालयीयकर्मिभिः (यथा प्रशिक्षितसामाजिककार्यकर्तारः, परामर्शदातारश्च) इत्यादिद्वारा आनीतायां नवीनायां विद्यालयीयसंस्कृतौ पाठ्यक्रमे वा आगतपरिवर्तनमाध्यमेन छात्राः संवेदनशीलाः भाविष्यन्ति। विद्यालयीयपाठ्यक्रमे प्रारम्भिकशिक्षा, मानवीयमूलाधिकृतसामग्री (यथा सकलव्यक्तिभ्यः सम्मानं, सहानुभूतिः, सहिष्णुता, मानवाधिकारः, लैङ्गिकसमानता, अहिंसा, वैश्विकनागरिकता, समावेशनं, समता च) च अन्तर्भविष्यन्ति। अस्मिन् विभिन्नसंस्कृति-धर्म-भाषा-लिङ्गाद्याधारित-परिचयादिविषयेऽधिकविस्तृतं ज्ञानमन्तर्निहितं भविष्यति, येन विविधतां प्रति सम्मानं संवेदनशीलता च विकस्यते। विद्यालयीयपाठ्यक्रमात् यःकश्चिदपि पूर्वाग्रहः रूढिवादिता च निष्कास्येते, एवं तादृशसामग्र्यधिकतया अन्तर्भावयिष्यते या सकलसमुदायेभ्यः प्रासङ्गिकी सम्बद्धा च भवति।

## 7. विद्यालयसङ्कीर्ण/समुदायमाध्यमेन समर्थसंसाधनं प्रभाविप्रशासनं च

7.1 अधुना समग्रशिक्षायोजनाधीने समाहितं सर्वशिक्षाभियानम् (एसएसए) तथा निखिलदेशस्य राज्येषु भविष्यमाणान्यप्रयासैर्देशस्य प्रत्येकस्मिन्नवासप्रदेशे विद्यालयानां स्थापना प्राथमिकविद्यालयेषु प्रायः सार्वभौमिकप्राप्तेः सुनिश्चितीकर्तुं साहाय्यमकरोदेव, किन्तु नैके अल्पसङ्ख्यच्छात्रविद्यालयाः अप्यस्तित्वं प्राप्ताः । यू-डाइज, 2016-17 इत्यस्य विवरणानुसारं भारतदेशस्य अष्टाविंशतिप्रतिशतं (28%) सर्वकारीयेषु प्राथमिकविद्यालयेषु तथा 14.8प्रतिशतमुच्चतरप्राथमिकविद्यालयेषु त्रिंशत्तोऽपि न्यूनसङ्ख्याः छात्रा एव अधीयते। प्रथमकक्षादारभ्याष्टमीपर्यन्तं विद्यालयेषु प्रतिकक्षं सामान्यतः चतुर्दश (14) छात्राः सन्ति, तथैव केषुचिद्विद्यालयेषु षट्तोऽपि न्यूनसङ्ख्याः वर्तन्ते। 2016-17 इत्यस्मिन्नध्ययनवर्षे

1,08,017 विद्यालयाः एकलशिक्षकविद्यालयाः आसन्। एतेष्वधिकांशाः (85743) 1-5कक्षीयप्राथमिकविद्यालयाः आसन्।

7.2 एतेष्वल्पसङ्ख्यीयविद्यालयेषु प्रवर्तमानेषु शिक्षकनियुक्त्या सह महत्त्वपूर्णभौतिकसंसाधनोपलब्धेर्दृष्ट्या उत्तमविद्यालयानां सञ्चालनं कष्टकरं तथा अव्यावहारिकं च जायते। शिक्षकैः प्रायो युगपन्नैककक्षाः पाठनीयाः भवन्ति, एवं नैकविषयानपि येषु तादृशा अपि विषयाः कदाचिदन्तर्भवन्ति येषां विषये पूर्वं पृष्ठभूमिः काचिन्न भवति; यथा सङ्गीत-कला-क्रीडाप्रभृतिप्रमुखविषयाः अनेकधा नैव शिक्ष्यन्ते तथा भौतिकसंसाधनानि यथा प्रयोगशाला, क्रीडोपकरणानि, पुस्तकालयीयपुस्तकानि विद्यालयेषु अल्पीयांस्येवोपलभ्यन्ते।

7.3 लघुविद्यालयानां विविक्ततायाः शिक्षायाः शिक्षकशिक्षणप्रक्रियायाश्चोपरि नकारात्मकः प्रभावः वर्तते। शिक्षकाः समुदायेषु गणेषु च भूत्वा सुष्ठु कार्यं कुर्वन्ति, तथा चेत्थमेव छात्रा अपि कार्यं विदधते। लघुविद्यालयाः शासनप्रबन्धनाभ्यां प्रणालीगतापत्तिमप्युत्थापयन्ति। भौगोलिकविघटनम्, आपत्तिपूर्णाभिगमस्थितिः, तथा विद्यालयानामधिकसङ्ख्याकत्वञ्च सकलविद्यालयान् प्रति समानरूपेण प्रापणं दुष्करं कारयन्ति। प्रशासनिकसंरचनाः विद्यालयानां सङ्ख्यगतवृद्धौ, समग्रशिक्षायोजनाया एकीकृतसंरचनायां वा न योजिताः।

7.4 यद्यपि विद्यालयानामेकत्रीकरणं कश्चिद्विकल्पो वर्तते, यदधिकृत्य सर्वदा चर्चा प्रचलति, एतत्सम्यक्तया विचारविमर्शानन्तरमेव विधातव्यम् एवं तदेव कर्तव्यं यदास्याभिगमस्योपरि कश्चित्प्रभावो न भविष्यतीति सुनिश्चितं स्यात्। एतादृशोपायानां परिणामस्वरूपेण केवलं लघुमात्रायां समेकनसम्भावना दृश्यते, एवं बृहत्सङ्ख्यायां लघुविद्यालयैर्द्वारा उपजातसंरचनात्मकसमस्यापत्तीनां समाधानं न सम्भविष्यति।

7.5 एतानि प्रत्याह्वानानि राज्य/केन्द्रशासितप्रदेशीयसर्वकारैः 2025वर्षं यावत् विद्यालयानां समूहीकरणार्थं तेषां सङ्ख्यायै समुचितरूपप्रदानाय नवीनप्रक्रियया समाधीयन्ते। एतादृशप्रक्रियायाः पृष्ठतः उद्देश्यरूपेणैतत्सुनिश्चितं कर्तव्यं यत्; (क) प्रत्येकं विद्यालये कला-सङ्गीतविज्ञान-क्रीडा-भाषा-व्यावसायिकादिविषयानध्यापयितुं पर्याप्तसङ्ख्याकाः परामर्शदातारः, प्रशिक्षितसामाजिककार्यकर्तारः, शिक्षकाः (विभाजनम् अन्यद् वा) उपस्थिताः भवेयुः, (ख) प्रत्येकं विद्यालये पर्याप्तसंसाधनानि (विभाजनम् अन्यथा वा) स्युः, यथा एकः पुस्तकालयः, विज्ञानप्रयोगशाला, सङ्गणकप्रयोगशाला,

कौशलप्रयोगशाला, क्रीडाङ्गनम्, क्रीडोपकरणानि, एतादृशव्यवस्थानि, (ग) शिक्षकच्छात्रविद्यालयानां विविक्ततायाः दूरीकरणाय समुदायैः सह अवगर्तिं निर्माय संयुक्तव्यावसायिकविकासकार्यक्रमाणां, शिक्षणाधिगमसामग्रीविनिमयस्य, संयुक्तसामग्रीनिर्माणस्य, कलाविज्ञानप्रदर्शनिनां, क्रीडागतिविधीनां, प्रश्नोत्तरिवादविवादस्पर्धानां, मेलसदृशसंयुक्तगतिविधीनाञ्चायोजनम्, तथा (घ) दिव्याङ्गबालानां शिक्षायै विद्यालयेषु सहयोगः, सहायश्च,(ङ) विद्यालयीयव्यवस्थायाः शासने परिष्काराय क्रियान्वयनसम्बद्धसूक्ष्मतानिर्णयाः विद्यालयीयसमूहस्तरे त्याज्याः, यत्र ते स्थानीयस्तरे प्रधानाचार्यैः, शिक्षकैः, अन्यहितधारकैः च स्वीकर्तव्याः - तथा चाधाराभूतस्तरात् माध्यमिकस्तरपर्यन्ताः विद्यालयसमूहा एकीकृतार्धस्वायत्तविभागरूपेण द्रष्टव्याः।

7.6 उपर्युक्तानां साधनाय कश्चित्सम्भाविततन्त्रं वर्तते विद्यालयपरिसरनामकः, कस्याश्चित्समूहनसंरचनायाः स्थापना करिष्यते, यत्रैको माध्यमिकविद्यालयो भविष्यति यदधीने पञ्चारभ्य दशकिलोमीटरपर्यन्तदेशे आङ्गनवाडी-केन्द्रैः सह समीपस्थनिम्नस्तरीयप्रस्तावकान्यसकलविद्यालया वर्तिष्यन्ते। अयम्प्रस्तावः सर्वप्रथमतया शिक्षायोग(1964-66)द्वाराऽदायि किन्त्वस्य कार्यान्वयीकरणं न जातम्। नीतिरियं यत्रापि सम्भवा, विद्यालयपरिसराणां/समूहानां विचारस्य दृढतया समर्थनं करोति। विद्यालयपरिसरस्य/समूहस्य उद्देश्यानि अधिकसंसाधनदक्षता तथा समूहे विद्यालयानामधिकप्रभाविकार्याणि, समन्वयः, नेतृत्वं, शासनं प्रबन्धनञ्च भविष्यन्ति।

7.7 विद्यालयपरिसराणां/समूहानां वा निर्माणेन तथा परिसरेषु संसाधनानां सम्विभक्तोपयोगेनान्येऽपि लाभाः केचिज्जायेरन्, यथा दिव्याङ्गबालेभ्यः उत्कृष्टसहयोगः, नानाविविधविषयाधारितानां विद्यार्थिसङ्घानां, तथा विद्यालयपरिसरेषु शैक्षणिक/क्रीडा/कला/शिल्पाद्याधारितानां कार्यक्रमाणामायोजनम्, कलासङ्गीतभाषाशारीरिकशिक्षादीनां शिक्षकाणां सम्विभक्ततयोपयोगेन कक्षायां वास्तवकक्षाणामायोजनाय आईसीटी-उपकरणानामुपयोगेन सह एतादृशगतिविधीनाम् अधिकतया समावेशः, सामाजिककार्यकर्तॄणां परामर्शदातॄणाञ्च साहाय्येन विद्यार्थिभ्यः उत्कृष्टसहयोगोपलब्धिस्तथा साधुतरनामाङ्कनम्, उपस्थित्युपलब्धिषु परिष्कारः, तथा विद्यालयपरिसरप्रबन्धनसमितीनां (केवलं विद्यालयप्रबन्धनसमितीनां स्थाने) माध्यमेन

उत्तमं सशक्तं च शासनं, निरीक्षणं, सर्वेक्षणं, नवाचारः, तथा स्थानीयहितधारकैः स्वीक्रियमाणपदानि। विद्यालयानां, विद्यालयप्रमुखानां, शिक्षकाणां, विद्यार्थिनां, सहयोगिकर्मचारिणां, मातापित्रोः, स्थानीयनागरिकाणां च बृहत्सक्रियसमूहाधारेण संसाधनानां कुशलतयोपयोगेन सह सम्पूर्णशिक्षाव्यवस्था उर्जावती समर्था च भविष्यति।

7.8 विद्यालयपरिसर/समूहव्यवस्थया विद्यालयानां शासनं परिष्कृतं कुशलमपि भविष्यति । आदौ डीएसई विद्यालयपरिसर/समूहस्तरे अधिकारं दास्यति, यदर्धस्वायत्तसंस्थारूपेण कार्यं करिष्यति। जनपदीयशिक्षाधिकारी (डीईओ) खण्डशिक्षाधिकारी प्रत्येकं विद्यालयपरिसरं/समूहं चैकं घटकरूपेण स्वीकृत्य तेन सह कार्यं करिष्यतः। परिसरो डीएसई-द्वारा प्रदत्तदायित्वानि विधास्यन्ति तथा तदधीने आगम्यमानः प्रत्येकं विद्यालयः समन्वयं करिष्यति। डीएसईद्वारा विद्यालयपरिसर/समूहेभ्यः पर्याप्तस्वायत्तता प्रदास्यते, यद्बलेन ते राष्ट्रीयपाठ्यचर्यातन्त्रस्य (एनसीएफ) तथा राज्यीयपाठ्यचर्यातन्त्रस्य चानुपालनं कुर्वन्तः, समन्वितशिक्षां प्रादनदिशायामावश्यकरचनात्मकपदानि स्वीकर्तुं शक्तानि, तथा पाठ्यचर्या शिक्षणशास्त्रस्तरे प्रयोगधर्मिणी स्यात्। एतत्सङ्घटानाधीने विद्यालयाः सशक्ता भविष्यन्ति, अधिकतया स्वायत्ततापूर्वकं कार्यं कर्तुं प्रभविष्यन्ति तथानेन परिसरा अधिकनवाचारिणः दायित्ववन्तश्च भविष्यन्ति। कालेऽस्मिन् डीएसई बृहत्स्तरीयलक्ष्याणामुपरि ध्यानं दातुं शक्ष्यति येन कृत्स्नशिक्षाव्यवस्थायाः प्रभाविता परिष्कृता स्यात्।

7.9 एतैः परिसरैः/समूहैश्च द्वारा उभयोर्दीर्घकालिकाल्पकालिकयोस्सन्दर्भयोर्योजनाबद्धरूपेण केनचिदेकेन विधिना कार्यसम्पादनस्य संस्कृतेर्विकासः करिष्यते। विद्यालया एसएमसी इत्यस्य साहाय्येन स्वयोजनाः (एसडीपी) निर्मास्यन्ति। विद्यालयानां योजनाधारेण विद्यालयपरिसर/समूहविकासयोजनाः (एससीडीपी) निर्मास्यन्ते। एससीडिपी इत्यस्मिन् परिसरसम्बद्धानाम् अन्यसकलसंस्थानानां (यथा व्यावसायिकशिक्षासंस्थानम्) योजना अन्तर्भविष्यति, तथा एतां परिसरप्रधानाचार्यः, शिक्षकाश्च एससीएमसी इत्यस्य साहाय्येन साधयिष्यन्ति, एवमेव योजनेयं सार्वजनिकरूपेण उपलभ्यते। योजनायामस्यामन्तर्भविष्यन्ति-मानवसंसाधनम्, शिक्षण-अधिगमसंसाधनम्, भौतिकसंसाधनम्, तथा मूलभूतसंरचना(इन्फ्रास्ट्रक्चर)परिष्काराय स्वीक्रियमाणोपक्रमाः, वित्तीयसंसाधनम्, विद्यालयसंस्कृतिविकासोपक्रमाः, शिक्षकक्षमतासंवर्धनयोजना, तथैव शैक्षणिकपरिणामसम्बद्धलक्ष्याणि च। अनया योजनया सक्रियाधिगमसमुदायानां विकासाय परीसरीयशिक्षकविद्यार्थिसमूहानुत्तोलयितुं क्रियमाणप्रयासा विस्तारयिष्यन्ते। एसडीपी तथा

एससीडीपी इत्येते तादृशे माध्यमे स्तो याभ्यां डीएसई-आरभ्य सकलहितधारका मिथोयोगं संस्थापयिष्यन्ति। एसएमसी तथा एससीएमसी, एसडीपी तथा एससीडीपी इत्येतयोरुपयोगं विद्यालयीयकार्यप्रणालीं दिशां चेक्षितुं करिष्यतः, तथा योजनानां क्रियान्वयने सहयोगञ्च करिष्यतः। डीएसई, बीईओ-सदृशाधिकारिद्वारा प्रत्येकं विद्यालये एससीडीपी इत्यस्य स्वीकृतिं दास्यति। तदनन्तरं, डीएसई एतासां योजनानां सफलतायै, अल्पावध्यर्थं (एकवर्षाय) तथा दीर्घावध्यर्थं (3-5वर्षेभ्यः) संसाधनानि (वित्तीय-मानव-भौतिकादीनि) उपलम्भयिष्यति। शैक्षणिकोपलब्धिप्राप्त्यार्थमन्यप्रासङ्गिकसहयोगश्च तैः प्रदास्यते। डीएसई तथा एससीईआरटी समस्तविद्यालयैः सह एसडीपी तथा एससीडीपी इत्येतयोर्विकासाय विशेषमानकम् (उदाहरणार्थं वित्तीय-कर्मचारि-प्रक्रियासम्बन्धि) तथा संरचनाञ्च उपलभ्यन्ते येषां समये समये संशोधनं भविष्यति।

7.10 वैयक्तिक-सार्वजनिकविद्यालयैः सह सकलविद्यालयेषु मध्ये परस्परसहयोगं तथा सकारात्मकसमन्वयञ्च संवर्धयितुं च आराष्ट्रे एको वैयक्तिकविद्यालयः एकेन सार्वजनिकविद्यालयेन सह परस्परं सम्बद्धीकरिष्यते येन एतादृशसम्बद्धविद्यालयाः परस्परसंयोगेन अधीतुं शक्नुयुः, तथैव अपरस्य संसाधनैरपि लाभान्विताः भवेयुः। यत्र सम्भवति, एतदुभविधविद्यालयानां सुष्ठ्वभ्यासस्याभिलेखीकरणं करिष्यते, वितरणं च करिष्यते तथा ते सर्वकारीयविद्यालयानां स्थापितप्रक्रियासु अन्तर्भाविष्यन्ते।

7.11 प्रत्येकं राज्यं जनपदं वा प्रोसाहिष्यते, येन तद् बालभवनं संस्थापयेत् यत्र सर्ववयस्कबालाः सप्ताहे एकवारमधिकवारं वा (उदाहरणार्थं सप्ताहान्ते) गन्तुं शक्नुयुः तथा कलाक्रीडाजीविकासम्बद्धगतिविधिषु प्रतिभागित्वं कुर्युः। एतादृशबालभवनानि यत्र शक्यं तत्र विद्यालयपरिसरस्य/समूहस्य अङ्गा अपि भवितुमर्हन्ति।

7.12 सम्पूर्णसमुदायेभ्यो विद्यालयः सम्मानस्य उत्सवस्य च स्थानं स्यात्। संस्थानरूपेण विद्यालयस्य प्रतिष्ठा पुनःस्थापिता क्रियेत, तथा विद्यालयस्थापनादिवससदृशा महत्त्वपूर्णदिवसाः समुदायेन सह मिलित्वा आचर्येत। दिवसेऽस्मिन् विद्यालयस्य भूतपूर्वविशिष्टविद्यार्थिनां सूचिप्रदर्शनं स्यात्, तथा तेषां सम्माननमपि विधीयेत। उपयोगानार्हेषु समयेषु दिनेषु वा विद्यालयस्य भौतिकसुविधानामुपयोगः समुदायस्य बौद्धिकसामाजिकस्वयंसेविगतिविधीनामायोजनाय तथा सामाजिकमेलनादिभ्यश्च कर्तव्यो येन विद्यालयः किञ्चित्सामाजिकचेतनाकेन्द्ररूपेण भूमिका निर्वहेत्।

## 8. विद्यालयीयशिक्षार्थं मानकनिर्धारणं प्रत्यायनं च

8.1 विद्यालयीयशिक्षानियामकप्रणाल्या लक्ष्यं शैक्षिकपरिणामेषु निरन्तराभिवृद्धिर्वर्तते; इयं विद्यालयान् नवाचारांश्च सीमितमर्यादायां न स्थापयिष्यति, अथवा शिक्षकाणां, प्रधानाचार्याणां, तथा विद्यार्थिनां चोत्साहसाहसयोर्बाधां नोत्थापयिष्यति। आहत्य, विनियमनं विद्यालयान् शिक्षकान् च विश्वासेन सह सशक्तान् कर्तुं लक्ष्यं स्थापयेत्, येन चे उत्कृष्टतायै प्रयासं कर्तुं शक्नुयुः, तथा सर्वश्रेष्ठप्रदर्शनं कर्तुं शक्नुयुः तथैव सकलवित्तप्रक्रियाशैक्षिकपरिणामानां पूर्णपारदर्शितया सह सार्वजनिकीकरणमाध्यमेन प्रणाल्याः अखण्डता निश्चीयते।

8.2 अधुना विद्यालयशिक्षाप्रणाल्यां, सार्वजनिकशिक्षायाः प्रावधानेन, समस्तशैक्षणिकसंस्थानानां नियमनेन, तथा नीतीनां निर्माणेन च सह सम्बद्धकार्याणि एकलनिकायेन अर्थाद्विद्यालयशिक्षाविभागेन अथवा तदङ्गैः वा सम्पादिष्यन्ते, यत्परिणामः शक्त्याः सशक्तकेन्द्रीकरणरूपेण तथा हितानां सम्पातरूपेण पुरतः आयाति। अपरश्चास्य परिणामो विद्यालयीयप्रणाल्याः अप्रभाविप्रबन्धनरूपेणाप्युपस्थितो भवति, यतोहि शिक्षाप्रावधानैः सम्बद्धप्रयासः, विद्यालयशिक्षाविभागद्वारा आवश्यकरूपेण निर्वाह्यमाणविनियमनवशात्तथा एतादृशस्वभूमिकावशाच्च अधिकांशः स्वलक्ष्याद्विचलितो जायते।

8.3 वर्तमाननियमाकव्यवस्था लाभायोद्घाटितैः अधिकांशैः (फॉर-प्रोफिट)सर्वकारेतरविद्यालयैः बृहत्स्तरे क्रियमाणस्य शिक्षाव्यावसायीकरणस्य तथा पोषकाणमार्थिकशोषणस्य च नियन्त्रणं कर्तुं नापारयत्, तथैव भृशमज्ञात्वा सार्वजनिकहितेभ्यः समर्पितसर्वकारेतर/परोपकारिविद्यालयान् हतोत्साहितांश्च करोति। सार्वजनिकविद्यालयानां सर्वकारेतरविद्यालयानं मध्ये आवश्यकनियामकदृष्टिः अत्यधिकविषमता वर्तते, यद्यर्युभयविधविद्यालयानां लक्ष्यमेकमेव भवेत् यत् गुणवत्ताशिक्षायाः प्रदानम्।

8.4 सार्वजनिकशिक्षाप्रणाली सक्रियलोकतान्त्रिकसमाजस्याधारभूता वर्तते, तथा च देशाय उच्चस्तरीयशैक्षणिकपरिणामप्राप्त्यर्थमस्याः सञ्चालनविधीनां परिवर्तनं सुदृढीकरणञ्च अत्यावश्यकं विद्यते। अनेनैव सह सर्वकारेतर/परोपकारिविद्यालयानामपि महत्त्वपूर्णकार्यार्थं भूमिकाया निर्वहणाय प्रोत्साहनं सक्षमीकरणञ्च कर्तव्यम्।

8.5 विद्यालयशिक्षाप्रणाल्या सम्बद्धदायित्वानां, तथा तद्विनियमनेन सम्बद्धदृष्टेः च विषये अस्याः नीत्याः प्रमुखसिद्धान्ताः विशेषसूचनाश्चेत्थं वर्तन्ते :

क) विद्यालयशिक्षाविभागः, यो विद्यालयशिक्षायां सर्वोच्चराज्यस्तरीयनिकायो वर्तते, सार्वजनिकशिक्षाप्रणाल्या निरन्तरपरिष्कारार्थं समग्रतया निरीक्षणार्थं च, तथा नीतिनिर्धारणास्योत्तरदायी भविष्यति; अयं सार्वजनिकविद्यालयानां परिष्करणस्योपरि लक्ष्यस्थापनाय तथा हितानां मिथःसङ्घातन्यूनीकरणाय विद्यालयनिबन्धनसञ्चालनाभ्यां सह विद्यालयविनियमने वा अन्तर्गतो न भविष्यति।

ख) सम्पूर्णराज्यस्य सार्वजनिकविद्यालयीयप्रणाल्याः सेवानिबन्धनस्य शैक्षिकसञ्चालनस्य च उत्तरदायित्वं विद्यालयशिक्षानिदेशालयस्य भविष्यति (यस्मिन् डीईओ, बीईओ आदयोऽन्तर्भूताः)। अयं शैक्षिकसञ्चालनेन निबन्धनेन च सम्बद्धनीतीनां क्रियान्वयनं स्वतन्त्ररूपेण करिष्यति।

ग)प्राग्विद्यालयीयशिक्षा-सर्वकारेतरसार्वजनिकपरोपकारिसहितशिक्षाचरणेषु आवश्यकगुणवत्ता -पूर्णमानकानाम् अनुपालनं निश्चेतुं प्रभाविनः कस्यचिद्गुणवत्तापूर्णविनियमनस्य मान्यताप्रणाल्याः वा स्थापनं करिष्यते। अमुं निश्चयं कर्तुमेतद्यत् सर्वेऽपि विद्यालयाः किञ्चिन्न्यूनतमव्यावसायिकगुणवत्तापूर्णमानकानां पालनं कुर्वन्तीति राज्य/केन्द्रशासितप्रदेश -राज्यविद्यालयमानकप्राधिकरणनामकः (एसएसएसए) स्वतन्त्रः कश्चित् राज्यव्यापिनिकायः संस्थापयिष्यते। एसएसएसए केषाञ्चिन्मौलिकमानकानां (यथा क्षेमः, सुरक्षा, आधारभूतसंरचना, कक्षा विषयांश्चाधारितशिक्षकसङ्ख्या, वित्तीयनिष्कपटता तथा शासनायोपयुक्तप्रक्रिया) विषये न्यूनतममानकानां स्थापना करिष्यते, येषां पालनं सकलैरपि विद्यालयैः कर्तव्यम्। एससीईआरटी-द्वारा विभिन्नेभ्यो हितधारकेभ्यः, विशेषरूपेण शिक्षकेभ्यः, तथा विद्यालयेभ्यः परामर्शं स्वीकृत्य प्रत्येकं राज्याय एतादृशमापदण्डानां रूपरेखा साधयिष्यते।

सार्वजनिकनिरीक्षणाय उत्तरदायित्वार्थं च एसएसएसए-द्वारा निर्धारितसकलमौलिकसूचनानां पारदर्शि सार्वजनिकस्वप्रकटीकरणं बृहत्स्तरे उपयोक्ष्यते। येष्वायामेषु सूचनानां स्वप्रकटीकरणं कर्तव्यम्, तथा प्रकटीकरणस्य प्रारूपम् एसएसएसए-द्वारा विद्यालयेभ्यः मानकनिर्धारणं विश्वे क्रियमाणश्रेष्ठोपक्रमाणामनुसारेण निर्धारिष्यते। सूचना इमाः सकलविद्यालयैर्नवीकरिष्यन्ते, तथा स्वीयेषु सार्वजनिकेषु च जालपुटे (यानि एसएसएसए-द्वारा सञ्चाल्यन्ते) दर्शनीयाः। सार्वजनिकडोमेन इत्यस्मात् स्वीकृतानां अथवा

सार्वजनिकजीवनसम्बद्धहितधारकाणामन्यजनानां वा कस्यचिदप्यावेदनस्याक्षेपस्य वा समाधानम् एसएसएसए-द्वारा करिष्यते। नियमितान्तरालेषु चितच्छात्रेभ्यः केभ्यश्चिद् अन्तर्जालमाध्यमेन प्रतिक्रियाः स्वीकरिष्यन्ते येन नियमितान्तरालेषु महत्त्वपूर्णदिग्दर्शनं प्राप्येत। एसएसएसए इत्यस्य समस्तकार्येषु दक्षतां पारदर्शितां विनिश्चेतुं प्रौद्योगिक्याः समुचितरूपेण प्रयोगः करिष्यते। अनेन विद्यालयैर्द्वारा वर्तमानकाले वहमाननियामकजनादेशेषु महल्लाघवं भविष्यति।

घ) राज्ये शैक्षणिकमानकैः पाठ्यक्रमैः सहितशैक्षणिकविषयाः एससीईआरटी (यत् एनसीईआरटी इत्यनेन सह परमार्शसहयोगयोः कृते निकटस्थरूपेण युक्तं भविष्यति) इत्यस्य नेतृत्वे द्रक्ष्यन्ते यत्संस्थानरूपेण सुदृढं भविष्यति। एससीईआरटी सकलहितधारकैः सार्धं व्यापकपरामर्शमाध्यमेन एकं विद्यालयगुणवत्तामूल्याङ्कनप्रत्यायनसंरचनां (एसक्यूएएएफ) सिद्धां करिष्यति। सीआरसी, बीआरसी तथा डीआईईटी चैतत्समसंस्थानानि पुनर्जीवितानि कर्तुं एससीईआरटी एकस्याः परिवर्तनप्रबन्धनप्रक्रियायाः अधीने कार्यं करिष्यति या च वर्षत्रयाभ्यन्तरे एतेषां क्षमतां कार्यसंस्कृतिञ्च परिष्कृत्य उत्कृष्टताया जीवन्तसंस्थानरूपेण स्थापयिष्यते। एतदभ्यन्तरे विद्यालयत्यागस्तरस्य छात्राणां दक्षतानां प्रत्यायनं प्रत्येकं राज्ये प्रत्यायन/परीक्षासंस्थया नियन्त्रयिष्यते।

8.6 विद्यालयान्, संस्थानानि, शिक्षकान्, अधिकारिणः, समुदायान्, अन्यहितधारकांश्च सशक्तान् कर्तुं तथा एतान् संसाधानैः परिपूर्णान् कर्तुञ्च कार्यक्रियमाणसंस्कृतिसंरचनाव्यवस्था इत्येतेषां सकलानामप्युत्तरदायित्वं सुनिश्चेतव्यम्।प्रत्येकं हितधारकः तथा शिक्षाप्रणाल्यां सहभागिभूता जनाः उच्चस्तरीयनिष्कपटता-पूर्णप्रतिबद्धतानुकरणीयकार्यनीतिभिः सह स्वभूमिकानिर्वाहायोत्तरदायी भवति। व्यवस्थायाः प्रत्येकं भूमिकातः काः अपेक्षाः वर्तन्त इति स्पष्टरूपेण व्यक्तीकरिष्यन्ते तथैतादृशापेक्षाणां हितधारकाणां कार्याणां मूल्याङ्कनं गहनविधिना करिष्यते। उत्तरदायित्वं सुनिश्चितं कुर्वती मूल्याङ्कनप्रणाली आत्मानमुद्देश्यपूर्णविकासोन्मुखप्रक्रियारूपेण विकासिष्यति। अत्र प्रतिक्रियायाः मूल्याङ्कनस्य च नैकानि स्रोतांसि भविष्यन्ति प्रदर्शनविषये सम्पूर्णसूचनानि सुनिश्चेतुं (तथा उदाहरणार्थं छात्राणामङ्कैः सह केवलं सरलीकृतरूपेण न योजिष्यन्ते)। मूल्याङ्कनेनैतज्ज्ञास्यते यत् छात्राणां शैक्षिकप्राप्तिसदृशपरिणामेषु नैके अतिपातः बाह्यप्रभावाश्च सन्तीति। एतदपि प्रमाणीकरिष्यते यच्छीक्षायै विशेषतो विद्यालयस्तरे संभूय गणशः कार्याण्यावश्यकानीति। सकलव्यक्तीनां पदोन्नतिः मान्यतोत्तरदायित्वसदृशप्रदर्शनमूल्याङ्कनाधारिता भविष्यति। समस्ता अप्यधिकारिण एतत्सुनिश्चेतुमुत्तरदायिनो वर्तिष्यन्ते यत् विकासप्रदर्शनोत्तरदायित्वप्रणाली उच्चतराखण्डतया सह तथा व्यवस्थितरूपेण च तन्नियन्त्रणे स्थिता सती समुचितरूपेण स्वकार्याणि कुर्यादिति।

8.7 सार्वजनिकानां सर्वकारेतराणाञ्च विद्यालयानां (केन्द्रसर्वकारद्वारा प्रबन्धितान् / सहायताप्राप्तान् / नियन्त्र्यमाणान् विद्यालयान् अतिरिच्य) मूल्याङ्कनं प्रत्यायनञ्च समानमापदण्ड-आदर्शमान-प्रक्रियाणामाधारेण करिष्येते येन अन्तर्जालमाध्यमेन तथा ऑफलाइन सार्वजनिप्रकटीकरणस्य पारदर्शितायाश्चोपरि बलं दीयते येनैत्तसुनिश्चितं कर्तुं शक्नुयाद् यत्सार्वजनिकहितकारिसर्वकारेतरविद्यालयाः प्रोत्साह्येरन् तथा कीदृश्यपि बाधा नोत्पद्येत। गुणवत्तपूर्णशिक्षायै सर्वकारेतरपरोपकारिप्रयासाश्च प्रोत्साहिष्यन्ते - येन च शिक्षा या सार्वजनिकसेवा वर्तते सर्वेभ्यस्तस्याः प्रावधानं स्यात् एवं मातापित्रोः समुदायानां वा प्रशिक्षणशुल्ककगतयथेष्टवृद्धितः सुरक्षायै अपि प्रयासाः करिष्यन्ते। विद्यालयानां जालपुटे तथा एसएसएसए इत्यस्यापि अन्तर्जाले सर्वकारेतरसार्वजनिकोभयविद्यालयानां सूचनाः सार्वजनिकाः कारिष्यन्ते - यासु (न्यूनातिन्यूनम्) कक्षाच्छात्रशिक्षकसङ्खानां सूचना पाठ्यमानविषयाः यः शुल्कविवरणं तथा एनएएस एसएएस सदृशमानकीकृतमूल्याङ्कनस्य आधारेण विद्यार्थिनां समग्रपरिणामाश्च अन्तर्भाविष्यन्ते। केन्द्रसर्वकारद्वारा नियन्त्रितेभ्यः / प्रबन्धितेभ्यः / प्राप्तसहायतेभ्यश्च विद्यालयेभ्यः सीबीएसई शिक्षामन्त्रालयः इत्यनयोः परामर्शेन काचित्संरचना (फ्रेमवर्क) निर्मास्यते। सर्वाण्यपि शेक्षणिकसंस्थानानि ‘लाभार्थं न’ इत्यस्य रूपेण लेखापरीक्षा-समानप्रकटीकरणमानकानामनुसारेण स्वीकरिष्यन्ते। अवशिष्टं चेच्छैक्षिकक्षेत्रे तस्य पुनर्निवेशः करिष्यते।

8.8 विद्यालयविनियमनप्रमाणनशासनेभ्यः निश्चितमानक/विनियामकसंरचनाः सुगमप्रणाल्याश्च समीक्षा करिष्यते येन पूर्वदशके प्राप्तपाठानामनुभवानाञ्चाधारेण परिष्काराः क्रियेरन्। अस्याः समीक्षायाः उद्देश्यं - सर्वेभ्यश्छात्रेभ्यः विशेषतः साधनेभ्यो वञ्चितविभागीयच्छात्रेभ्यः उच्चगुणवत्ता-समतापूर्णविद्यालयीयशिक्षा आरम्भिकबाल्यावस्थायां सम्पोषणाच्छिक्षायाश्चारभ्य (त्रिवर्षीयायुषि) उच्चतरमाध्यमिकशिक्षापर्यन्तं(अर्थात् द्वादशीकक्षापर्यन्तम्) निःशुल्कमनिवार्या च स्यात्। आदानेष्वधिकबलप्रदानं तथा विनिर्देशानां यान्त्रिकी प्रकृतिः भौतिकं संरचनात्मकता च परवर्तिष्यन्ते तथा लौकिकापेक्षाभ्यः वास्तविकेभ्यश्च अधिकसंवेदनशीलाः कारयिष्यन्ते उदाहरणार्थं भूमिक्षेत्राणां प्रकोष्ठानाञ्चाकारः, नगरस्थक्षेत्रेषु क्रीडाङ्गनानां व्यावहारिकता इत्यादीनां विषये। एतादृशव्यवस्थाः समायोजिताः शिथिलाश्च करिष्यन्ते येन सुरक्षायुक्तं भीतिरहितं सुखदमुत्पादकमधिगमस्थलं सुनिश्चेतुं प्रत्येकं विद्यालयेन स्थानीयापेक्षाणां बाधानां चाधारेण स्वनिर्णयान् स्वीकर्तुम् अपेक्षितानम्या प्राप्स्यते। शैक्षिकपरिणामेषु तथा वित्तीयशैक्षणिकपरिचालनविषयेषु पारदर्शिप्रकटीकरणायोचितं महत्त्वं दास्यते तथा विद्यालयानां मूल्याङ्कने उपयुक्तरूपेणान्तर्भावः करिष्यते। अनेन सकलबालेभ्यो निःशुल्कं न्यासङ्गतायास्तथा गुणवत्तपूर्णायाश्च प्राथमिकमाध्यमिकशिक्षायाः सुनिश्चितीकरणस्य

सततविकासलक्ष्यं 4 (एसडीजी) इत्यस्य प्राप्तेः दिशि भारतप्रगत्यामितोऽपि परिष्कारः सम्भविष्यति।

8.9 सार्वजनिकविद्यालयीयशिक्षाप्रणाल्याः उद्देश्यमुच्चतमगुणवत्तापूर्णशिक्षाप्रदानं वर्तिष्यते येनायं स्वबालान् बालाश्च शिक्षयितुं जीवनस्य सकलक्षेत्रेभ्यः मातापितृभ्यां सर्वाधिकाकर्षको विकल्पो जायेत।

8.10 समये समये समग्रप्रणाल्याः आवधिकनिरीक्षणसर्वेक्षणाभ्यां, छात्राणामध्ययनस्तराणामेकमादर्शं सामान्यमाधारीकृत्य राष्ट्रिय-उपलब्धिसर्वेक्षणं प्रस्तावितनूतनराष्ट्रियमूल्याङ्कनकेन्द्रेण परखाख्येन एनसीईआरटीसदृशैरन्यसर्वकारीयनिकायैः सह अपेक्षितसहोगेन च सह करिष्यते। येन नैकेषु कार्येषु यथा सूचनाविश्लेषणं तथैव मूल्याङ्कनप्रक्रियासु च साहाय्यं प्राप्स्यते। मूल्याङ्कने सर्वकारीयैः साकं सर्वकारेतरविद्यालयानां छात्रा अप्यन्तर्भावयिष्यन्ते। राज्यानि स्वस्वजनगणनाधारितस्य राज्यमूल्याङ्कनसर्वेक्षणस्य (एसएएस) सञ्चालनं कर्तुं प्रोत्साहिष्यन्ते । यत्परिणामानामुपयोगः केवलं विकासोद्देश्येभ्यः करिष्यते विद्यालयीयशिक्षाप्रणाल्या निरन्तरपरिष्काराय तेषां समग्रस्य तथा विद्यालयानाञ्च परिचयमप्रकटय्य तेषां परिणामाः विद्यालयैः सार्वजनिकाः करिष्यन्ते। प्रस्तावितनूतनमूल्याङ्कनकेन्द्रस्य परखाख्यस्य स्थापनापर्यन्तं एनसीईआरटी एनएएस इत्येतत्प्रवर्तयितुं शक्नोति।

8.11 अन्ते च, विद्यालयेषु नामाङ्किता बालाः शिशवश्च इमां पूर्णप्रक्रियां न विस्मरेयुः यत् इयं विद्यालयप्रणाली तेभ्यः एव संरचिता इति। तेषां सुरक्षा-अधिकारादिसम्बद्धविषयेऽवधानं विशेषरूपेण बालिकाभिस्तथा किशोरैः सम्मुखीक्रियमाणेषु गम्भीरविषयेषु यथा मादकद्रव्यानां सेवनं, तथा नैकप्रकारकभेदभावाः, उत्पीडनानां प्रतिवेदनं, बालानां किशोराणां वा अधिकाराणां सुरक्षायाः वा विरोधे यत्किञ्चित्प्रकारकोल्लङ्घनस्योपरि प्रतिक्रियार्थं स्पष्टसुरक्षितकुशलतन्त्रेण सह प्रणाल्या सर्वोच्चमहत्त्वं प्रदातव्यम्। एतादृशतन्त्राणां विकासो यः सकलच्छात्रेभ्यः प्रभावी सामयिकः सर्वविदितश्च स्यात् ।

## भाग II. उच्चशिक्षा

## 9. गुणवत्तापूर्णः विश्वविद्यालयो महाविद्यालयश्च : भारतीयोच्चशिक्षाव्यवस्थार्थं नूतनस्तथा भविष्योन्मुखीनी दृष्टिः -

9.1 उच्चशिक्षा मानवानां समाजस्य च कल्याणविकासाभ्यामत्यावश्यकभूमिकां निर्वहति । यथास्माकं संविधानं भारतमेकं लोकतान्त्रिकं न्याय्यपूर्णं सामाजिकरूपेण सशक्तं सुसंस्कृतं

मानवतापूर्णं च राष्ट्रं निर्माति तथा सर्वेषां कृते न्याय-स्वातन्त्र्य-समानता-बन्धुत्वभावनाभिः सह उच्चशिक्षा विकसिता स्यादिति परिकल्पना कृता । एकस्य सुव्यवस्थितार्थिकतापूर्णस्य सुन्दरराष्ट्रस्य निर्माणे आजीविकायाः स्थायित्वदाने चोच्चशिक्षा महत्त्वपूर्णं योगदानं करोति । भारतं यथा ज्ञानाधारितम्, आर्थिकोन्मुखम्, समाजोन्मुखं विकासशीलं च वर्तते तथा अधिकसंख्याकाः भारतीययुवानः उच्चशिक्षां प्रति आकृष्टाः भूत्वा समायान्ति ।

9.1.1 एकविंशतितमशतकस्य आवश्यकताः मनसि निधायोच्यते यद्गुणवत्तापूर्णोच्चशिक्षायाः उद्देश्यम् उत्तम-चिन्तनशील-बहुमुखिप्रतिभावतां क्रियशीलजनानां विकासः भवेत् । अनेन व्यक्तिः / जनः एकस्मिन् अथवा अनेकेषु विशिष्टक्षेत्रेषु गाढमध्ययनं कर्तुं सक्षमः भविष्यति । एवमेव चारित्रिक-नैतिक-सांविधानिकमूल्येषु, बौद्धिकजिज्ञासायां, वैज्ञानिकमनोभावे, रचनात्मकतायां, सेवाभावनायाम्, एकविंशतितमशतकस्य क्षमतासु यथा विज्ञान-सामाजिकविज्ञान-कला -मानवता - भाषा - व्यावसायिक - प्राविधिकैश्च विषयैः सह विभिन्नविषयेषु क्षमतोत्पादनं विकासं च कारयेत् । उच्चगुणवत्ताशिक्षया वैयक्तिकोपलब्धिः, ज्ञानं, रचनात्मकता, सार्वजनिकसहभागिता, समाजे उत्पादकयोगदानं चोत्तमं सक्षमं च भवेत् । अनेन छात्राणां सार्थकं सन्तोषजनकं च जीवनं सम्पाद्य कार्यकरणे योग्यतां सिद्धतां च कारयित्वा आर्थिकरूपेण स्वतन्त्राः सक्षमाश्च छात्राः निर्मातव्याः ।

9.1.2 व्यक्तीनां सर्वाङ्गीणविकासस्य उद्देश्यार्थमावश्यकमस्ति यत् पूर्वप्राथमिकविद्यालयतः उच्चशिक्षापर्यन्तम् अधिगमस्य प्रत्येकस्मिन् सोपाने कौशलानां मूल्यानां च एका सुनिश्चिता पद्धतिः समायोजिता स्यात् ।

9.1.3 सामाजिकस्तरे उच्चशिक्षायाः उद्देश्यं भवति यद्राष्ट्रं प्रबुद्धं सामाजिकरूपेण जागृतं ज्ञानपूर्णं सक्षमं च करणीयं भवेद्यतः प्रजानामुद्धाराय स्वकीयसमस्यानां साधुसमाधानान्वेषणेन अनुप्रयोगः शक्यते । उच्चशिक्षा देशे ज्ञाननिर्माणस्य नवाचारस्य च आधारः भूत्वा राष्ट्रियार्थव्यवस्थायाः विकासे महत्त्वपूर्णभूमिकां निर्वहति । अतः उच्चशिक्षायाः उद्देश्यं न केवलं वैयक्तिकोद्योगावसरसृष्टिः अपि तु अधिकसचेतनसमाजेन सम्बद्धसहकारिसमुदायैः सह मिलित्वा एकस्य सुसन्तुष्टस्य सामञ्जस्यपूर्णस्य सुसंस्कृतस्य उत्पादकस्य अभिनवस्य प्रगतिशीलस्य समृद्धस्य च राष्ट्रस्य प्रतिनिधित्वसम्पादनम् ।

9.2 वर्तमानभारतस्य उच्चशिक्षाप्रणाल्यामधोलिखिताः काश्चन प्रमुखसमस्याः सम्मिलिताः ।

क. गम्भीरतया खण्डितोच्चशैक्षिकपरिस्थितिव्यवस्था ।

ख. संज्ञानात्मककौशलानां विकासे अधिगमफलितांशानां न्यूनमहत्त्वम् ।

ग. विषयाणां कठोरविभाजनेन छात्राणां पूर्वार्जितविस्तृतज्ञानक्षेत्रात् सङ्कीर्णक्षेत्रं प्रति प्रेषणम्

घ. प्रादेशिकभाषामाध्यमेन बोध्यमानोच्चशिक्षासंस्थासु आर्थिकरूपेण सामाजिकरूपेण च सौलभ्यवञ्चितप्रदेशेषु सीमितप्रवेशावसरः ।

ङ. शिक्षकाणामभावः संस्थागतस्वायत्तता च ।

च. योग्यताधारितवृत्तिप्रबन्धनस्य सङ्कायस्य नायकानां च प्रगत्यर्थमपर्याप्तव्यवस्था ।

छ. बहुशः विश्वविद्यालयेषु महाविद्यालयेषु चानुसन्धानकार्याणामल्पमहत्त्वम्, विषयाणां स्पर्धात्मकपुनरीक्षितशोधनिधीनां न्यूनता च ।

ज. उच्चशिक्षासंस्थानेषु सक्षमनेतृत्वशासनयोरभावः ।

झ. प्रभावहीननियामकप्रणाली ।

ञ. एवञ्च बहूनां विश्वविद्यालयानां स्नातकस्तरीयशिक्षापरिणामस्यन्यूनमान्यता ।

9.3 एषा शिक्षानीतिः उच्चशिक्षाप्रणाल्याम् आमूलाग्रं परिवर्तनं नवचैतन्यं च जनयितुं विभिन्नोपहुतीनां दूरीकरणाय निर्दिशति, यया सर्वे युवजनाः स्वेच्छानुसारं गुणवत्तापूर्णं समानावसरप्रदायकं समावेशितं चोच्चशिक्षणं प्राप्नुयुः । अस्याः शिक्षानीतेः दृष्टौ वर्त्तमानोच्चशिक्षाप्रणाल्याम् आनेतव्यानि प्रमुखपरिवर्तनानि अधोलिखितरूपेण सन्ति ।

क. तदृशोच्चशिक्षाव्यवस्था परिकल्पनीया यस्यां विस्तृताः बहुविषयकविश्वविद्यालयाः महाविद्यालयाश्च भवेयुः । प्रत्येकस्मिन् जनपदे अथवा सम्पूर्णभारते यत्र अधिकतया उच्चशिक्षासंस्थानानि (HEIs) अपिच प्रादेशिकभाषया / भारतीयभाषामाध्यमेन शिक्षाप्रदानं कार्यक्रमाणामायोजनं वा क्रियते ।

ख. अधिकतया बहुविषयकस्नातकशिक्षायाः अभिवर्धनम् ।

ग. सङ्कायस्वायत्ततायाः संस्थागतस्वायत्ततायाश्च सम्पादनम् ।

घ. छात्राणामनुभववर्धनार्थं पाठ्यचर्यायाः शिक्षणशास्त्रस्य मूल्याङ्कनस्य तथैव छात्रेभ्यः प्रदीयमानसहयोगानां च आमूलाग्रं परिवर्तनम् ।

ङ. सेवा-शिक्षण-अनुसन्धानानामाधारेण वृत्तियोग्यतानियुक्तीनां प्रगतेः माध्यमेन सङ्कायस्यसंस्थागतनेतृत्वस्य च स्थितेः अखण्डतासम्पादनाय पुष्टिप्रदानम् ।

च. अत्युत्तमपुनरीक्षणसंशोधनाय धनसहायं कर्तुं विश्वविद्यालयेषु महाविद्यालयेषु च राष्ट्रियानुसन्धानसंस्थानस्य (NRF) स्थापनम् ।

छ. उत्तमयोग्यस्वतन्त्रसंस्थानां शैक्षणिक-प्राशासनिकस्वायत्ततताद्वारा उच्चशिक्षासंस्थानानां (HEIs) शासनम् ।

ज. उच्चशिक्षणार्थम् एकया संस्थयैव "शिथिलं परन्तु कठोरम्" नियमेन नियन्त्रणम् ।

झ. अत्युत्तमसार्वजनिकशिक्षणाय अधिकावसरैः सह अनेकप्रकारेणसमानः समावेशितश्च प्रवेशः कल्पनीयः । सौलभ्यवञ्चितानां निर्धनानां च छात्राणां कृते सर्वकारीयेतर / परोपकारिविश्वविद्यालयैः छात्रवृत्तिप्रदाने वृद्धिः । तेषांदिव्याङ्गछात्राणां च कृते सद्यस्कशिक्षायाः मुक्तदूरस्थशिक्षायाः (ODL)व्यवस्थया सह सर्वविधभौतिकसाधनानाम् अध्ययनसामग्रीणां च व्यवस्थापनम् ।

## 10. सांस्थिकपुनारचनं बलवर्धनं च ।

10.1 उच्चशिक्षायाः विषये अस्याः नीतेः प्रमुखलक्ष्यमस्ति यत् उच्चशिक्षासंस्थानां बहुविषकविश्वविद्यालयानां महाविद्यालयानां प्रादेशिकोच्चशिक्षासंस्थानां च ज्ञानकेन्द्रत्वेन परिवर्तनं कृत्वा उच्चशिक्षायाः विखण्डनं समापनीयमिति । प्रत्येकं संस्थायाः लक्ष्यं ३०००तः अधिकसंख्याकछात्राणामुद्धारः स्यात् । एषा विदुषाम् आनन्ददायकमित्राणां समुदायस्य च निर्माणे हानिकारककवचभञ्जने सर्वेषु विषयक्षेत्रेषु छात्राणां बहुमुखित्वसम्पादने (कलात्मक – रचनात्माक – विश्लेषणात्मक – क्रीडासम्बद्धेषु च क्षेत्रेषु ) विकासाय सक्षमसक्रियानुसन्धानेन सह अन्तरनुशासनिकानुसन्धानस्य विकासाय संसाधनानां सामग्रीणां मानवीयकार्यकुशलतायाश्चाभिवर्धने च सहकरोति ।

10.2 उच्चशिक्षायाः स्वरूपसम्बन्धे बहुविषकविश्वविद्यालयानाम् उच्चशिक्षासंस्थानां (HEIs) निर्माणमेव अस्याः नीतेः प्रधानपरामर्शः । भारतीयप्राचीनविश्वविद्यालयेषु तक्षशिला-नलन्दा- वल्लभी-विक्रमशिलादिषु सहस्राधिकाः भारतीयाः विविधदेशीयाश्च छात्राः बहुविषयकाध्ययनं कुर्वन्ति स्म । तैः विश्वविद्यालयैः शिक्षणस्य सफलताप्रदर्शनं यथा कृतं तथैव बहुविषकानुसन्धानं शिक्षणं च विश्वविद्यालया एव कर्तुं शक्नुवन्ति । भारते बहुमुखिप्रतिभासम्पन्नानां योग्यानाम् अभिनवानां छात्राणां निर्माणार्थं तादृशी सा परम्परा पुनः आनेतव्या । केचन देशाः पूर्वमेव एतादृशपरम्परया प्रेरिताः शैक्षिकरूपेणार्थिकरूपेण च परिणताः जायमानाः सन्ति ।

10.3 उच्चशिक्षायाः अस्याः दृष्टेः कृते विशेषतया नूतनवैचारिकधारणायाः/ज्ञातव्यस्य अपेक्षा विद्यते । तदर्थम् उच्चशिक्षासंस्था (एच्‌ईआई) विश्वविद्यालयः महाविद्यालयो वा संस्थाप्यते ।विश्वविद्यालयः इत्यस्यार्थः उच्चस्तरीयाधिगमार्थम् उच्चकोटिकशिक्षणेन उन्नतशोधेन समुदायसहयोगेन सह स्नातकस्नातकोत्तरकार्यक्रमं संचालयन्ती बहुविषयकसंस्था इति । विश्वविद्यालयस्य परिभाषा तावत् शिक्षणस्य शोधस्य च कृते समानमहत्त्वं प्रदीयमाना संस्था गम्भीरशोधविश्वविद्यालयः, गुणवत्ताशिक्षणप्रदाने अधिकं महत्त्वम् एवं महत्त्वपूर्णानुसन्धानं संचाल्यमाना संस्था गहनशिक्षणविश्वविद्यालयः इत्यर्थः । एतन्मध्ये स्वायत्ततया स्नातकपदवीं प्रदीयमानः महाविद्यालयः (एसी)उच्चशिक्षायाः बहुविषयकसंस्थायाः उल्लेखं करोति अपि च एतादृशमहाविद्यालयः केवलस्नातकपदवीं प्रदास्यति तथा च मुख्यतया तत्र स्नातकशिक्षणे केन्द्रितो वर्तते ।यद्यपि एतत् नियमयितुं न शक्यते अपि च नियमनमपि न भवेत् यतोहि सामान्यश्वविद्यालयस्य लघुस्वरूपो विद्यते ।

10.7 2040यावत् विद्यमानानां सर्वासां उच्चशिक्षासंस्थानां (एचईआई) उद्देश्यं स्वतः बहुविषयकसंस्थारूपेण परिणताः स्युः।मूलभूतापेक्षाणां संसाधनानाम् उत्तमतया उपयोगार्थं क्रियाशीलबहुविषयकसमुदायस्य निर्माणार्थं सहस्राधिकसंख्याकानां छात्राणां नामाङ्कनम् अस्य लक्ष्यं भवेत् । सर्वाः उच्चशिक्षासंस्थाः प्रथमतः 2030 यावत् बहुविषयकसंस्थारूपेण परिणमयितुं कार्ययोजनां कुर्युः ततःपरं मन्दं मन्दं छात्राणां नामङ्कनसंख्यायां वृद्धिः स्यात् ।

10.8 वञ्चितक्षेत्रेषु पूर्णप्रवेशार्थं , न्यायसंगतार्थं, समावेशार्थं च अपेक्षानुसारम् उच्चशिक्षासंस्थाः स्थापयित्वा अभिवृद्धिः क्रियते। 2030यावत् प्रत्येकं जिलामध्ये तत्समीपे वा न्यूनातिन्यूनं बृहद्बहुविषयकोच्चशिक्षासंस्था(एचईआई)भविष्यति। स्थानीय/भारतीयभाषायाम् अथवा द्विभाषायां बोधनामाध्यमयुक्तायाः श्रेष्ठगुणवत्तोच्चशिक्षासंस्थायाः सार्वजनिकरूपेण वैयक्तिकरूपेण च स्थापने अभिवृद्धये च निर्णयः स्वीक्रियते । 2035 यावत् वृत्तिपरशिक्षणे सह उच्चशिक्षणे सर्वनामाङ्कनानुपातस्य 26.3%(2018) तः 2035वर्षे 50% पर्यन्तं वर्धनम् अस्य उद्देश्यं विद्यते । एतल्लक्ष्यावाप्तये नूतनसंस्थानां विकासं कर्तुं शक्यते किन्तु सामर्थ्यनिर्माणस्य प्रमुखभागः क्रोडीकरणमुखेन विस्ताररूपेण विद्यमान(एचईआई)इत्यस्य अभिवृद्ध्या च साधयितुं शक्यते।

10.9 उभयोः सार्वजनिकवैयक्तिकसंस्थयोः विकासः भवति किन्तु अधिकरूपेण उत्कृष्टसार्वजनिकसंस्थानां स्थापने बलं निधीयते । सार्वजनिकोच्चसंस्थायाः (एच्‌ईआई) कृते सार्वजनिकवित्तपोषणसहायस्तरं वर्धयितुं काचित् निष्पक्षपाता पारदर्शिव्यवस्था भवति । इयं व्यवस्था सर्वासां सार्वजनिकसंस्थानां विकासार्थं समानावसरं प्रददाति । इयं

प्रत्यायनव्यवस्था प्रत्यायननियमेषु पारदर्शिता पूर्वघोषितमापदण्डाधारिता । अस्यां नीतौ उक्तानुसारम् उच्चशिक्षासंस्था (एच्ईआई) उत्तमशिक्षणं प्रदातुं स्वसामर्थ्यस्याभिवृद्धये प्रोत्साह्यते ।

10.10 संस्थाः स्वपाठ्यक्रमाणां प्रवेशसंख्यां, प्राप्तिं,नामाङ्कनानुपातम् अभिवर्धयितुं जीवनपर्यन्तम् अध्ययनावसरं प्रदातुं (एसडीजी4) दूरस्थशिक्षां (ओडीएल) आनलाईन-कार्यक्रमं च संचालयितुं एतादृशकार्यक्रमसस्य संचालनार्थं मान्यताप्राप्तानां कृते अवसरो लभ्यते । सर्वे दूरस्थशिक्षाकार्यक्रमाणां डिप्लोमा उपाधिमानकं, गुणवत्ता च एच्ईआई परिसरे संचाल्यमाणस्य उच्चगुणवत्ताकार्यक्रमस्य तुल्यं भवति । ओडिल इत्येदर्थं मान्यताप्राप्तोच्चसंस्थानां कृते गुणवत्ता-आनलाईन-कोर्स-आरम्भं कर्तुं प्रोत्साह्यते सहायश्च समाचर्यते । तादृशगुणवत्ता-आनलाईनपाठ्यक्रमः एच्ईआई पाठ्यक्रमेण सह संयोज्यते संयोजिपाठ्यक्रमस्य कृते विशेषावकाशः प्रदीयते।

10.11 एकधारासंस्थां (एच्ईआई) कालानुगुणं बहुविषयकसंस्थया अथवा बहुविषयकसमुदायेन (एच्ईआई क्लस्टर) सह अङ्गरूपेण यथाक्रमं परिवर्तनं क्रियते । तेषां कृते उच्चगुणवत्ताबहुविषयके अन्तर्विषयकशिक्षणे अनुसन्धाने च सक्षमाः भवितुं प्रोत्साहनं क्रियते। एकधारा -एचईआई मध्ये भिन्नविषयाणां संकायानां संयोजनं क्रियते तेन अधुना विद्यमानायाः एकधारायाः बलं वर्धते । अपेक्षितप्रत्यायनस्य अवाप्त्या उच्चशिक्षासंस्थाः(एच्ईआई) मन्द मन्दं शैक्षणिकस्य प्राशासनिकस्य संपूर्णस्वायत्तां प्राप्नुवन्ति तेन उत्कृष्टसंस्कृतेः निर्माणं च स्यात् । सार्वजनिकसंस्थानां स्वायत्तायाः कृते सार्वजनिकवित्तसहायेन स्थिरता दार्ढ्यं च समायाति । सार्वजनिकानां कृते गुणवत्तायुक्तसमानशिक्षाणार्थं प्रतिबद्धानां वैयक्तिकसंस्थानामपि प्रोत्साहनं क्रियते ।

10.12 अनया नीत्या कल्पिता नूतननियामकव्यवस्था पञ्चदशवर्षाणाम् अन्तराले श्रेणीकृतव्यवस्थया महाविद्यालयस्य संबद्धताव्यवस्थां क्रमेण समापयति एवं प्रत्याह्वानरूपेण सशक्तीकरणस्वायत्ता -संस्कृतिं नवाचारं प्रति उत्तेजयति ।प्रत्येकं संबद्धविश्वविद्यालयः स्वसंबद्धमहाविद्यालयस्य मार्गदर्शनार्थम् उत्तरदायी भवति येन स्वसामर्थ्यस्य अभिवृद्धिं कर्तुं शक्नुयात् तथा शैक्षणिकपाठ्यक्रमसंबद्धविषये न्यूनमापदण्डं, शिक्षणं मूल्याङ्कनं च, प्रशासनाभिवृद्धिं, वित्तीयदार्ढ्यम्, प्राशासनिकदक्षतां च प्राप्तुं शक्नुयात् । अधुना विश्वविद्यालयेन सह संबद्धाः सर्वे महाविद्यालयाः प्रत्यायनं प्राप्तुम् उपाधिप्रदायकमहाविदालयाः भवितुं निर्धारितमानदण्डं च कालक्रमेण यथोचितर्गदर्शनेन सर्वकारस्य सहकारेण संघटितराष्ट्रियप्रयासेन च प्राप्तुं शक्नुवन्ति ।

10.13 साकल्येन उच्चशिक्षाक्षेत्रस्य लक्ष्यं समग्रोच्चशिक्षाव्यवस्थारूपेण परिणतिः वर्तते तत्र व्यावसायिकवृत्तिपरकशिक्षा अपि अन्तर्भूता । इयं नीतिः तथा अस्याः दृष्टिश्च इदानीं

विद्यमानोच्चशिक्षासंस्थायाः (एच्ईआई )सर्वासु धारासु समानरूपेण अन्विता भवति अन्ततः उच्चशिक्षा सुबद्धोन्नतशिक्षणव्यवस्थायां विलीना स्यात् ।

10.14 विस्तृतरूपेण विश्वविद्यालयस्य अर्थः उच्चशिक्षायाः बहुविषयकसंस्था इति यत्र स्नातक-स्नातकोत्तर- शोध- पाठ्यक्रमाणां संचालनं करोति एवम् गुणवत्ताशिक्षणं अनुसंधानं च संचालयति । अधुना देशे उच्चशिक्षासंस्थायाः (एच्ईआई ) संकीर्णनामानि सन्ति यथा मानितविश्वविद्यालयः, संबद्धविश्वविद्यालयः,संबद्धतान्त्रिकविश्वविद्यालयः, एकीकृतविश्वविद्यालयः इति ।यदा एते मानकानुसारम् अपेक्षितमापदण्डं पूरयन्ति तदा विश्वविद्यालयः इति नाम्ना व्यवह्रियते ।

## 11. समग्रां बहुविषयिकां शिक्षां प्रति

11.1 भारते समग्रतया बहुविषयकरूपेण अध्ययनम् काचित् प्राचीना परम्परा विद्यते। तक्षशिला,नालन्दा- इत्यादिविश्वविद्यालयादारभ्य एतादृशव्यापकसाहित्यं विद्यते यत् विभिन्नक्षेत्रीयविषयान् अपि संयोजयति । प्राचीनभारतीयसाहित्यम् बाणभट्टस्य कादम्बरी शिक्षायाः 64कलाः ज्ञानरूपेण वर्णयति । 64कलासु न केवलं गायनं चित्रकला इत्यादिविषयाः अन्तर्भूताः किन्तु रसायनशास्त्रं, गणितम्, इत्यादिवैज्ञानिकक्षेत्राणि, तक्षककार्यम्, वस्त्रसीवनकला, इत्यादिवृत्तिपरकक्षेत्राणि,औषधीयकार्यम्, अभियान्त्रिकी इत्यादिव्यावसायिकक्षेत्राणि, सम्पेषणा, चर्चा, संवादः इत्यादिव्यावहारिककौशलानि(साफ्ट स्किल) च अन्तर्भूतानि । गणितम्,विज्ञानम्, वृत्तिपरकविषयाः, व्यावसायिकविषयाः, च अन्तर्भूय मानवसर्जनस्य सर्वाणि क्षेत्राणि कलाः इति परिगणयेत् इति भारतीयचिन्तनम् अस्ति । अस्य दृष्टिः नैककलाज्ञानम्, यथा आधुनिककाले समान्यतः कथ्यते उदारकला(कलानाम् उदारकल्पना)इति।एतत् भारतीयशिक्षायां पुनः अवश्यं समायोजनं भवेत् । यतः इयमेव शिक्षा एकविंशतिशताब्दौ अपेक्षिता विद्यते ।

11.2 आकलनेन ज्ञातं यत् स्नातकशिक्षाकाले शिक्षणपद्धतौ विज्ञानम्, गणितम्, तान्त्रिकम्, अभियान्त्रिकम्, (एसटीईएम्)इतिविषयैः सह कला मानवीयशिक्षा च समाविष्टा चेत् सर्जनता,नवाचारः,आलोचनात्मकचिन्तनम्,उच्चस्तरीयचिन्तनक्षमता,समस्यासमाधानयोग्यता, समूहकार्यदक्षता, सम्पेषणकौशलम्, तलस्पर्श्यध्ययनम्,पाठ्यक्रमस्य सर्वविषयेषु ज्ञानम्, सामाजिकनैतिकताजागरूकता, इत्यादिधनात्मकशैक्षणिकपरिणामः प्राप्तो वर्तते । अनेन सह समग्रबहुविषयकशिक्षाविधानेन अनुसन्धानेपि प्रगतिः जाता अस्ति ।

11.3 समग्रबहुविषयकशिक्षा मनुष्यस्य सर्वसामर्थ्यानां बौद्धिकम्, सौन्दर्यात्मकम्, सामाजिकम्, शारीरिकम्, भावनात्मकम्, नैतिकम् इत्यादीनां सामैक्येन विकासं कर्तुं लक्ष्यं स्थापयति।कला मानवीयमौल्यानि, भाषाः, विज्ञानम्, वृत्तिः, तान्त्रिकम्, व्यावसायिकक्षेत्रम्,

सामाजिकसंयोजननीतिः, संप्रेषणम्, चर्चा, वाद-विवादः, इत्यादिव्यावहारिककौशलम्, चितक्षेत्रे अथवा अन्यक्षेत्रे तलस्पर्शिज्ञानम्, इत्येतादृशशिक्षणम् एकविंशतिशतब्द्यां सर्वतोमुखविकासयुक्तव्यक्तेः अभिवृद्धये सहायं करोति । एतादृशसमग्रशिक्षा एव अधिककालं यावत् व्यावसायिकक्षेत्रेण तान्त्रिकक्षेत्रेण च सह स्नातककार्यक्रमस्य दृष्टिः भवति।

11.4 भारतस्य इतिहासे सुन्दरतया उपवर्णिता समग्रबहुविषयकशिक्षा वास्तवरूपेण अधुना अपेक्षिता वर्तते येन वयम् एकविंशतिशतब्द्याः चतुर्थप्रौद्योगिकक्रान्तेः नेतृत्वं कर्तुं शक्नुमः ।अभियान्त्रिकीसंस्थाः आईआईटी इत्यादयः कलामानवीयमौल्यम् इत्यादिभिः सह समग्रबहुविषयकशिक्षां प्रति अग्रे सरेयुः । कला- मानवीयमौल्यविषयस्य छात्राः विज्ञानम् अधीयते अपि च सर्वे व्यावसायिकविषयं व्यावहारिकौशलं(साफ्ट स्किल) पठितुं प्रयतन्ते ।

11.5 काल्पनिक-आनम्य-पाठ्यक्रमसंरचनाः अध्ययनार्थं विषयाणां रचनात्मकसंयोजनं सशक्तीकुर्वन्ति एवं नैकप्रवेशनिर्गमनबिन्दून् अपि प्रददति । अतः अधुना विद्यमानां कठोरनियमसीमां परिमार्ज्य आजीवनाधिगमस्य कृते संभावनानां सर्जनं भवति। बृहद्बहुविषयकविश्वविद्यालयेषु स्नातकस्तरे स्नातकोत्तरस्तरे च कठोरानुसन्धानाधारितविषयविशेषस्य प्रदानेन सह शैक्षणिक-सर्वकारोद्योगेन सह बहुविषयककार्यार्थम् अवसरः प्रदीयते ।

11.6 बहुविषयकविश्वविद्यालयाः महाविद्यालयाः समग्रगुणवत्तां बहुविषयकशिक्षां च प्रति अग्रे सरेयुः । विषयेषु कठोरपरिणित्या सह छात्राणां कृते पाठ्यचर्यायाम् आनम्यता नूतनाकर्षकपाठ्यक्रमस्य विकल्पः च प्रदीयते । पाठ्यक्रमनिर्धारणे संकायसदस्यैः संस्थागतास्वायत्तेन च एतत् प्रोत्साह्यन्ते । शिक्षणशास्त्रे संवादम्, चर्चाम्, वाद-विवादम्, अनुसन्धानम्, भिन्नशास्त्रीयान्तःशास्त्रीयचिन्तनं च प्रति अधिकं बलं प्रदास्यते ।

11.7 देशस्य विभिन्नोच्चशिक्षासंस्थासु (एच्ईआई ) भाषा, साहित्यम्, संगीतम्, दर्शनम्, भारतविद्या, कला, नृत्यम्, नाट्यकला, शिक्षा, गणितम्, सांख्यिकी, सैद्धान्तिकव्यावहारिकविज्ञानम्, समाजशास्त्रम्,अर्थशास्त्रम्, क्रीडा, अनुवादः व्याख्यानं च, इत्येदृशबहुविषयकविभागानां कृते भारतीयशिक्षावातावरणस्य स्थापनं प्रोत्साहनं च क्रियते । एषु विषयेषु सर्वेषु स्नातकोपाधिकार्यक्रमेषु क्रेडिट्-प्रदास्यते किन्तु यदा ते विषयाः एच्ईआई कक्षायां नोपलभ्यन्ते तदा एतादृशविभागेन अथवा ओडीएल माध्यमेन च कुर्युः।

11.8 एतादृशबहुविषयकशिक्षायाः साधनाय सर्वासानां उच्चशिक्षासंस्थानाम् आनम्ययुक्तनवीनपाठ्यक्रमे क्रेडिट-आधारितपाठ्यक्रमः समुदायनियोगः,सेवा पर्यावरणशिक्षा, मूल्याधारितशिक्षा च अन्तर्भवेयुः । पर्यावरणशिक्षायां जलवायुपरिवर्तनम्, प्रदूषणम्, त्याज्यनिर्वहणम्, स्वच्छता, जैविकविविधतायाः संरक्षणम्, जैविकसंसाधनानां प्रबन्धनम्,

वनवन्यजीविसंरक्षणम्, सुस्थिराभिवृद्धिः च अन्तर्भवन्ति। मूल्याधारितशिक्षायां मानवीय- नैतिक- संवैधानिक- सार्वभौमिकमूल्यानि यथा सत्यम्, धर्मः, शान्तिः, प्रेम, अहिंसा, वैज्ञानिकदृष्टिकोणः, नागरीकमौल्यानि, जीवनकौशलम्, सेवा, सामुदायिककार्यक्रमेषु भागग्रहणम्, च समग्रशिक्षणस्य अभिन्नम् अङ्गमिति परिगण्यते ।यदा यदा विश्वं परस्परं संमिलत् वर्तते तदा वैश्विकनागरिकशिक्षा, (जीसीईडी), समकालिकवैश्वकप्रत्याह्वानस्य प्रतिक्रिया कर्तुं, शिक्षार्थिनां कृते वैश्विकविषयं विज्ञातुम्, अधिकशान्तिपूर्ण-सहिष्णु-समावेशि-सुरक्षित-सक्रिय-प्रवर्तको भवितुं च प्रदीयते । अन्ततः समग्रशिक्षायाः अन्तर्गतम् उच्चशिक्षासंस्था स्वकीयसंस्थासु अन्योच्चशिक्षा/शोधसंस्थासु वा स्थानीयोद्योगेन, व्यवहारेण,कलाविद्भिः,शिल्पकारैः च सह अन्तस्सम्बन्धावसरस्योपलब्धिः एवम् अध्यापकैः शोधार्थिभिः सह अन्तस्सम्बन्धावसरस्योपलब्धिः च कार्यते येन छात्राः सक्रियरूपेण स्वज्ञानार्जनव्यावहारिकपक्षेण सह योजिताः स्युः एवं स्वोद्योगसंभावनामपि वर्धयितुं शक्नुयुः।

11.9 उपाधिकार्यक्रमाणाम् अवधौ संरचनायां च अपेक्षानुसारं परिवर्तनं क्रियते । स्नातकोपाधिः वर्षत्रयस्य वर्शचतुष्टयस्य वा भवेत् तत्र उपयुक्रप्रमाणपत्रेण सह त्यागार्थमपि विकल्पाः भवन्ति । उदाहरणार्थम् - व्यावसायिकक्षेत्रवृत्तिपरक्षेत्रसहिते कस्मिन्नपि विषये अथवा क्षेत्रे एकं वर्षं पूर्यते चेत् प्रमाणपत्रम्, वर्षद्वयं पूर्यते चेत् डिप्लोमा, वर्षत्रयानन्तरं स्नातकोपाधिः च प्रदीयते ।तथापि वर्षचतुष्टयस्य स्नातककार्यक्रमे बहुविषयकशिक्षायाः उत्तेजनं क्रियते यतोहि तदा विद्यार्थिनः अभिरुच्यनुगुणं चितस्य मुख्यविषये सहायकविषये च केन्द्रीकरणेन सह समग्रबहुविषयकशिक्षायाः अनुभवं प्रासुं अवसरो लभ्यते । कश्चन शैक्षणिक-क्रेडिटकोशः (एबीसी) स्थाप्यते तत् मान्यताप्राप्ताभ्यः भिन्नभिन्नशिक्षणसंस्थाभ्यः प्राप्तक्रेडिट डिजिटलरूपेण संकलनं करोति येन प्राप्तक्रेडिट-आधारेण उच्छ्चशिक्षासंस्थाः पदवीं दातुं शक्नुवन्ति । यदि छात्रः उच्चशिक्षासंस्थया निर्दिष्टाध्ययनस्य स्वक्षेत्रे (क्षेत्रेषु) एकां कठिनशोधपरियोजनां पूर्णं करोति चेत् चतुर्वर्षीयकार्यक्रमे शोधसहितोपाधिमपि प्रदातुं शक्यते ।

11.10 उच्चशिक्षासंस्थानां (एच्ईआई) कृते विभिन्नप्रारूपेषु स्नातकोत्तरकार्यक्रमान् संचालयितुम् आनम्या भवति (क) वर्षत्रयस्य स्नातककार्यक्रमं समापितवतां विद्यार्थिनां कृते वर्षद्वयस्य कार्यक्रमं प्रदातुं शक्यते किन्तु द्वितीयवर्षं पूर्णरूपेण शोधकेन्द्रितं स्यात् । (ख) ये विद्यार्थिनः वर्षचतुष्टयस्य शोधेन सह स्नातककार्यक्रमं समापितवन्तः तेषां कृते एकस्य वर्षस्य स्नातकोत्तरकार्यक्रमोपि भवितुमर्हति। (ग)पञ्चवर्षाणाम् एकीकृतस्नातक/ स्नातकोत्तरकार्यक्रमोपि शोधोपाध्यर्थं स्नातकोत्तरोपाधिः अथवा शोधेन सह प्राप्तः वर्षचतुष्टयस्य स्नातकोपाधिः अनिवार्यो भवति । एम्.फिल- कार्यक्रमस्य स्थगनं क्रियते ।

11.11 समग्रबहुविषयकशिक्षायाः कृते मानकसार्वजनिकविश्वविद्यालयानां स्थापना क्रियते आईआईटी, आईआईएम्- इत्यादयः मेरू (बहुविषयकशिक्षाशोधविश्वविद्यालयः)इति नाम्ना व्यवह्नियन्ते ।एतेषां विश्वविद्यालयानाम् उद्देश्यं गुणवत्ताशिक्षायां वैश्विकस्तरे उत्तममानकस्य समार्जनं भवति । संपूर्णे देशे उच्चादर्शबहुविषयकशिक्षायाः समायोजने सहायं कुर्वन्ति ।

11.12 उच्चशिक्षासंस्थाः स्टार्ट-अप, इन्क्यूबोशन-केन्द्राणि, प्रौद्योगिकविकासकेन्द्राणि, अनुसन्धानकेन्द्राणि, अधिकरूपेण उद्योगशैक्षणिकेषु सम्बन्धः, मानवीयमौल्यसामजिक -विज्ञानानुसन्धानसहितानि अन्तर्विषयकानुसन्धानानि इत्यादीनां स्थापनां कृत्वा अनुसन्धाने नवाचारे लक्ष्यं स्थापयन्ति। सांक्रामिकरोगाणां वैश्विकमहारोगाणां च परिदृश्ये इदं महत्त्वपूर्णं भवति यत् उच्चशिक्षासंस्थाः सांक्रामिकरोगाः, महारोगविज्ञानम्, वैरोलोजी, डायग्रोटिक्स, इन्स्ट्रुमेन्टेशन्, वैक्सानोलाजी,इत्यादिषु एवं अन्यप्रासङ्गिकक्षेत्रेषु अनुसन्धानार्थम् अग्रेसरणम्। छात्रेषु नवाचारस्य उत्तेजनार्थम् उच्चशिक्षासंस्थाः हैन्डहोल्डिंग-कार्यविधानस्य विकासं कुर्वन्ति। एनआरएफ, उच्चशिक्षासंस्थासु, अनुसन्धानप्रयोगशालासु, अन्यानुसन्धानसंघटनेषु च एतादृशानुसन्धानस्य नवाचारसंस्कृतेः सक्षमं कर्तुं कार्यं कुर्वन्ति ।

## 12. **अध्ययनार्थम् उत्तमवातावरणं छात्राणां कृते सहायता च**

12.1 प्रभावपूर्ण-अध्ययनार्थं व्यापकदृष्टिरपेक्षिता भवति यस्मिन् उपयुक्तपाठ्यक्रमः, आकर्षकशिक्षणम्, निरन्तरं रचनात्मकं च मूल्याङ्कनम्, छात्रेभ्यः पर्याप्तः सहयोगः अन्तर्भवति । पाठ्यक्रमः रुचिकरः प्रासङ्गिकश्च भवेत् । किं च काले काले तस्य प्रस्तुतता सम्पादनीया येन ज्ञानस्य तत्तत्कालिकावश्यकताः शिक्षणस्य च फलं च प्राप्तुं शक्येत । पाठ्यसामग्रीं छात्रेभ्यः यशस्वीरूपेण प्रापयितुं श्रेष्ठगुणयुक्तशिक्षाप्रणाली अपेक्ष्यते । एषा शिक्षणस्य प्रणाली छात्राणां शिक्षणानुभवं निर्धारयति एवं साक्षात् शिक्षणस्य परिणामं प्रभावयति । आकलनरीतिः वैज्ञानिकी स्यात् एवमेव अधिगमे निरन्तरं विकासमानयेत् ज्ञानस्य प्रायोगिकतां परीक्षयेच्च । अन्ते छात्राणां क्षमतावर्धनाय कायिकदृढता, निरामयत्वम्, मानसिक-सामाजिक-स्वास्थ्यम्, उन्नतनैतिकतायाः मूलाधारः इत्येतेषां विकासः महत्त्वपूर्णो वर्तते ।अतः पाठ्यक्रमः, अध्यापनम्, सततं मूल्याङ्कनं छात्रेभ्यः अपेक्षितसाहाय्याचरणं च फलीभूतशिक्षणस्य आधारशिला वर्तते । एतल्लक्षीकृत्य मूलभूतसंसाधनानां (उत्तमग्रन्थालयः, कक्षाप्रकोष्ठः, प्रयोगशाला, तकनिकीव्यवस्था, क्रीडा/मनोरञ्जनस्थानानि, छात्रापरिचर्चास्थानानि, भोजनशाला इत्यादीनाम् ) प्रदानेन साकं तादृशानां योजनानाम्

आवश्यकता वर्तते याभिः अधिगमस्य वातावरणम् आकर्षकं छात्रसहायकं च भवितुमर्हति । तथैव सर्वे छात्राः एतेन यशः प्राप्तुं सक्षमाः भविष्यन्ति ।

12.2 प्रथमं तावत् उच्चतरशिक्षायां सर्जनात्मकतां प्रोत्साहयितुं संस्थानेभ्यः सङ्कायेभ्यश्च पाठ्यक्रमे शिक्षणप्रविधौ आकलनादौ च स्वातन्त्र्यं दातव्यमस्ति । यतः सर्वाणि संस्थानानि, कार्यक्रमाः, मुक्तस्वाध्यायशिक्षणम्(ओडीएल्), अन्तर्जालीयशिक्षणं पारम्परिकशिक्षणमित्येतेषु समानरूपता स्थापयिष्यते । छात्रेभ्यः अत्युत्तमम् आकर्षकं च शिक्षणं प्रदातुं संस्थानानां सङ्कायानां च द्वारा एतदनुरूपपाठ्यक्रमः शिक्षणविधानं च निर्मास्यते । किं च प्रत्येककार्यक्रमस्य तत्तल्लक्ष्यप्राप्त्यर्थं सर्जनात्मक-आकलनस्य उपयोगः करिष्यते । उच्चतरशिक्षणसंस्थानद्वारा सर्वाः मूल्याङ्कनप्रणाल्यः निश्चीयन्ते यस्मिन् अन्तिमप्रमाणीकरणमपि अन्तर्भूतमस्ति । नावीन्यं नम्यतां च आनेतुं विकल्पाधारित क्रेडिट् प्रणाल्याः (सीबीएस्) संशोधनं करिष्यते । उच्चतरशिक्षणसंस्थानं मापदण्डाधारितं श्रेयाङ्कप्रणाल्याः निर्माणं करिष्यति । एतत् प्रत्येककार्यक्रमस्य अधिगमलक्ष्याणामाधारेण छात्रोपलब्धेः आकलनं करिष्यति । एतेन प्रणाली न्याययुता भविष्यति किं च परिणामः तुलनीयश्च स्यात् । उच्चतरशिक्षणसंस्थानमपि अधिकांशपरिक्षाव्यवस्थातः निरन्तरं व्यापकं च मूल्याङ्कनं प्रति पदं स्थापयेत् ।

12.3 द्वितीयम्, प्रत्येकं संस्थानं स्वस्य बृहत्तमसांस्थानिकविकासयोजनायां (आईडीपी) पाठ्यक्रमपरिवर्तनादारभ्य कक्ष्यापाठनपर्यन्तं शैक्षणिककार्ययोजनानाम् एकत्रीकरणं कुर्वन्ति। प्रत्येकं संस्थानं छात्राणां समग्रविकासाय प्रतिबद्धं भवेत् । एतदर्थम् संस्थानैः एका आन्तरिकप्रणाली निर्मास्यते यया विभिन्नप्रकारकछात्रेभ्यः शैक्षणिके सामाजिके च क्षेत्रे सहयोगः प्राप्येत । एतल्लक्षीकृत्य कक्षायाः बाह्यमान्तरं च औपचारिकशैक्षण्कपरिचर्चायाः व्यवस्था करिष्यते । उदाहरणार्थं सर्वेषु उच्चतरशिक्षणसंस्थानेषु सङ्कायस्य अथवा विशेषज्ञानां साहाय्येन छात्राणां द्वारा विषयकेन्द्रित-क्लब् इत्यस्य, कार्यक्रमांश्च यथा विज्ञानम्, गणितम्, काव्यम्, भाषा, साहित्यम्, वाद-विवादौ, सङ्गीतम्, क्रीडा इत्यादीनां कृते समर्पितकार्यक्रमाणाम् आयोजनार्थम् अवसरः धनराशेः व्यवथा च भविष्यति । गच्छता कालेन यदि छात्राणाम् अपेक्षा शिक्षकाणां च दक्षता वर्धिष्यते चेत् गतिविधीनामेतेषां पाठ्यक्रमे निवेशः कर्तुं शक्यः । बोधनाङ्गस्य सङ्कायस्य तादृशी क्षमता तादृशं प्रशिक्षणं च भवेत् यथा ते केवलं शिक्षकरूपेण न अपि तु संरक्षकरूपेण मार्गदर्शकरूपेण च छात्राणां कृते साहाय्यमाचरेयुः ।

12.4 तृतीयम्, सामाजिक-आर्थिकरूपेण वञ्चिताः छात्राः उच्चतरशिक्षापर्यन्तं सफलतापूर्वकं प्राप्तुं विशेषप्रोत्साहनस्य साहाय्यस्य च अपेक्षा भवति । एतदर्थं विश्वविद्यालयैः महाविद्यालयैश्च अत्युत्कृष्टस्य सहयोगकेन्द्रस्य स्थापनं कर्तव्यं भविष्यति । एतत् प्रभावीरूपेण निर्वाहं कर्तुं तेभ्यः पर्याप्ततया धनराशिः शैक्षणिकसंसाधनानि च दास्यन्ते । सर्वेभ्यः छात्रेभ्यः व्यावसायिकः औद्योगिकः शैक्षणिकश्च परामर्शः उपलब्धो भविष्यति । तेन सह तेषां शारीरक-मानसिक-भावनात्मककल्याणं साधयितुमपि परामर्शदातारः तज्ज्ञाः अपि उपलब्धाः भविष्यन्ति ।

12.5 चतुर्थम्, उत्कृष्टगुणयुक्त-उच्चतरशिक्षापर्यन्तं प्राप्तुम् ओडीएल् अन्तर्जालीयशिक्षा च एकं प्राकृतिकमार्गं कल्पयति । एतस्य क्षमतायाः परिपूर्णलाभं प्राप्तुम् ओडीएल् इत्यस्य नवीकरणं साक्ष्याधारितप्रयासद्वारा करिष्यते । एतेन सहैव एतदर्थमेव निर्धारितानां मानकानां पालनमपि करिष्यते । ओडीएल् कार्यक्रमाः यथा उत्कृष्टकक्ष्यापाठनकार्यक्रमसमाः भवेयुः तादृशं लक्ष्यम् आवहति । ओडीएल् इत्यस्य प्रणालीगतविकासः विनिमयः, मान्यतायाः मानदण्डः, मानकम्, दिशानिर्देशः इत्येतेषां सज्जीकरणं करिष्यते । एवमेव ओडील् इत्यस्य उत्कृष्टतायै रूपरेखा निर्मास्यते यस्याः सर्वेभ्यः शैक्षणिकसंस्थानेभ्यः अनुशंसनमपि करिष्यते ।

12.6 अन्ते सर्वेषां कार्यक्रमाणां, पठ्यक्रमस्य पाठ्यचर्यायाः, विषयसम्बद्धशिक्षणविधीनां, कक्ष्याबोधनस्य, अन्तर्जालीयपाठनस्य, ऑडीएल् इत्येतस्य, छात्रप्रोत्साहनस्य च इदमेव लक्ष्यं यत् उत्कृष्टतायाः वैश्विकमानदण्डस्य प्राप्तिरेव ।

**अन्ताराष्ट्रीकरणम् / वैश्वीकरणम्**

12.7 पूर्वोक्ताः विभिन्नक्रमाः भारते अध्येतुमागमिष्यमाणानां विदीशीयछात्राणां संख्यावर्धने सहायकाः भविष्यन्ति । एवमेव भारते अधीयानानां छात्राणां कृते विदेशीयसंस्थानेषु शोधकार्यं कर्तुम्, क्रेडिट् स्थानान्तरणं कर्तुं, शोधकार्यं विदेशे नेतुं च अवसरः कल्पयिष्यति । इत्थमेव अन्ताराष्ट्रियछात्रेभ्यः भारतेऽपि एते अवसराः भविष्यन्ति । इण्डालजि, भारतीयभाषाः, आयुषचिकित्सापद्धतिः, योगः, कला, सङ्गीतम्, इतिहासः, संस्कृतिः, आधुनिकभारतम् इत्यादि विषयेषु पाठ्यक्रमः कार्यक्रमश्च, विज्ञानम्, सामाजिकविज्ञानम्, एतदतिरिच्य अन्ताराष्ट्रियस्तरे प्रासङ्गिकपाठ्यक्रमः, सामाजिक-संयोजनम्, उत्कृष्ट-आवासीयव्यवस्थाः, महाविद्यालयपरिसरेषु अध्ययनावकाशः इत्यादीनां वैश्विकमानकरूपलक्ष्यस्य प्राप्तेः दिशि विकासः करिष्यते ।

12.8 शिक्षणस्य क्षेत्रे भारतं विश्वस्य अध्ययनकेन्द्रं यथा भवेत् तथा प्रोत्साहनं दीयते येन विश्वगुरुत्वस्थानं पुनरपि आसादयितुं सहायकं स्यात् । विदेशेभ्यः भारतं प्रति अध्ययनार्थं आगमिष्यमाणानां छात्राणां स्वागतं प्रोत्साहनं च कर्तुम् प्रत्येकम् उच्चतरशिक्षणसंस्थाने एकः अन्ताराष्ट्रियछात्रकार्यालयः स्थापयिष्यते । संशोधनम्/शिक्षणसहयोगः बोधनाङ्गसङ्कायः/छात्रादानप्रदानस्य व्यवस्थायाः विस्तरः सम्पाद्यते । तेन साकं विदेशैः सह प्रासङ्गिकस्य लाभप्रदस्य एमोयू उपरि परस्परं हस्ताक्षरं च करिष्यते । अत्युत्तमप्रदर्शनं ये करिष्यन्ति तादृशविश्वविद्यालयानां कृते विदेशेषु परिसरस्य उद्घाटनार्थं प्रोत्साहः दीयते । एवमेव चयनितविश्वविद्यालयेभ्यः (यथा विश्वस्य अत्युत्कृष्ट-शतविश्वविद्यालयानां मध्ये) भारते कार्यं निर्वोढुं अनुमतिः प्रदास्यते । एतादृशव्यवस्थायाः दृढीकरणाय एकस्याः कार्ययोजनायाः विकासः करिष्यते । तथैव एतादृशविश्वविद्यालयानां कृते अन्यस्वायत्तसंस्थानस्य अपेक्षया नियमानां, शासनानां, मानदण्डानां च विषये कठिनतां दूरीकृत्य किञ्चित् मृदुत्वं प्रदर्श्यते । एतदतिरिच्य भारतीयसंस्थानानां वैश्विकसंस्थानानां मध्ये अनुसन्धानसहयोगः, छात्राणां विनिमयः इत्यादि विषयेषु उत्तेजनं दीयते । विदेशीयविश्वविद्यालयेषु अर्जितानां क्रेडिट् अंशानाम् अत्र मान्यता दीयते किं च तद्यदि उच्चतरशिक्षणसंस्थानानाम् आवश्यकतानुगुणं वर्तते चेत् पदव्याः प्रदानार्थमपि स्वीकारः करिष्यते ।

**छात्राणां क्रियाकलापः प्रतिभागित्वं च**

12.9 छात्रः शिक्षाप्रणाल्यां प्रमुखः अस्ति । उत्कष्टशिक्षणाधिगमप्रक्रियार्थं विनूतनपरिसरजीवनस्य अपेक्षा भवति । अस्यां दिशि छात्रेभ्यः क्रीडा, संस्कृतिः/कलायाः क्लब्, पर्यावरणक्लब्, गतिविधिक्लब्, सामुदायिकसेवापरियोजना इत्यादिषु भागं गृहीतुं नैके अवसराः प्रदीयन्ते । प्रत्येकं शिक्षासंस्थाने मानसिकाशान्तिं भावनात्मकतारतम्यं च निवारयितुं परामर्शस्य व्यवस्था करिष्यते । एतदतिरिच्य ग्रामीणपृष्ठभूमेः छात्रेभ्यः अपेक्षितसहायतां प्रदातुं एकस्या अत्युत्ताव्यवस्थायाः परिकल्पनं विधास्यते यस्मिन् छात्रावासव्यवस्थायाः उत्तेजनमपि अन्तर्भूतमस्ति । सर्वाणि उच्चतरशिक्षणसंस्थानानि स्वसंस्थानेषु सर्वेभ्यः छात्रेभ्यः उत्कृष्टचिकित्साव्यवस्थायाः उपलब्धिं करिष्यन्ति ।

**छात्रेभ्यः वित्तीयसहायः**

12.10 छात्रेभ्यः विविधैः मार्गैः आर्थिकसहयोगस्य व्यवस्था करिष्यते । अनुसूचितजातीनाम्, अनुसूचितजनजातीनाम्, आर्थिकरूपेण ये दुर्बलाः तादृशानां छात्राणां योग्यतां प्रोत्साहयितुं प्रयासः करिष्यते । एतेषां छात्राणां विकासाय, प्रोत्साहनार्थं, तेषां प्रगतिपरिशीलनाय च

राष्ट्रियछात्रवृत्तिपोर्टल् इत्यस्य विस्तरणं करिष्यते । असर्वकारीय-उच्चतरशिक्षणसंस्थानानां छात्रेभ्यः अधिकसंख्यायां फ्रीशिप्स् छात्रवृत्तिं च दातुं प्रोत्साहनं करिष्यते ।

## 13 प्रेरितः सक्रियः सक्षमः सङ्कायः

13.1 उच्चतरशिक्षणसंस्थानानां साफल्यस्य अत्यधिकमहत्त्वपूर्णं कारणं भवति अत्र कार्यरतानां सङ्कायसदस्यानां उत्कृष्टता सम्बद्धता च । उच्चतरशिक्षणसम्बद्धानि लक्ष्याणि साधयितुं सङ्कायसदस्यानां भूमिकां मनसि निधाय एतेषां नियुक्तिप्रक्रियायां गते वर्षे महत्त्वपूर्णाः कार्यांशाः प्रारब्धाः सन्ति । वस्तुतः एतस्य लक्ष्यं तु नियुक्तिसमये वा सेवाकाले वा उद्योगस्थाने अग्रे प्रवर्तयितुम् अवसरणां कल्पनेन साकं सङ्कायसदस्यानां नियुक्तिप्रक्रियायां विभिन्नसमूहेभ्यः न्यायसङ्गतप्रतिनिधित्वस्य व्यवस्थापनमेव । सार्वजनिकसंस्थानानां स्थायीसदस्यानां वेतनादीनां पर्याप्ततया वर्धनं कृतमस्ति । सङ्कायसदस्यानाम् औद्योगिकविकासेन सम्बद्धानां विभिन्नानां अवसराणां प्राप्त्यर्थमपि नूतनपदनिक्षेपः कृतोऽस्ति । एवं रीत्या शैक्षिकक्षेत्रस्य नानाविधपरिवर्तनानन्तरमपि उच्चतरशिक्षाप्रणाल्याः साफल्यार्थं समुन्नत्यर्थम् अपेक्षित-उत्कृष्टतायाः प्राप्त्यर्थं उच्चतरशक्षणसंस्थानानां सङ्कायसदस्यानां प्रदर्शनम्, अनुसन्धानम्, सेवा च अपेक्षितस्तरादपेक्षयापि न्यूनमेव वर्तते । सङ्कायसदस्यानां प्रेरणायाः न्यूनतायां कारणीभूतानां विभिन्नानाम् अंशानां परिहारोऽन्वेष्टव्यः येन प्रत्येकोऽपि शिक्षकसदस्यः सन्तुष्टः, उत्साहितः, कार्यरतः, छात्रेषु प्रेरणां दातुं समर्थः, स्वसंस्थायाः विकासार्थं च कटिबद्धः भवेत् । उच्चतरशिक्षणसंस्थानेषु सर्वोत्कृष्ट-प्रेरित-सक्षमसङ्कायसदस्याः यथा भवेयुः तथा कर्तुं एषा शिक्षणनीतिः अधोनिर्दिष्टानाम् अंशानाम् अनुशंसनं करोति ।

13.2 सर्वप्रथमतया सर्वाणि उच्चतरशिक्षासंस्थानानि स्वच्छेन पेयजलेन, स्वच्छैः शौचालयैः, कृष्णफलकेन, कार्यालयेन, शिक्षणसामग्रीभिः, पुस्तकालयेन, प्रयोगशालाभिः, प्रशान्तकक्षावातावरणेन च युक्तानि भविष्यन्ति । प्रत्येकं कक्षाप्रकोष्ठः अत्याधुनिकशैक्षिकतन्त्रज्ञानेन युक्तः भविष्यति येन अधिगमप्रक्रिया सुकरा स्यात् ।

13.3 शैक्षिककार्यमधिकं न भविष्यति, छात्र-अध्यापकयोः संख्यायाम् अधिकम् अन्तरं न स्यात्, येन शिक्षणप्रक्रिया सुकरा सुलभा च स्यात् । एवमेव छात्रैः सह चर्चां कर्तुं, शोधकार्यार्थम्, विशविद्यालयसम्बद्धानां अन्येषां कार्याणां अनुष्ठानार्थं पर्याप्तः समयः लभ्येत । शिक्षकस्य नियुक्तिः निर्दिष्टसंस्थायामेव क्रियते, संस्थानान्तरे तस्य स्थानान्तरणं न करिष्यते, येन सः वस्तुतः स्वसंस्थानं प्रति, तत्रत्य-सदस्यानां प्रति सम्बद्धः, तत्परः, संलग्नश्च स्यात् ।

13.4 सङ्कायसदस्यानां कृते स्वीकृतकार्यपद्धत्यनुसारं पाठ्यपुस्तकानां चयनार्थं, गृहकार्यार्थं, आकलनप्रक्रियानिर्माणेन साकं पाठ्यक्रमसम्बन्धीशैक्षणिकप्रक्रियानां सर्जनात्मकरूपेण निर्माणार्थं स्वातन्त्र्यं दास्यते । सर्जनात्मकरूपेण पाठनार्थं, संशोधनार्थं सेवार्थं च शिक्षकाः प्रेर्यन्ते चेत् तदेव रचनात्मककार्यकरणार्थं मुख्यं कारणं भविष्यति ।

13.5 उत्कृष्टकार्येभ्यः योग्यः पुरस्कारः, पदोन्नतिः, प्रशंसनेन साकं प्राशासनिककार्येषु उन्नतोन्नतस्थानप्रदानेन प्रोत्साहनं करिष्यते । एवमेव ये न्यूनतममानण्डानुसारं कार्यं कर्तुमसमर्थाः तेषां कृते दायित्वमपि निश्चीयते ।

13.6 उत्कृष्टतायाः कृते उत्तेजनं दातुं स्वायत्तसंस्थानेषु सङ्कायसदस्यानां नियुक्तिप्रक्रियाणां मानदण्डस्य स्पष्टरूपेण निश्चयः भविष्यति । नियुक्तिप्रक्रिया स्वतन्त्रा पारदर्शी च यथा भवेत् तथा करिष्यते । वर्तमाने विद्यमाननियुक्तिप्रक्रिया अग्रे अनुवर्तिष्यते चेदपि उत्कृष्टतायाः प्राप्त्यर्थं 'कार्यकालट्र्याक्' प्रणाली अथवा प्रोबेशन् अवधेः योजनं करिष्यते । अत्यन्तप्रभावपूर्णानाम् अनुसन्धानानां कृते मान्यतां प्रदातुं एकं फास्ट्-ट्राक् पदोन्नतीप्रणाल्याः व्यवस्था करिष्यते । कार्याणां समुचितमूल्याङ्कनं, 'कार्यकालस्य' निर्धारणम्, पदोन्नतिः, वेतनवृद्धिः, मान्यता इत्यादिभिः सह समीक्षणम्, शिक्षणे नूतनाविष्करणम्, शोधकार्यस्य गुणवत्त्वं प्रभावश्च, औद्योगिकगतिविधयः, संस्थानेन समाजेन च सम्बद्धकार्याणाम् अन्यानि विभिन्नानि रूपाणि, तेषाम् उचिततया आकलनार्थं मापदण्डः इत्येतेषाम् विकासः उच्चतरशिक्षणसंस्थाद्वारा करिष्यते ।

13.7 उत्कृष्टतायाः नूतनाविष्करणस्य च उत्तेजनार्थम् अत्युत्कृष्टानाम् उत्साहपूर्णनेतॄणाम् आवश्यकता अद्य वर्तते । एकस्याः संस्थायाः तस्याः सङ्कायसद्स्यानां च साफल्यार्थं श्रेष्ठैः गुणैः युक्तानां धीरोदात्तानां सांस्थानिकनेतॄणाम् अपेक्षा अतीव भवति । उन्नतशैक्षिकयोग्यतायाः, सेवागुणस्य च आधारेण, किं च नायकत्वस्य प्राशासनिककर्मणश्च कौशलम् आवहतां सदस्यानाम् परिचयं कृत्वा तेभ्यः उन्नतोन्नतपदव्याः प्रदानेन प्रशिक्षणं प्रदास्यते । संस्थानेषु नायकानां स्थानं रिक्तं न भविष्यति । नायकत्वपरिवर्तनसमयस्य निर्धारणं सर्वेषु संस्थानेषु स्यात् येन संस्थानानां सुचारुरूपेण सञ्चालनार्थं बाधः न स्यात् । संस्थानस्य नेता उत्कृष्टतायाः संस्कृतेः रचनामेव लक्षीकृत्य कार्यं कुर्यात् येन सर्वे सङ्कायसदस्याः सर्जनशीलबोधने, संशोधने, सांस्थानिकसेवायां संस्थागतानां सामुदायिकानां कार्याणां विषये प्रेरिताः प्रोत्साहिताश्च भवेयुः ।

## 14. उच्चशिक्षायां समता समावेश्च

14.1 गुणवत्तोच्चशिक्षायां प्रवेशः नैकसंभावनाद्वारम् उद्घाटयितुं शक्नोति एवं व्यक्तीः समुदायान् च प्रतिकूलपरिस्थितिकुचक्रात् निस्सारयितुं शक्नोति । अनेन कारणेन उच्चगुणवत्तायुक्तशिक्षायाः अवसरप्रदानम् अस्माकम् आद्यं कर्तव्यं स्यात् ।इयं नीतिः एसईडीजी इत्येतत् प्रति विशेषं बलं प्रयच्छन्ती सर्वेषां छात्राणां कृते गुणवत्ताशिक्षायाः समानप्राप्तिं निश्चिनोति ।

14.2 एसईडीजी शिक्षाव्यवस्थातः त्यागे परिवर्तनं (डायनेमिक्स) नैककारणानि च विद्यासयप्रणाल्याम् उच्चशिक्षाप्रणाल्यां च सामान्यानि विद्यन्ते । अतः विद्यालयशिक्षायाम् उच्चशिक्षायां च समता, संनिवेशः च समानः स्यात् । तथा च स्थिरतासंपादने सर्वेषु स्तरेषु नैरन्तर्यं स्यात्। अतः उच्चशिक्षायां समतासंनिवेशलक्ष्यस्य पूर्तये अपेक्षितनीत्युपक्रमाः विद्यालयशिक्षार्थम् भवेयुः ।

14.3 बहिर्गमने नैकानि मुखानि सन्ति ते अंशाः उच्चशिक्षणे निर्दिष्टरूपेण तीव्रतराः भवन्ति। तेषु अंशेषु अवश्यं लक्ष्यं प्रसरेत् अपि च उच्चशिक्षायाम् अवकाशस्य ज्ञानस्य च अभावः, उच्चशिक्षाध्ययनकाले आर्थिकावकाशव्ययः, आर्थिकबाधाः, प्रवेशप्रक्रिया, भौगोलिकस्य भाषायाश्च अवरोधः, नैकोच्चशिक्षाकार्यक्रमाणां न्यूनोद्योगक्षमता, विद्यार्थिनां कृते अपेक्षितसहायाभावः इत्येते अंशाः अवश्यं दूरीकरणीयाः ।

14.4 एतदर्थं विशेषतया उच्चशिक्षां प्रति अतिरिक्तकार्याणि सर्वकाराः उच्चशिक्षासंस्थाश्च निर्वहन्ति ।

14.4.1 सर्वाकारेण करणीयाः प्रक्रमाः

(क) एसईडीजी- शिक्षार्थं समुचितसर्वकारनिधिनिर्धारणम् ।

(ख) उच्च-जीईआर एसईडीजी इत्येतदर्थं स्पष्टलक्ष्यस्य निर्धारणम् ।

(ग)उच्चशिक्षासंस्थानां प्रवेशप्रक्रियासु लैङ्गिकसमानतायाः वर्धनम् ।

(घ)विकासार्थम् उन्मुखजिलासु एसईडीजीयुक्त- विशेषशिक्षणक्षेत्रेषु अधिकगुणवत्तोच्चशिक्षासंस्थां संस्थाप्य अधिकप्राप्तये अभिवर्धनम् ।

(ङ) स्थानीयभाषया /भारतीयभाषया अथवा द्विभाषया पाठ्यमानानां गुणवत्तोच्चशिक्षासंस्थानां निर्माणं विकासश्च ।

(च) सार्वजनिक-सर्वकारेतरोच्चशिक्षासंस्थायाम् एसईडीजी इत्यस्य कृते अधिकवित्तीयसहायः छात्रवृत्तिप्रदानं च ।

(छ) एसईडीजी-मध्ये उच्चशिक्षायाः अवसरस्य छात्रवृत्तिविषये च औटरीच-कार्यक्रमस्य आयोजनम् ।

(ज) उत्तमभागग्रहणार्थम् अध्ययनपरिणामार्थं च तन्त्रज्ञानसाधनानाम् अभिवृद्धिः प्रोत्साहनं च ।

14.4.2 सर्वाभिः उच्चशिक्षासंस्थाभिः करणीयाः प्रक्रमाः -

(क) उच्चशिक्षाप्राप्त्यर्थम् अपेक्षितस्य व्ययस्य शुल्कस्य न्यूनीकरणम् ।

(ख) सामाजिकार्थिकरूपेण पीडितानां छात्राणां कृते वित्तीयसहायः छात्रवृत्तिप्रदानं च ।

(ग) उच्चशिक्षायाः अवसरविषये छात्रवृत्तिविषये च औटरीच- कार्यक्रमाः ।

(घ) प्रवेशप्रक्रियायाम् अधिकसमावेशः।

(ङ) पाठ्यक्रमाणाम् अधिकसमावेशः ।

(च) उच्चशिक्षाकार्यक्रमाणाम् उद्योगसामर्थ्यस्य अभिवर्धनम् ।

(छ) भारतीयभाषया द्विभाषया च पाठ्यमानानां स्नातकपाठ्यक्रमाणाम् आधिक्येन विकासः।

(ज) सर्वाणि भवनानि सौकर्याणि चक्रासन्दप्रवेशयोग्यानि दिव्याङ्गानां कृते अनुकूलयोग्गानि इति निश्चितिः।

(झ) वञ्चितशैक्षिकपृष्ठभूमितः समागतानां छात्राणां कृते सेतुपाठ्यक्रमाणां निर्माणम्।

(ञ) सर्वेषां विद्यार्थिनां कृते मार्गदर्शनपरामर्शकार्यक्रमैः सामाजिक-भावनात्मक-शैक्षिकसहायस्य प्रदानम् ।

(ट) पाठ्यक्रमेण सह उच्चशिक्षासंस्थानां सर्वेषु स्तरेषु बोधकवर्ग-परामर्शक-विद्यार्थिनां कृते लिङ्गसमानताम् अभिज्ञानं च प्रति संवेदानशीलस्य समावेशः ।

(ठ) भेदभाव - उत्पीडननियमान् कठिनतया पालनम् ।

(ड)एसईडीजी अधिकभागग्रहणस्य निश्चयाय संबद्धविशिष्टयोजनानां समावेशेन सह संस्थाविकासाय योजनानां निर्माणम्, तत्र उपर्युक्ताः बिन्दवः अन्तर्भवेयुः किन्तु एतावदेव न स्युः ।

## 15. अध्यापकशिक्षा

15.1 भविष्यनिर्मतृणां शिक्षकाणां समूहस्य निर्माणे अध्यापकशिक्षायाः भूमिका अधिकमहत्त्वपूर्णा । शिक्षकाणां निर्माणम् एतादृशी प्रक्रिया वर्तते तत्र बहुविषयकदृष्ट्या ज्ञानेन च सह उत्तमप्रशिक्षकाणां निर्देशने मान्यतामूल्येनिर्माणेन सह अभ्यासस्यापि आवश्यकता विद्यते । शिक्षकाः शिक्षणप्रक्रियया शिक्षणशास्त्रस्य प्रगत्या च सह

भारतीयमौल्यानि, भाषाः, ज्ञानम्, लोकाचारम्, जनजातीयपम्पराज्ञानेन सह परम्परां च प्रति जागरूकाः स्युः ।

15.2 सर्वोच्चन्यायालयेन आरचितस्य जे.एस्.वर्माआयोगस्य (2012) अनुगुणं दशसहस्राधिकसंख्याकाः स्वतन्त्र-टीईआई अध्यापकशिक्षां प्रति लेशमात्रमपि गम्भीरप्रयासं न कुर्वन्तः सन्ति किन्तु आधिक्येन उपाधेः विक्रयणं कुर्वन्तः सन्ति ।अद्यावधि कृतः प्रयासः नहि व्यवस्थायां विद्यमानभ्रष्टाचारम् अवरोद्धुं क्षमाः, न वा गुणवत्तायाः कृते निर्दिष्टमूलभूतमानकस्य संयोजने । अनेन प्रयासेन अस्मिन् क्षेत्रे गुणवत्तायां नवाचारे च नकारत्मकप्रभावः समापतितः ।अतः अस्य क्षेत्रस्य तन्नियमप्रणाल्यां महत्त्वपूर्णप्रवत्या पुनरुद्धारस्य तात्कालिकी अपेक्षा विद्यते येन गुणवत्तायाः उच्चमानकस्य निर्धारणा स्यात् एवं शिक्षकशिक्षाव्यवस्थायाम् अखण्डतायाः विश्वसार्हतायाः प्रभावपूर्णायाः गुणवत्तायाः च प्रतिष्ठापनं स्यात् ।

15.3 शिक्षणवृत्तेः प्रतिष्ठां पुनःस्थापयितुम् समग्रतायाः विश्वासार्हतायाः च स्तरस्य अभिवृद्धये प्रापणार्थं च तेन माध्यमेन उत्तमविद्यालयप्रणाल्याः निश्चयार्थं मूलभूतशैक्षिकमापदण्डं पूरयितुम् असमर्थानाम् अयोग्यानाम् अध्यापकशिक्षासंस्थानाम् (टीईआई) विरुद्धम् नियमोल्लङ्घनार्थम् एकवर्षप्रदानेन सह ततः परं कठोरक्रमं कर्तुम् अधिकारो भवति । तेन 2030 यावत् केवलं शैक्षिकरूपेण सुदृढः बहुविषयिकः एकीकृताध्यपकशिक्षाकार्यक्रमः एव कार्यं करोति ।

15.4 अध्यापकशिक्षार्थं बहुविषयकान्तःप्रवाहेन सह गुणवत्ताविषयस्य शैक्षणिकप्रक्रियायाः च अपेक्षा विद्यते अतः सर्वेपि अध्यापकशिक्षाकार्यक्रमाः समग्रबहुविषयसंस्थासु आयोजिताः स्युः । एतदर्थं बहुविषयकविश्वविद्यालयानां सार्वजनिकविश्वविद्यालयानां बहुविषयकमहाविद्यालयानां च लक्ष्यं स्यात् यत्ते उच्चकोटिकशिक्षाविभागस्य स्थापनां विकासं च कुर्युः ।शिक्षायाम् आधुनिकसंशोधननिर्वर्तनेन सह मनोविज्ञानम्, दर्शनशास्त्रम्, समाजशास्त्रम्, तान्त्रिकविज्ञानम्, भारतीयभाषाः, कला, संगीतम्, इतिहासः साहित्यम्, विज्ञानम्, गणितम्, इत्याद्यन्यविषयेषु संबद्धविभागसहयोगेन भाविशिक्षकाणां शिक्षणार्थं शिक्षाशास्त्र(बी.एड)कार्यक्रमस्य संचालनं करिष्यन्ति । अनेन सह 2030 यावत् सर्वासां एककशिक्षकशिक्षासंस्थानां बहुविषयकशिक्षासंस्थारूपेण परिवर्तनस्य अपेक्षा भवति यतोहि ताः संस्थाः अपि चतुर्वर्षीयसमग्रशिक्षकप्रशिक्षणकार्यक्रमस्य संचालनं कुर्युः ।

15.5 2030यावत् बहुविषयकशिक्षासंस्थाभिः प्रदीयमानः चतुर्वर्षीय समेकीकृत-शिक्षाशास्त्र-(बी.एड) पाठ्यक्रमः विद्यालयशिक्षकाणां कृते न्यनोपाधियोग्यता भविष्यति । इयं चतुर्वर्षीयशिक्षाशास्त्रशिक्षा भाषा, इतिहासः, संगीतम्, गणितम्, संगणकविज्ञानम् , रसायनविज्ञानम्, अर्थशास्त्रम्, इत्यादिषु विशेषविषयेषु समग्रद्विमुखस्नातकपदवी भवति । आधुनिकशिक्षाशास्त्रशिक्षणेन सह शिक्षकशिक्षायां समाजशास्त्रम्, इतिहासः, विज्ञानम्, मनोविज्ञानम्, प्रारम्भिकबाल्यावस्थाशिक्षा, मूलभूतसाक्षरता, संख्याज्ञानम्, भारतीयज्ञानं तन्मूल्यानि,लोकाचारः, कला, परम्परा इत्याद्यनेके विषयाः अन्तर्भवन्ति । चतुर्वर्षीयैकीकृतशिक्षाशास्त्र (बी.एड) संचाल्यमाना प्रत्येकम् उच्चशिक्षासंस्था यदि एकस्मिन् विषयविशेषे पूर्वमेव स्नातकपदवीं प्राप्ताः उत्तमश्छात्राः अग्रेपि शिक्षणम् अनुवर्तयितुम् इच्छन्ति चेत् तादृशेभ्यः तस्मिन् परिसरे द्विवर्षीयशिक्षाशास्त्र(बी.एड)कार्यक्रमस्य प्रारूपं निर्माय संचालयितुं शक्नोति। यदि विद्यार्थीनः कस्मिंश्चिदपि विषयविशेषे चतुर्वर्षीयस्नातकपदवीं प्राप्ताः चेत् तादृशेभ्यः एकवर्षस्य शिक्षाशास्त्र(बी.एड) कार्यक्रमस्य संचालनमपि कर्तुं शक्नोति । चतुर्वर्षीय-द्विवर्षीय-एकवर्षीय- शिक्षाशास्त्र(बी.एड) कार्यक्रमम् आकर्षयितुं श्रेष्ठविद्यार्थिभ्यः छात्रवृत्तिव्यवस्थापि कल्प्यते ।

15.6 अध्यापकशिक्षाकार्यक्रमं संचाल्यमानाभिः उच्चशिक्षासंस्थाभिः शिक्षायां तत्सम्बद्धविषयेषु विषयविशेषज्ञानाम् उपलब्धिः निश्चीयते । प्रत्येकम् उच्चशिक्षासंस्था संभूयकार्यं कर्तुं सार्वजनिक-सार्वजनिकेतरविद्यालयानां तत्परिसराणां च संपर्कजालो भवति ।तत्र भाविशिक्षकाः सामुदायिकसेवा,वयस्क-व्यावसायिकशिक्षा इत्यादिषु भागग्रहणेन सह शिक्षणकार्यमपि संपादयन्ति ।

15.7 शिक्षकशिक्षार्थं समानमानकस्य स्थापनाय पूर्वसेवाशिक्षकसिद्धताकार्यक्रमे प्रवेशः राष्टियपरीक्षणसंस्थया आयोजितेन उपयुक्तविषययोग्यतापरीक्षणेन भवति तथा देशस्य भाषा सांस्कृतिकवैविध्यमित्येतत् सर्वं मनसि निधाय मानकीकरणं भवति ।

15.8 शिक्षाविभागस्य संकायसदस्यानां विवरणं वैविध्यं स्यात् किन्तु शिक्षणम्/ क्षेत्रम्/शोधानुभवः अनर्घ्यं विद्यते । साक्षात् विद्यालयशिक्षासंबद्धे सामाजिकविज्ञानक्षेत्रे तद्यथा मनोविज्ञानम्, बालविकासः, भाषाविज्ञानम्, समाजशास्त्रम्, दर्शनम्, अर्थशास्त्रम्, राजनीतिविज्ञानम् इत्यादिषु तथा विज्ञानशिक्षा, गणितशिक्षा, सामाजिकविज्ञानशिक्षा, भाषाशिक्षा, इत्यादिकार्यक्रमैः सह सम्बद्धविषयेषु प्रशिक्षणं प्राप्तानां संकायसदस्यानां कृते

शिक्षकशिक्षासंस्थासु समाकर्षणं नियोजनं च क्रियते । येन शिक्षकाणां बहुविषयकशिक्षायाः परिकल्पनाविकसस्य कृते बलं प्रदातुं शक्येत ।

15.9 शोधे नवीनप्रवेशिनः सर्वे कस्मिन् अपि विषये प्रवेशिनः स्युः किन्तु ते डोक्टोरल-प्रशिक्षणकाले चितेन शोधविषयेन संबद्धं शिक्षण/शिक्षा/अध्यापन/लेखन-क्रेडिट-आधारितपाठ्यक्रमं स्वीकुर्युः ।तेषां डोक्टोरेट-प्रशिक्षणकाले तेभ्यः शैक्षणिकप्रक्रियाः, पाठ्यक्रमनिर्माणम्, विश्वसनीयमूल्याङ्कनविधिः, संवादः इत्यादिक्षेत्राणाम् अनुभवः प्रदीयते। यतोहि एतेषु नैके शोधार्थिनः चितस्य विषयस्य संकायसदास्याः सार्वजनिकप्रतिनिधयः संवाहकाश्च भवेयुः । शोधार्थिनः शिक्षणसहायकरूपेण अन्यमाध्यमेन च न्यूनसमयस्य शिक्षणानुभवमपि प्राप्नुवन्ति।एतदर्थं देशस्य विश्वविद्यालयेषु संचाल्यमानस्य शोधपाठ्यक्रमस्य पुनरुन्मुखीकरणं क्रियते ।

15.10 महाविद्यालयानां विश्वविद्यालयानां च शिक्षकाणां कृते सेवारतसततव्यावसायिक – विकासप्रशिक्षणं विद्यमानसांस्थिव्यवस्था च प्राचल्यमानोपक्रमेण अनुवर्तते । किन्तु गुणवत्ताशिक्षार्थम् अपेक्षितानां समृद्धशिक्षणाधिगमप्रक्रियाणाम् अपेक्षाणां च पूरणार्थम् एतेषां दार्ढ्यसंपादनं विस्तारश्च भवति। शिक्षकाणां सद्यस्क(आनलाईन) प्रशिक्षणार्थं स्वयम्/दीक्षा इत्यदि-तन्त्रज्ञानस्य आलम्बनम्(प्लाटफार्म) उपयोक्तुं प्रोत्साह्यते । येन मानकीकृतप्रशिक्षणकार्यक्रमं न्यूनसमये अधिकशिक्षकेभ्यः प्रापयितुं शक्यते ।

15.11 मार्गदर्शनार्थं राष्टियविनियोगस्य (मिशन) स्थापना करिष्यते । तत्र अधिकसंख्यया वरिष्ठानां/सेवानिवृत्तानाम् उत्तमसंकायसदस्यानां समावेशनं क्रियते । तत्र भारतीयभाषाणां पाठने समर्थाः तथा विश्वविद्यालयानां महाविद्यालयानां शिक्षकाणां कृते अल्पकाले दीर्घकाले च मार्गदर्शनं व्यावसायिकसहायं कर्तुं समर्थाश्च अन्तर्भवन्ति ।

## 16. व्यावसायिकशिक्षायाः नवीना कल्पना

16.1 द्वादश-पञ्चवर्षीययोजनयाः (2012 - 2017) अनुगुणं 19-24 आयुर्वर्गे विद्यमानेषु भारतीय कर्मकरेषु अत्यन्तं न्यूनं प्रतिशतं (5% तः न्यूनम् ) जनाः औपचारिकव्यावसायिकशिक्षां प्रापवन्तः। किन्तु संयुक्तराज्य-अमेरिकादेशे 52%,जर्मनीदेशे

75%, दक्षिणकोरियादेशे अत्यधिकं 96%, विद्यते । इयं संख्या भारते व्यावसायिकशिक्षायाः प्रसारस्य वेगेन समानयनस्य अत्यन्तापेक्षां रेखिङ्कितं करोति।

16.2 व्यावसायिकशिक्षां प्राप्तवतां छात्राणां संख्यायां न्यनतायाः प्रमुखं कारणं यत् पूर्वं व्यावसायिकशिक्षा मुख्यरूपेण एकादशस्तरे द्वादशस्तरे च तथा अष्टमस्तरतः उपरि स्तरस्य निर्गमने केन्द्रितम् आसीत् । एतदतिरिच्य व्यावसायिकविषयैः सह एकादशद्वादशकक्षोत्तीर्णवतां छात्राणां सविधे विशेषतया उच्चशिक्षायां स्वचिते व्यवसायक्षेत्रे अग्रे गन्तुं स्पष्टमार्गः नासीत् । सामान्योच्चशिक्षाप्रवेशामापदण्डः व्यावसायिकशिक्षायोग्यवतां विद्यार्थिनां कृते अवसरकल्पनादृष्ट्या विन्यासः न कृतः आसीत् । तेन कारणेन मुख्यधारातः शैक्षणिकशिक्षातः वञ्चिताः संजाताः । एतेन व्यावसायिकशिक्षायाः विषयेण संबद्धानां विद्यार्थिनां कृते शिक्षायाम् अग्रे गन्तुं मार्गः एव अवरुद्धः । इमां समस्यां 2013 वर्षे राष्ट्रियकौशलयोग्यताविन्यासस्य (एनएसक्यूएफ) घोषणया निवारयितुं प्रयासः कृतः वर्तते ।

16.3 व्यावसायिकी शिक्षा मुख्यधाराशिक्षातः अल्पमहत्वयुक्ता शिक्षा वर्तत इति मन्यन्ते एतदपि विज्ञातं यत् मुख्यधारया शिक्षया सह सामाञ्जस्यं स्थापयितुमनर्हाः तेभ्यः इयं शिक्षा वर्तते इति। इयं धारणा अधुनापि तथैव विद्यामाना विद्यार्थिभिः चितान् विकल्पान् प्रभावयति। अयं गम्भीरचिन्तायाः विषयोस्ति तथा च एतदपाकर्तुं पुनर्कल्पनाया आवश्यकता विद्यते यद् भविष्यत्काले छात्रणां समक्षं व्यावसायिकीशिक्षायाः प्रस्तावः कथं स्थापनीयः इति।

16.4 अस्याः नीतेः उद्देश्यं व्यावसायिकीशिक्षया सह अन्वितानां सामाजिकश्रेणीनाम् स्थितेरपवारणं वर्तते तदर्थमिदमावश्यकं यद् समस्तविद्यालयमहाविद्यालयविश्वविद्यालयाः स्तरबद्धोपायने व्यावसायिकीशिक्षायाः कार्यक्रमान् मुख्यधारया शिक्षया सह समेकीकरणं तथा चास्य प्रारम्भः आरम्भिकवर्षेषु व्यावसायिकशिक्षायाः अनुभवप्रदानेन स्यात्। येन पुनः समुचितरूपेण उच्चतरप्राथमिकमाध्ययिककक्षातः उच्चशिक्षायाः पर्यन्तं प्रवर्तेत। एवं व्यावसायिकीशिक्षायाः समेकीकरणमिदं सुनिश्चेष्यति यद् प्रत्येकं छात्रः एकेन व्यवसायेन सम्बद्धान् कौशलान् शिक्षेत् तथा अन्यानपि व्यवसायान् परिचिनुयात्। अस्य परिणामस्वरूपं स श्रमस्य महत्त्वं, निर्माणेन सह भारतीयकला, अन्यव्यवसायानां महत्त्वं च परिचेष्यति।

16.5 2025यावत् विद्यालयस्य उच्चशिक्षाप्रणाल्याः च माध्यमेन न्यूनातिन्यूनं पञ्चाशत्प्रतिशत(50%)छात्रेभ्यः व्यावसायिकीशिक्षाया अनुभवं प्रदास्यते। तदर्थं लक्ष्येन

समयसीमया सह एका निर्दिष्टा योजनापि विकसयिष्यते। एते सततविकासलक्ष्याणां लक्ष्यसंख्या 4.4इत्यनेन सह संगच्छते। तथा च भारतस्य जनसंख्यासंसाधनस्य पूर्णलाभप्राप्तावपि सहायकाः भविष्यन्ति। जीईआर लक्ष्याणां निश्चयनकाले व्यावसायिकशिक्षया सम्बद्धच्छात्रणां संख्यापि मनसि निधेया भविष्यति। आगामिदशके चरणबद्धोपायेन समस्तमाध्यमिकविद्यालयानां शैक्षणिकविषयेषु व्यावसायिकशिक्षापि समेकीकरिष्यते। एतदर्थं माध्यमिकविद्यालय-आईटीआई तान्त्रिकशिक्षणेन स्थानीयोद्यमेन च सह सम्पर्कं सहयोगश्च करिष्यते। विद्यालयेषु समूहः वाक्शैली (हब स्पॉक मोडल) इत्यादिषु कौशलप्रयोगशालाः स्थापिताः सर्जिताश्च भविष्यन्ति। यत्र अन्य-विद्यालया अपि एतत् सौकर्यमुपयोक्ष्यन्ति। उच्चशिक्षासंस्थाः स्वयमेव अथवा उद्योगैः सर्वकारेतरसंघटनैश्च सह समन्वयेन व्यावसायिकीं शिक्षां प्रदास्यन्ति। 2013 इत्यस्मिन् वर्षे प्रारब्धः बी-वोक-उपाधिः पूर्ववदेव अनुवर्तते किन्तु एतदतिरिच्य अपि व्यावसायिकपाठ्यक्रमाः अन्यस्नातकपाठ्यक्रमेषु नामाङ्कितेभ्यः छात्रेभ्यः उपलभ्यन्ते तत्र चतुर्वर्षीयः बहुविषयक स्नातकपाठ्यक्रमोपि अन्तर्भवति ।उच्चशिक्षासंस्थाभ्यः मृदुकौशलेन(साफ्ट स्किल)सह विभिन्नकौशलेषु सीमितावधेः प्रमाणपत्रपाठ्यक्रस्य संचालनार्थम् अनुमतिः भविष्यति। 'लोकविद्या' अर्थात् भारते विकसितेन महत्त्वपूर्णव्यावसायिकज्ञानेन सम्बद्धविषयान् व्यावसायिकशिक्षापाठ्यक्रमे समेकीरणेन छात्राणां कृते सरलान् करिष्यते । यत्र संभवः स्यात् तत्र ओडीएल -माध्यमेन व्यावसायिकपाठ्यक्रमस्य संचालनस्य सम्भावना अन्विष्यते।

16.6 आगामिदशके व्यावसायिकी शिक्षा चरणबद्धोपायेन सर्वविद्यालयेषु उच्चशिक्षासंस्थासु च समेकीकरिष्यते। व्यावसायिकशिक्षायाः मुख्यक्षेत्रस्य चयनं कौशल-अन्तर-विश्लेषणं(स्किल गैप एनलिसिस) स्थानीयावसरं चाधृत्य विधास्यते। शिक्षामन्त्रलयः अस्यारम्भस्य निरीक्षणाय उद्यम सहायेन व्यावसायिकीशिक्षाविशेषज्ञैः व्यावसायिकमन्त्रलयप्रतिनिधिभिः सह मिलित्वा एका वृत्तिसहितशिक्षणसमेकीकरणराष्ट्रियसमितिः नेशनल कमेटी फॉर द इंटीग्रेशन् ऑफ वोकेशनल एजुकेशन (एनसीआईवीई) इत्यस्य आरचना करिष्यते।

16.7 आदौ अस्याः प्रक्रियायाः आरभकेभ्यः संस्थानेभ्यः इदम् आवश्यकं वर्तते यद् ते नवाचारमाध्यमेन सफलयुक्तानाम् आदर्शानां प्रणालीनामन्वेषणं कुर्युः ।ततश्च ताः एनसीआईवीई एतद्वारा स्थापिततन्त्रस्य माध्यमेन अन्यसंस्थानैः सह विनिमयनं कुर्युः येन व्यावसायिकशिक्षायाः विस्तारार्थं साहायः स्यात्। व्यावसायिकशिक्षायाः प्रशिक्षुतायाः प्रदायकान् विभिन्नादर्शान् उच्चतरशिक्षासंस्थानानि प्रयोगो सामानयन्ति। उद्योगैः सह समन्वयानुसारं उच्चशिक्षासंस्थानेषु पोषणकेन्द्राणि(इन्क्यूबेशन सेन्टर) स्थापयिष्यन्ते।

16.8 राष्ट्रीयकौशलयोग्यतानुबन्धः(एनएसक्यूएफ) प्रत्येकं विषयं प्रति व्यवसायार्थं/वृत्यर्थं विस्तारेण निर्मितो भविष्यति। एतदतिरिच्य भारतीयमानकानाम् अन्ताराष्ट्रीयश्रमसंघटनेन निर्मितैः अन्ताराष्ट्रीयमानकवर्गीकरणैः सह मेलनं भविष्यति। अयम् अनुबन्धः पूर्ववर्तिशिक्षायाः आवश्यकतायै आधारं प्रदास्यति । अनेन माध्यमेन निर्गतच्छात्रणां व्यावहारिकमनुभवं अनुबन्धस्य प्रासंगिकस्तरेण सह संयोज्य ते पुनः औपचारिकप्रणाल्या योजयिष्यते। क्रेडिटाधारितोयम् अनुबन्धः छात्रणां सामान्यतः व्यावसायिकशिक्षापर्यन्तगमनं सुगमं करिष्यति।

## 17. नवीनराष्ट्रियानुसन्धानप्रतिष्ठान(एनआरएफ)माध्यमेन सर्वेषु क्षेत्रेषु गुणवत्तापूर्ण- -शैक्षणिकानुसन्धानस्य प्रेरणा

17.1 विशालां क्रीयशीलार्थव्यवस्थां विकासयितुं नैरन्यर्यार्थं च ज्ञानसर्जनस्य अनुसंधानस्य च महत्त्वपूर्णा भूमिका वर्तते। तेन समाजस्य उन्नतिः भवति तथा निरन्तरं राष्ट्रं प्रगतिपथे नेतुं प्रेरणापि लभ्यते।निःसन्देहो यद् सम्पूर्णे इतिहासे सर्वसमृद्धसंस्कृतितः (यथा भारतम्, मेसोपोटामिया, ईजिप्त, चीन,ग्रीस) आधुनिकसंकृतिपर्यन्तं (यथा संयुक्तराज्य, अमेरिका, जर्मनी, इजरायल, दक्षिणकोरिया, जापान) एतादृशः ज्ञानसमृद्धसमाजः आसीत् अस्ति च । ये बौद्धिकां भौतिकां च सम्पदं नवीनज्ञानं प्रति आधारभूतेन योगदानेन च प्राप्तवन्तः। विज्ञानेन सह कलायाः भाषायाः संस्कृतेश्च क्षेत्रे ये न केवलं स्वसंस्कृतेः अपितु विश्वे विद्यमानायाः संस्कृतेः परिष्कारं समुन्नतिं च कृतवन्तः।

17.2 सदृढा शोधपरिसरव्यवस्था अधुना विश्वे वेगेन जायमानस्य परिवर्तनस्य कारणेन पूर्वापेक्षया महत्त्वपूर्णतमं वर्तते। उदाहरणार्थं यथा जलवायुपरिवर्तनम्, जनसांख्यिकी गतिशीलता प्रबन्धनं च, जैविकतन्त्रज्ञानम्, डिजिटल-आपणस्य विस्तारः, यान्त्रिकी शिक्षा, कृत्रिमबुद्धिमत्ता चेत्यादयः। भारतमेतेषु विषमक्षेत्रेषु नेतृत्वं कर्तुमिच्छति चेत् एवं स्वविशालप्रतिभासेतुं पुनः ज्ञानमुख्यसमाजनिर्माणस्य क्षमतां प्रापयितुमिच्छति तर्हि आगामिषु वर्षेषु दशकेषु च राष्ट्रस्य स्वानुसन्धानस्य क्षमतानां संभावनानाञ्च सर्वविभागेन उत्पादनेन सह एकस्य महत्त्वपूर्णविस्तारस्य च आवश्यकता अस्ति। अधुना कस्यापि राष्ट्रस्य आर्थिकस्यबौद्धिकस्य सामाजिकस्य पर्यावरणस्य तान्त्रिकीयस्य च विकासार्थं शोधस्य महत्त्वं पूर्वापेक्षया अधिकं वर्तते।

17.3 अनुसन्धानस्य इयत् महत्वपूर्णम् अस्ति चेदपि भारते वर्तमानसमये अनुसन्धानं नवाचारनिवेशश्च संयुक्तराज्यमेरिकायां 2.8%, इजराइले 4.3%, दक्षिणकोरियायां 4.2%, इत्यस्य तुलनायां जीडीपि 0.69% विद्यते।

17.4 अधुना भारतस्य कृते सामाजिकप्रत्याह्वानस्य परिहारोपायस्य अपेक्षा वर्तते। यथा सर्वेभ्यो नागरिकेभ्यः शुद्धपेयजलस्य प्रदानम्, गुणवत्तापूर्णा शिक्षा, स्वास्थ्यसेवा, अभिवर्धितपरिवहनम्,उत्तमवायुः विद्युत् मूलभूतव्यवस्था इत्यादि। एतदर्थं व्यापकचिन्तनस्य समाधानात्मकोपायस्य, क्रियान्वयस्य चावश्यकता भविष्यति। यच्च न केवलं शीर्षविज्ञानस्य तान्त्रिकविज्ञानस्य च आधारितं भविष्यति अपितु सामाजिकविज्ञानस्य मानवीयमौल्यस्य च तथा राष्ट्रस्य विभिन्नसामाजिकसांस्कृतिकानां पर्यावरणीयायामानां सूक्ष्मावगममपि आधृत्य भविष्यति। एतेषां प्रत्याह्वानानां समाधानाय विभिक्षेत्रेषु उच्चस्तरीयान्तर्विषयकस्य अनुसंधानं विधातुं स्वकीया क्षमता महत्त्वपूर्णा वर्तते। स्वकीयशोधक्षमता राष्ट्रम् अनायासेन अन्यस्मात् राष्ट्रात् अनुसंधानस्य आयातेः अनुकूलशोधसमन्वयने योग्यतां प्रददाति।

17.5 एतदतिरिच्य सामाजिकसमस्यानां समाधानार्थं कस्यापि राष्ट्रस्य परिचितिं, तस्य प्रगतिं, आध्यात्मिकीं बौद्धिकीं च संतुष्टिं, सर्जनात्मकं च तस्य इतिहासस्य,भाषायाः, कलायाः, संस्कृतेश्च माध्यमेन प्राप्तुं शक्यते। अतः विज्ञानस्य सामाजिकविज्ञानस्य च क्षेत्रे नवाचारैः सह कलायाः मानवीयमौल्यस्य क्षेत्रेषु अनुसन्धानं कस्यापि राष्ट्रस्य प्रगत्यै प्रवुद्धतायै च अधिकमहत्त्वपूर्णं विद्यते।

17.6 भारते शिक्षणसंस्थानेषु अनुसंधाननवाचारौ महत्त्वपूर्णौ स्तः विशेषरूपेण उच्चशिक्षाक्षेत्रे। समग्रेतिहासतः विश्वस्य सर्वश्रेष्ठविश्वविद्यालयतः च प्राप्तेभ्यः साक्ष्येभ्यो ज्ञातं यद् उच्चशिक्षास्तरे सर्वोत्तमं शिक्षणं शिक्षणप्रक्रियां तस्मिन् वातावरणे च भवति ।यत्र अनुसन्धानस्य ज्ञानसर्जनस्य च एका सुदृढा संस्कृतिरासीत्। एवं विश्वस्य श्रेष्ठानि अनुसन्धानानि बहुविषयिषयकविश्वविद्यालयेषु समजायन्त।

17.7 भारते विज्ञानं, गणितं, कला, साहित्यं, स्वरविज्ञानं, भाषा, चिकित्सा, कृषिः इत्यादिषु विषयेषु अनुसंधानस्य ज्ञानसर्जनस्य च ऐताहासिकी परम्परास्ति। एकविंशतिशतके भारतम्

अनुसन्धाने नवाचारे नेतृत्वं कर्तुं भारतस्य प्रबुद्धज्ञानं प्रति अधिकं बलं प्रदातव्यं येन प्रबुद्धज्ञानसमाजरूपेण विश्वस्य त्रिषु आर्थिकव्यवस्थासमृद्धेषु भारतम् अन्यतमं भविष्यति ।

17.8 अतः इयं नीतिः भारते अनुसन्धानस्य गुणवत्तां तथा तत्परिमाणं परिवर्तयितुं व्यापकदृष्टिं प्रसारयति। नीतौ विद्यालयीयशिक्षायां निश्चितं परिवर्तनं वर्तते। यथा शिक्षणस्यान्वेषणं अन्वेषणाधारिता शैली, वैज्ञानिकपद्धतिः, तार्किकचिन्तनस्य प्राधान्यं च। छात्राभिरुचिं प्रतिभाश्च परिचेतुं विद्यालयेषु व्यावसायिकपरामर्शः, अनुसन्धानं प्रति उत्तेजनम्, उच्चशिक्षासंस्थासु समग्रशिक्षायाः बहुविषयकवातावरणस्य निर्माणम्, स्नातकपाठ्यक्रमे अनुसन्धानं तथा अन्तःसम्बन्धस्य समावेशः, अनुसन्धाने बलं प्रदीयमाना संकायवृतिनिर्वहणप्रबन्धनप्रणाली, प्रशासनिकविनियामकपरिवर्तनं यच्च शिक्षकान्, संस्थागतस्वायत्तां नवाचारं च प्रोत्सायहयेत् । उपर्युक्ताः सर्वे बिन्दवः राष्ट्रे शोधमानसिकतां दृढीकर्तुं महत्वपूर्णास्सन्ति।

17.9 एषु विभिन्नतत्त्वेषु सक्रियं कार्यं कर्तुं इयं नीतिः राष्ट्रीयानुसन्धानप्रतिष्ठानम् इत्यस्य स्थापनाम् अनुशंसति। येन राष्ट्रे गुणवत्तायुक्तानुसन्धानं समुचितरुपेण विकसितम् उत्प्रेरितञ्च स्यात्। एनआरएफ इत्यस्य व्यापकं लक्ष्यम् अस्माकं विश्वविद्यालयानां माध्यमेन शोधसंस्कृतेः सुदृढीकरणं वर्तते । विशेषरूपेण एनआरएफ योग्यताधारितस्य पुनर्मूल्याङ्कनाधारितस्य च शोधनिधेः कृते विश्वसनीयमाधारं प्रददाति। यश्च उत्कृष्टशोधार्थम् अपेक्षितप्रोत्साहनेन राष्टे अनुसन्धानसंस्कृतिं विकसयितुं सहायको भविष्यति । राज्याविश्वविद्यालयेषु अन्यसार्वजनिकसंस्थानेषु च अनुसन्धानस्य स्थापनां विकासं च करोति तथा यत्रानुसन्धानस्य संभावनाः परिमिताः तत्र विकासस्य कार्यं करिष्यति । एनआरएफ प्रतिस्पर्धत्मकरूपेण सर्वेषु बहुविषयकेषु अनुसन्धानं प्रति वित्तं दास्यति। सफलानुसन्धानं प्रति मान्यता दास्यते तथा च अधिकसम्बन्धयुतैः प्रासङ्गिकसर्वकारीयसंस्थाभिः सह उद्यमैः सर्वकारेतरैः परोपकारिभिर्वा संघटनैः सह मिलित्वा कार्यान्वयनं करिष्यते ।

17.10 एतादृशानि सन्ति संस्थानानि यानि कस्मिंश्चिदपि स्तरे अनुसन्धानं प्रति धनराशिं यच्छन्ति ।यथा विज्ञानतन्त्रज्ञानविभागः(डीएसटी), परमाणुऊर्जाविभागः(डीएई) जैविकतन्त्रज्ञानविभागः(डीबीटी)भारतीयकृषिअनुसन्धानपरिषद् (आईसीएसआर) भारतीय इतिहास अनुसन्धान-परिषद् (आईसीएचआर) विश्वविद्यालय-अनुदान-आयोगश्च (यूजीसी) इत्यादयः विभिन्नसर्वकारेतरपरोपकारिसंघटनानि स्वकीयावावश्यकतानुसारं स्वतन्त्ररूपेण

धनराशिगतानुसन्धानं प्रचालिष्यन्ति। तथापि एनआरएफ परीक्ष्य अन्यवित्तीयसंस्थाभिः सह समन्वयं स्थापयिष्यति तथा च विज्ञानम् अभियान्त्रिकम्, इत्याद्यन्यसक्षमशैक्षिकसंस्थाभिः सह कार्यं करिष्यति। अनेन सह सम्बद्धेषु अपेक्षितोद्देश्येषु प्रयासेषु च प्रयत्नस्य पूनरावर्तनस्य न्यूनतां सुनिश्चेष्यति। एन-आर-एफ स्वतन्त्ररूपेण सर्वकारस्य प्रशासकपर्यायसमितिः (रोटेटिंग बोर्ड ऑफ गवर्नर्स) इत्यनया शासितो भविष्यति। यस्मिन् विभिन्नक्षेत्रणां कुशलशोधकर्तारः आविष्कर्तराश्च अन्तर्भवन्ति।

17.11 एनआरएफ इत्यस्य प्राथमिकगतिविधयः इत्थं भविष्यन्ति ।

(क) सर्वेषु विभिन्नविषयेषु प्रतिस्पर्धिभ्यः पुनर्मूल्याङ्कितेभ्यः शोधप्रस्तावेभ्यः वित्तप्रदानम्।

(ख) शिक्षासंस्थानेषु विशेषतः महाविद्यालयेषु विश्वविद्यालयेषु च यत्र अनुसन्धानं शैशवावस्थायां विद्यते एतेभ्यः संस्थानेभ्यः परामर्शं प्रदाय अनुसन्धानस्य प्रारम्भः, विकासः तदर्थं च सामग्रीप्रदानम्।

(ग) शोधार्थिनां सर्वकारसम्बद्धशाखानां उद्योगानां च मध्ये सम्पर्कस्थापनं, समन्वयनकार्यम्, येन शोधार्थिनां कृते तात्कालिकराष्ट्रीयानुसन्धानप्रगतिविषयाणां ज्ञानं स्यात्। येन नीतिनिर्मातृन् निरन्तरम् नवानानुसन्धानस्य साफल्याय जागरूकान् कर्तुं शक्येत। तेन नीतेः कार्यान्वयनं उत्तमरूपेण आनेतुं शक्येत।

(च) सर्वोत्तमानुसन्धानस्य तत्प्रगतेश्च प्रख्यापनम्।

## 18. उच्चशिक्षायाः नियामकप्रणाल्याम् आमूलाग्रं परिवर्तनम्

18.1 दशकेभ्यः उच्चतरशिक्षायाः विनियमनम् अधिकं दृढमासीत्। यस्य अतिन्यूनप्रभावेण सह विनियमनस्य प्रयासो विहितः। विनियामकप्रणाल्याः यान्त्रिकं निरुत्साहिस्वभावः च मूलभूतसमस्याभिः प्रभावितम् आसीत्। यथा केषुचिदेव निकायेषु शक्तेः केन्द्रीकरणं, तेषां निकायानां मध्ये स्वहितानां संघर्षः च तेन उत्तरदायित्वस्य न्यूनता भवति। उच्चशिक्षाक्षेत्रं पुनः सक्रियं कर्तुं तथा चास्य सफलतायै नियामकप्रणाल्याः पूर्णारूपेण परिवर्तनस्य आवश्यकता विद्यते।

18.2 उपर्युक्तसमस्यानां समाधानार्थमुच्चशिक्षानियामकप्रणाल्यामिदं सुनिश्चेतव्यं यद् विनियमनं, प्रव्यायनं, वित्तप्रदानं शैक्षणिकमानकनिर्धारणम् इत्येतादृशानि विशिष्टकार्याणि विशिष्टस्वतन्त्रसशक्तव्यवस्थाभिः संचालितानि स्युः। प्रणाल्यां परीक्षणं मापनम् (चैक एंड

बैलेंस) इति निर्मातुं, निकायानां परस्परं संघर्षनिवारणाय केषुचिद् निकायेषु शक्तीनामत्यधिककेन्द्रीकरणं दूरीकर्तुमिदमावश्यकम्। इदं सुनिश्चेतुं यद् चतस्रः सांस्थानिक-व्यवस्थाः याः एतानि आधारभूतानि कार्याणि कुर्वन्ति अपि च स्वातन्त्ररपेण स्वकार्यस्य निर्वर्तनेन सह उद्देश्यप्राप्त्यर्थं सामञ्जस्येन कार्यं कुर्युः। इमाः चतसृः संस्थाः भारतीय- उच्चतर-शिक्षा-आयोग इत्यनया प्रमुखया संस्थया स्वतन्त्रव्यवस्थारुपेण स्थापताः भविष्यन्ति।

18.3 इचईसीआई इत्यस्य प्रथमम् अङ्गं राष्ट्रीय-उच्चतर-शिक्षा-विनियामक- परिषद् (एनएचईआरसी) भविष्यति। इदमुच्चशिक्षाक्षेत्रे एकबिन्दुनियन्त्रकम् (सिंगल पॉइंट रेगुलेटर ) इत्यस्येव कार्यं करिष्यति यस्मिन् शिक्षकाः समाविष्टास्सन्ति किन्तु चिकित्सीयशक्षा विधिशिक्षा च समाविष्टे न स्तः। अधुना व्यवस्थायाम् अनेकविनियामकसंस्थानानि सन्ति तत् समाप्य एकाएव व्यवस्था समानीयते तेन नियामकप्रक्रियायां पुनरावृत्तेरव्यवस्थायाश्च समापनं भविष्यति। एतद् एककबिन्दुविनियमनं सक्षमं कर्तुं विद्यमानानाम् अधिनियमानां पुनःसंरचना निरसनं तथा च उपस्थितनियामकनिकायानां पुनर्घटनस्य आवश्यकता वर्तते। एनएचईआरसी इत्येनम् 'आनम्यं किन्तु कठिनम्' सौविध्येन संस्थानानां विनियमनाया स्थापनं भविष्यति। अस्येदं तात्पर्यं यद् केचन महत्वपूर्णविषयाः विशेषतया वित्तीयनिष्कपटता सुशासनम्, अन्तर्जाल(ऑनलाइन) विनान्तर्जाल (ऑफ-लाइन) वित्तसम्बद्धविषयाणां प्रकटीकरणम्, वित्तलेखा, कार्यविधानम्, मूलभूतव्यवस्था, संकायः/कर्मचारिणः, पाठ्यक्रमः शैक्षणिकपरिणामः इत्येतानि च प्रभावरूपेण नियन्त्रयिष्यन्ते। इयं सूचना सर्वैः उच्चशिक्षासंस्थानैः स्वजालपुटे एनएचईआरसीइत्यनेन संचालिते सार्वजिनकजालपुटे च प्रदास्यते। यथासमयम् इमाः सूचनाः समुचितरुपेण उपलब्धिः कार्यन्ते। सार्वजनिकसूचनासम्बद्धहितकारकान् अन्यैः जनैश्च प्रदत्तसमस्याश्च एनएचईआरसी- स्वीक्रियन्ते तेषां समाधानं क्रियते। निश्चिते समये प्रत्येकम् उच्चशिक्षासंस्थाने यादृच्छिक(रैन्डम्)विधिना दिव्याङ्गच्छात्रैः सह चितानां छात्रणां मूल्याङ्कनम् अन्तर्जालमाध्यमेन भविष्यति।

18.4 अस्य विनियमनस्य सक्षमतां विधातुं प्राथमिकप्रक्रियायाः प्रत्यायनं भविष्यति। अतः एचईसीआई- इत्यस्य द्वितीयमङ्गं दीर्घप्रत्यायननिकायः (मेटा अक्क्रेडिटिंग बोडी) भविष्यति अयं राष्ट्रीयप्रत्यायनपरिषद् इति नाम्ना व्यवह्रियते । संस्थानां प्रत्यायनं मूलभूतनियमानां सार्वजनिकस्वप्रकटनस्य दृढप्रशासनस्य परिणामानां च आधारेण भविष्यति। इयं सम्पूर्णा प्रक्रिया मान्यताप्रदातृसंस्थानानां स्वतन्त्रसमूहेन भविष्यति। एनएसी-इत्यतेन निरीक्षणं संचालनमपि कार्यते । राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषद् (एनएसी)इत्यनेन समुचितसंख्यायां

संस्थानेभ्यः मान्यताप्रदानाधिककार्याणि विधास्यन्ते, अल्पकाले श्रेणीकृतमान्यताप्रदानाय एका सुदृढप्रणाली स्थापयिष्यते। या सर्वैः उच्चशिक्षासंस्थानैः स्वायत्ततायाः स्वप्रशासनस्य गुणवत्तायाश्च निश्चितमानकान् लब्धुं चरणबद्धसन्दर्भमानकान् निश्चेष्यति। परिणामरूपेण सर्वाणि उच्चसंस्थानानि स्वस्वसंस्थानविकासयोजनया आगामिषु पञ्चदशवर्षेषु मान्यतायाः उच्चस्तरलाभस्य उद्देश्यं निश्चेष्यन्ति। इत्थमिमानि संस्थानानि स्वसंचालितप्रमाणपत्र प्रदातृसंस्थानमिव भवितुं प्रतिबद्धाः भविष्यन्ति। आगामिकाले इयं प्रक्रिया वैश्विकमानकानुसारेण एका द्व्याधारिता प्रक्रिया भविष्यति।

18.5 एचईसीआई इत्यस्य तृतीयाङ्गरूपेण उच्चतरशिक्षानुदानपरिषद् इत्यस्य घटनं विधास्यते। यच्च पारदर्शिमानदण्डानाधृत्य उच्चशिक्षायाः वित्तपोषणस्य कार्यं करिष्यति। यत्र संस्थानेन विकसितम् आईडीपी तथा तस्य क्रियान्वयेन प्राप्ता प्रगतिः समविष्टा वर्तते। एचईजीसी इत्येतस्मै छात्रवृत्तिवितरणाय नवीनविशेषक्षेत्रणामारम्भाय बहुविषयिषु क्षेत्रेषु उच्चतरशिक्षासंस्थानानि गुणवत्ताकार्यक्रमप्रस्तावेन सह तेषां विस्ताराय विकासात्मकनिधीनां कार्यं दास्यते।

18.6 एचईसीआई इत्यस्य चतुर्थो विभागः सामान्यशिक्षापरिषद् भविष्यति। इदमुच्चशिक्षाकार्यक्रमेभ्यः अपेक्षितपरिणामबन्धं निश्चेष्यति तत् स्नानकगुणलक्षणम् इति नाम्ना व्यवह्रियते । जीईसी इत्यनेन राष्ट्रीयोच्चशिक्षायोग्यताबन्धः(एनएचईक्यूएफ) इति स्थापितो भविष्यति । यश्च राष्ट्रिकौशलयोग्यताबन्धः (एनएसक्यूएफ) इत्यनेन सम्मिलितो भविष्यति येन व्यावसायिकशिक्षाया उच्चशिक्षायां समन्वयने सारल्यं स्यात्। ईदृक्शिक्षणयोग्यतापरिणामविषये एनएचईक्यूएफ इत्येतत् उच्चशिक्षायोग्यतां निर्धारयिष्यति ।अपि च तत् उपाधि /डिप्लोमा/प्रमाणपत्ररूपेण भविष्यति । एतदतिरिच्य जीईसी एनएचईक्यूएफ इत्यस्य माध्यमेन समाकलनस्थानान्तरणम् (क्रेडिट ट्रांसफर) समानकादिसमस्याभ्यः अनुरूपानुकूलमानदण्डान् स्थापयिष्यति । । छात्राणां कृते शैक्षाणिककार्यक्रमकाले एकविंशतिशताब्द्याः कौशलेन सह संपूर्णविकसितशिक्षार्थिनां सज्जार्थरूपोद्देश्यस्य प्राप्तये जीईसी एतान् विशिष्टकौशलान् परिचयं करोति ।

18.7 भारतीयकृष्यनुसन्धानपरिषद्, भारतीयपशुवैद्यकीयपरिषत् (वेटरनरी काउंसिल ऑफ इंडिया)राष्ट्रीयाध्यापकशिक्षापरिषद्(एनसीटीई),वास्तुशिल्पपरिषद् (सीओए), राष्ट्रीयव्यावसायिकशिक्षाप्रशिक्षणपरिषद्(एनसीवीईटी), इत्यादीनां पुनर्घटनं व्यावसायिकमानक स्थापनानिकायरूपेण (पीएसएसबी) भविष्यति। ते उच्चशिक्षाप्रणाल्यां

महत्त्वपूर्णभूमिकां वक्ष्यन्ति तथा जीईसी इत्यस्य सदस्यतायै तेभ्यः आमन्त्रणं प्रदास्यते। पीएनएसबी इत्यस्य पुनर्घटनायाः पश्चात् इमे निकायाः जीईसी इत्यस्य सदस्यरूपेण पाठ्यक्रमाणां संरचनाम्, शैक्षणिकमानकनिर्धारणम्, अनुसन्धानशिक्षणविस्ताराणां मध्ये समन्वयं विधास्यन्ते। जीईसी इत्यस्य सदस्यरूपेण इमे पाठ्यक्रमस्वरूपं निश्चेतुं सहायकाः भविष्यन्ति यदाधृत्य उच्चशिक्षासंस्थानानि स्वपाठ्यक्रमं निर्धारयिष्यन्ति। इत्थं च पीएसएसवी-नियामक भूमिकां विनापि शिक्षणाभ्यासयोः क्षेत्रे मानकान् अपेक्षाश्च निर्धारयिष्यति। सर्वाणि उच्चशिक्षासंस्थानि इदमपि निर्धारयिष्यन्ति यत् तेषां शैक्षणिककार्यक्रमविचारान्तरयोर्मध्ये ते मानकानां विषये कथं प्रतिक्रियां कुर्वन्ति इति। यदि आवश्यकं चेत् ते पीएसएसबी मानकस्थापनानिकायानां सहयोगं स्वीकर्तुं समर्थाः भविष्यन्ति।

18.8 ईदृशी संरचना विभिन्नभूमिकानां मध्ये परस्परहितानां संघर्षं समापयन्ती प्रत्येकं भूमिकां कार्याणि च पृथक्करिष्यति । अस्योद्देश्यं मूलभूतविषयेषु लक्ष्यं विदधत् उच्चशिक्षासंस्थानां सशक्तिकरणं विद्यते। एतत्सम्बद्धमुत्तरदायित्वमुच्चशिक्षासंस्थानाम् अनुरूपं भविष्यति। सार्वजनिकोच्चशिक्षासंस्थानां सर्वकारेतरोच्चशिक्षासंस्थानां च मध्ये अपेक्षायां न कोपि भेदो करिष्यते।

18.9 एतदृशपरिवर्तनाय प्राप्तसंरचनानां शिक्षणसंस्थानां च कृते आवश्यकता वर्तते यत् ते स्वयं मूल्याङ्कनं कर्तुं विकासार्थं च सुदृढाः भवेयुः। कार्याणां पृथक्करणस्यार्थो भवति यत् एचईसीआई- इत्यस्य प्रत्येकं अङ्गस्य कृते विनूतनायां भूमिकायां नेतुं समर्थो भविष्यति। यद्धि विनूतनायां नियामकयोजनायां प्रासङ्गिकं सार्थकं च भविष्यति।

18.10 सर्वस्वतन्त्रसंरचनाकार्यकरणविनियमनम् (एनएचईआरए) मान्यता (एनएसी) धनसहायः (एचईजीसी) शैक्षणिकमान्यता (बीईसी) सुदीर्घस्वायत्तैकच्छत्रनिकायः (एचईसीआई) इत्येतेषां सार्वजनिकपारदर्शितायोजनाधारितं भविष्यति तथा स्वकार्यदक्षतां पारदर्शितां च सुनिश्चेतुं मानवमाध्यमदूरीकरणार्थम् आधिक्येन तन्त्रज्ञानस्य उपयोगः करिष्यते । निर्धारित सिद्धान्त भविष्यति यत् तन्त्रज्ञानस्य उपयोगेन मुखरहितपारदर्शिनियामकव्यवधानं मूलभूतसिद्धान्तो भविष्यति । कठिननिर्धारणेन कठिनानुपालनोपायाः निश्चीयन्ते एवं तत्र अनिवार्यासूचनानाम् अन्यथा प्रकटीकरणाय दण्डोपि निर्धायते येन उच्चरशिक्षणसंस्थाः न्यूनमानदण्डानां मानकानां च अनुरूपं भवितुं शक्नुयुः। एचईसीआई स्वयमेव अस्य चतुर्णाम् अङ्गानां मध्ये विवादं परिहरिष्यति।

एचईसीआई एकः स्वतन्त्रः निकायो भविष्यति तत्र प्रासङ्गिकक्षेत्रेषु सत्यनिष्ठ-प्रतिबद्धसार्वजनिकसेवारताभिः सह कार्यरताः विशेषज्ञाःभविष्यन्ति । एचईसीआई इत्यस्यापि स्वयमेव एकं लघुः स्वतन्त्रः निकायो भविष्यति यत्र उच्चतरशिक्षायां प्रसिद्धाः सामाजिकाः विशेषज्ञाः भविष्यन्ति अपि च अयं निकायः एचईसीआई इत्यस्य सत्यनिष्ठां प्रभाविकार्यकुशलतां च निरीक्षन्ते । एचईसीआई इत्यत्र कार्यनिष्पादनार्थं प्रयुक्तप्रक्रियायाः निर्माणमपि करिष्यते। यस्मिन् अधिनिर्णयम्, अपि सम्मिलिताः वर्तन्ते।

18.11 नूतनगुणवत्तापूर्णोच्चशिक्षासंस्थानां संस्थापनेपि सारल्यं भविष्यति। सहैव इदमपि निश्चयं कर्तुं शक्यते यत् एताः संस्थाः जनसेवाभावेन दीर्घकालार्थं वित्तीयसहायेन स्थापिताः इति । उच्चशिक्षणसंस्थायाः उत्तमकार्यकरणेन केन्द्रराज्यसर्वकाराणां कृते स्वसंस्थां छात्रसंख्यायां संकायसंख्ययामपि अभिवर्धनेन सह विषयाणां पाठ्यक्रमाणां च विस्तारे च साहायो भविष्यति । उच्चशिक्षणसंस्थानां गुणवत्तापूर्वकम् उच्चशिक्षापयन्तं प्रापणोद्देश्येन तेषां कृते सार्वजनिक लोकोपकारिप्रारूपाणामपि आरम्भं कर्तुं शक्नोति।

**शिक्षायाः वाणिज्यीकरणस्य अवरोधनम्**

18.12नियन्त्रणसन्तुलनाभ्यां युक्तं तन्त्रम् उच्चशिक्षायाः वाणिज्यीकरणम् अवरोद्धुं शक्नोति । इदं नियन्त्रणव्यवस्थायाः आद्यं प्रमुखं च भविष्यति। सर्वाः शिक्षणसंस्थाः नैव लाभार्थं संस्थायां संचालितलेखापरीक्षायाः प्रकटीकरणस्य च मानकव्यवस्थायाः पालनं कुर्युः। यदि कश्चित् विशेषो भविष्यति चेत् तदा शिक्षा क्षेत्रे पुनर्निवेशं कर्तुं शक्ष्यति। एतेषां सर्वेषां वित्तीयनियमानां पारदर्शितया सार्वजनिकरूपेण प्रकटीकरणं भविष्यति एवं तत्र सार्वजनिकानां कृते आक्षेपनिवारणकार्यविधानस्य अपि अन्तर्भावः भवति । राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः(एनएसी) अभिवर्धितप्रत्यायनप्रणाली अस्याः प्रणाल्याः पूरकं कार्यं निष्पादयति अथ च एनएचईआरसी इत्येनं स्वीयनियामकोद्देश्यस्य प्रमुखायामरूपेण द्रक्ष्यति।

18.13 सर्वसार्वजनिकसर्वकारेतरोच्चशिक्षासंस्थाः अस्यां नियामकव्यवस्थायां समानं भविष्यन्ति। नियामकव्यवस्था शिक्षायां सर्वकारेतरपरोपकारप्रयासान् प्रोत्साहयिष्यति। सर्वेषां शासकीयाधिनियमानां कृते सामान्यराष्ट्रियमार्गनिर्देशाः भविष्यन्ति । सर्वेपि सामान्यमार्गनिर्देशाः अधिनियमाश्च नैजोच्चशिक्षासंस्थासंस्थापनार्थं समर्थं करिष्यन्ति । तथा नैजसार्वजनिकोच्चशिक्षासंस्थानां कृते सामान्यमानकाः उपलब्धाः भविष्यन्ति। एतेषु

सामान्यमार्गनिर्देशेषु सुशासनस्य, वित्तीयस्य, स्थिरतायाः, सुरक्षायाः, शैक्षिकपरिणामस्य प्रकटीकरणस्य च पारदर्शिता अन्तर्भवति।

18.14 परोपकारिण्यः जनहितैषिणश्च नैजच्चशिक्षासंस्थायाः शुल्कनिर्धारणम् उत्तमशासनस्य माध्यमेन प्रोत्साहयिष्यते। विभिन्नप्रकारकसंस्थानां कृते तेषां प्रत्यायनाधारेण, शुल्कस्य उच्चपरिमितिनिर्धारणार्थम् पारदर्शिकार्यविधानस्य विकासो भविष्यति येन नैजिकसंस्थानां कृते प्रतिकूलप्रभावाः नैव स्युः। यतोहि निर्धारितनियमानां नियामकव्यवस्थानां च आलोके आधिक च्छात्राणां कृते निश्शुल्कस्य तथा छात्रवृत्तेश्च प्रदानार्थं नैजशिक्षासंस्थाः प्रोत्साहयिष्यन्ते। नैजशिक्षणसंस्थानैः निर्धारिताः सर्वे शुल्काः पारदर्शिरूपेण संस्थाप्यन्ते अपि च कस्यचिदपि छात्रस्य नामाङ्कनकाले शुल्के यथेष्टं वृद्धिर्नैव भविष्यति। शुल्कनिर्धारणस्य व्यवस्थेयम् उच्चशिक्षासंस्थाः स्वीयसामाजिकदायित्वनिर्वहणेन सह किञ्चद् निवेशस्य पूर्णतां विनिश्चेयुः ।

## 19. उच्चशिक्षासंस्थानां कृते प्रभावपूर्णप्रशासनं नेतृत्वं च

19.1 प्रभाविप्रशासनं नेतृत्वं च उच्चशिक्षासंस्थायाम् उत्कृष्टतासंपादने नवाचारसंस्कृतेः निर्माणे च सक्षमं करिष्यति। भारतेन सहैव समग्रे विश्वे सर्वासां विश्वस्तरीयसंस्थानां सामान्यवैशिष्ट्यं प्रभाविप्रशासनं संस्थायाः उत्कृष्टाधारितयोग्यनेतुः नियुक्तिः वर्तते।

19.2 श्रेणीकृतप्रत्यायनस्य श्रेणीकृतस्वायत्ततायाः उपयुक्तप्रणाल्या पञ्चदशवर्षेषु यथाक्रमं भारतस्य समासामुच्चशिक्षासंस्थानामुद्देश्यं नावीन्यस्य तथोत्कृष्टतायाः अनुशीलनकारकस्य स्वतन्त्रस्वशासिसंस्थानस्य विनिर्माणं स्यात् । उच्चगुणवत्तायाः नेतृत्वं सुनिश्चेतुम् उत्कृष्टतायाः संस्थासंस्कृतेः वर्धनाय सर्वेषूच्चशिक्षासंस्थासु उपायाः करिष्यन्ते। पूर्वोक्तप्रकल्पस्य सिद्धतायै सिद्धसंस्थायै उपयुक्तश्रेणीकृतप्रत्यायनप्राप्त्यनन्तरं सिद्धक्षमतानां प्रतिबद्धवतां परिपक्वभाववतां योग्यानां सक्षमाणां समर्पितजनानां समूहेन सह प्रशासिपरिषत् बोर्ड ऑफ गवर्नर्स (बीओजी) इत्यस्य स्थापना करिष्यते। कस्याः अपि संस्थायाः बीओजी बाह्यहस्तक्षेपं विना संस्थां संचालयितुं संस्थायाः प्रमुखेण सह सर्वेषां नियुक्तये तथा प्रशासनस्य विषये निर्णयानां स्वीकारे अधिकारो भविष्यति। एतादृशानि प्राविधानानि भविष्यन्ति यानि पूर्वस्य अन्यप्राविधानस्य उल्लङ्घनप्राविधानं परिवर्तयिष्यन्ति यत्र बीओजी इत्यस्य घटनम्, नियुक्तिः, कार्यविधानम्, नियमानिबन्धनानि बीओजी इत्यस्य भूमिका दायित्वानि च

सम्मिलितानि सन्ति। परिषदः नूतनसदस्यानां चयनं परिषदा नियुक्तविशेषसमित्या करिष्यते तथा नूतनसदस्यानां चयनं बीओजी इत्यनेनैव करिष्यते। सदस्यानां चयनावसरे सामूहिकपरामर्शस्यापि गणना भविष्यति। इयं परिकल्पना कृता वर्तते यदस्याः प्रक्रियायाः अवसरे समाभ्यः उच्चशिक्षासंस्थाभ्यः प्रोत्साहनम्, समर्थनम्, परामर्शश्च प्रदास्यते, तथैतेषामुद्देश्यं 2035 वर्षं यावत् स्वायत्तीभवनम्, तथैतादृशस्य सशक्तस्य बीओजी-इत्यस्य स्थापनं भविष्यति।

19.3 बीओजी समेषाम् अपेक्षिताभिलेखानाम् इत्यस्य पारदर्शिस्वप्रकटनमाध्यमेन हितधारकेभ्यः उत्तरदायी भविष्यति। अनेनन राष्ट्रियोच्चशिक्षानियामकपरिषद्(एनएचईआरसी) माध्यमेन एचईसी-आई इत्यनेन आदिष्टानाम् अनिवार्यनियामकदिशानिर्देशानां सम्पूर्त्यै उत्तरदायी भविष्यति।

19.4 संस्थासु समेभ्यः नेतृत्वपदेभ्यः संस्थानप्रमुखेभ्यश्च उच्चतरशैक्षणिकयोग्यतावतां जनानां चयनं करिष्यते , यैः दुर्गमपरिस्थितिषु कार्यनिर्वहणसामर्थ्येन सह प्राशसनिकानां नेतृत्वक्षमतानां च प्रदर्शनं कृतं स्यात्। कस्याः अपि उच्चशिक्षणसंस्थायाः प्रमुखे संवैधानिकमूल्यैः, संस्थायाः समग्रदृष्ट्या च सह दृढसामाजिकप्रतिबद्धता, समूहकार्ये विश्वासः, विविधता, विभिन्नजनैस्सह कार्यविधानक्षमता, सकारात्मकदृष्टिः च स्यात्। बीओजी- इत्यनेन स्थापितस्य कुशलविशेषज्ञसमितिः(ईईसी) इत्यस्य चयनम् कठोरया, निष्पक्षया, योग्यताधारितप्रक्रियया बी-ओजी इत्यनेन कार्यते। उपयुक्तवातावरणस्य विकासस्य सुनिश्चयाय कार्यकालस्य स्थिरता महत्त्वपूर्णा वर्तते। सहैव नेतृत्वस्य उत्तराधिकारणः योजना विनिर्मास्यते येन एतत् सुनिश्तेतुं शक्यते यत् संस्थायाः प्रक्रियाः उत्तममस्य व्यवहारस्य नेतृत्वस्य परिवर्तनकारणात् समाप्तिः न स्यात् । नेतृत्वे परिवर्तनं पर्याप्तातिक्रमणमाध्यमेन करिष्यते तथा परिवर्तनार्थं पदानि रिक्तानि न भविष्यन्ति। उत्तमनेतृणाम् अन्वेषणं कृत्वा तेषां प्रशिक्षणं प्रदीयते येन नेतृत्वस्य भूमिकायां सोपानक्रमेण अग्रे गन्तुं शक्नुयुः।

19.5 यथाक्रमं पर्याप्तधनसहायस्य, प्राशासनिकसशक्तीकरणस्य स्वायत्ततायाः च प्रदानेन सर्वाः उच्चशिक्षासंस्थाः संस्थासामर्थ्यम्, स्थानीयसमुदायैस्सह सम्बन्धम्, वित्तीयनिष्ठाम्, उत्तरदायित्वस्य उच्चतममानकं च प्रति प्रतिबद्धतां प्रदर्शयिष्यन्ति। प्रत्येकं संस्था

कार्यतन्त्ररूपेण संस्थाविकासयोजनां निर्मास्यति। यस्याः आधारेण संस्था निजकार्याणि विकास्य स्वप्रगत्याः आकलनं करिष्यति तथा तत्र निर्धारितलक्ष्याणि अपि प्राप्स्यन्ति । यानि अग्रिम सार्वजनिकधनसहायार्थम्  आधारो भविष्यति।परिषत्सदस्यानाम्, संस्थाप्रमुखाणाम्, संकायानाम्, छात्राणाम्, कर्मचारिणां च सहोयगेन  आईडीपी इत्यस्य निर्माणं क्रियते ।

## भागः III अन्यानि मुख्यानि दृष्टिपातनीयानि क्षेत्राणि

### 20. व्यावसायिकशिक्षा

20.1 वृत्तिपराणां निर्माणार्थं संयुक्तशिक्षायै इदमनिवार्यं वर्तते यत् तेषां पाठ्यक्रमे नैतिकतायाः तथा सार्वजनिकोद्देश्यमहत्त्वस्य च समावेशः स्यात्। तेन सह तस्य विषयविशेषस्य शिक्षा व्यावहारिकाभ्यासस्य शिक्षा च सम्मिलिता स्यात्। अन्यसमस्तोच्चशिक्षासम्बद्धविषयवदेव विमर्शात्मकान्तर्विषयकचिन्तनं विमर्शः चर्चा,अनुसन्धानम्,नवाचारश्च केन्द्रितं स्यात् । अस्योद्देश्यस्य प्राप्तये इदमावश्यकं वर्तते यद् व्यावसायिकविकासेन सम्बद्धा शिक्षा अन्यविषयेभ्यः भिन्नः न भवेत्।

20.2 व्यावसायिकविकासशिक्षा समग्रोच्चशिक्षाप्रणाल्याः अभिन्नम् अङ्गं भविष्यति। स्वतन्त्रकृषिविश्वविद्यालयानाम्,विधिविश्वविद्यालयानाम्,स्वास्थ्यविज्ञानविश्वविद्यालयानम् तान्त्रिकविश्वविद्यालयानाम्, अन्यविषयकस्वतन्त्रविश्वविद्यालयानां च उद्देश्यं वर्तते यत्  ताः संस्थाः  स्वयं बहुविषयकसंस्थारूपेण बहुविषयकशिक्षाप्रापणसंस्थारूपेण च अभिवर्धेरन् । व्यावसायिकसामान्यशिक्षाप्रदातृसर्वाः संस्थाः 2030 वर्षं यावत् समेकितरूपेण उभयविध शिक्षाप्रदातृसंस्थारूपेण  संस्थासमूहरूपेण वा  भवितुं लक्ष्यमादाय कार्यं करिष्यन्ति।

20.3 कृषिशिक्षायाः एतत्सम्बद्धविषयाणां पुनरुज्जीवनं करिष्यते। यद्यपि देशस्य विश्वविद्यालयेषु कृषिविश्वविद्यालयस्य 9% वर्तते। किन्तु कृषिक्षेत्रे सम्बद्धविज्ञानविषयेषु च नामाङ्कनम् उच्चशिक्षायां  संपूर्णनामाङ्कनस्य 1% तः अपि न्यूनं वर्तते। कुशलस्नातकपदवीधराः, तन्त्रज्ञाः नवीनानुसन्धानम्, कार्यप्रक्रियासम्बद्धापणाधारितविस्तारः इत्यादिभिः सह कृष्युत्पादकतावृद्धये इदमावश्यकं यत् कृषेः तत्सम्बद्धविषयाणां  सामर्थ्यस्य गुणवत्तायाश्च अभिवर्धनस्य च । सामान्यशिक्षासम्बद्धकार्यक्रमाणां माध्यमेन कृषिणा

पशुचिकित्साविज्ञानेन च सह सम्बद्धवृत्तिपराणां सिद्धता वेगेन कार्यते । कृषिशिक्षायाः विन्यासः एतादृशव्यावसायिकजनानां विकासार्थं परिवर्तितो भवति येन स्थानीयज्ञानस्य तदुपयोगस्य, पारम्परिकज्ञानस्य, परिवर्तिततन्त्रज्ञानस्य च अभिज्ञा स्युः तथा तेषां उपयोगं च कुर्युः । अनेन सह महत्त्वपूर्णबिन्दूनां विषये यथा-भूमेः अपक्षीयमाणोत्पादनशक्तिः, जलवायुपरिवर्तनम्, अस्माकं वर्धमानायाः जनसंख्यायाः कृते पर्याप्तभोजनस्यावश्यकता, इत्यादिविषये जाकरूकाः स्युः। इदमावश्यकं वर्तते यत् कृषिशिक्षा प्रदातृसंस्थाभ्यः स्थानीयसमुदायाः साक्षात् लाभान्विताः स्युः। तन्त्रज्ञानस्य तत्प्रसारस्य स्थिरविधानस्य च उत्तेजनार्थं तन्त्रज्ञानोद्यानस्य स्थापना एकः प्रविधिः वर्तते ।

20.4 न्यायशिक्षा वैश्विकस्तरे स्पर्धात्मिकारूपेण भवेत् । एवम् अस्मिन् क्षेत्रे उत्तमाभ्यासानां समन्यवयनम्, सर्वेषां कृते समुचितसमये न्यायस्य प्रापणार्थं नवीनतन्त्रज्ञानस्य कार्यप्रणालीनाम् च समन्वयनं करिष्यते। अपि च न्यायः सामाजिकार्थिकराजनैतिकसांविधानिकमूल्यैः संवर्धितेन लोकतन्त्रप्रशासनमानवाधिकारस्य - माध्यमेन राष्ट्रनिर्माणस्य दिशि मार्गं संदेशयेत् । इदं निश्चेतव्यं यत् न्यायशिक्षायाः पाठ्यक्रमे सामाजिकसांस्कृतिकसन्दर्भैः सह उपपत्तिभिः न्यायचिन्तनस्य इतिहासस्य, न्यायसिद्धान्तानाम्, न्यायशास्त्रस्याभ्यासस्य अन्यसम्बद्धतविषयाणां च समावेशः स्यात् । न्यायशिक्षायाः संपोषकानि राज्यसंस्थानानि भविष्यन्यायवादिभ्यः न्यायाधीशेभ्यश्च द्विभाषिशिक्षायाः प्रदानार्थं विचारयेयुः । यत्र च एका भाषा आङ्ग्लम्, द्वितीया च यत्र न्यायशिक्षासंस्था वर्तते तस्य राज्यस्य भाषा स्यात् ।

20.5 स्वास्थ्यशिक्षा पूनर्कल्पिता स्यात् येन शैक्षिककार्यक्रमाणामवधिः, संचरना, विन्यासः, च स्नातकैः निभाल्यमानानां भूमिकानानुरूपं स्यात्। मूलभूतसंरक्षणे माध्यमिकचिकित्सालयेषु च कार्यकरणाय मुख्यरूपेण उत्तमतया परिभाषितमापदण्डैः छात्राणां नियतान्तराले मूल्याङ्कनं करिष्यते। एतद्विज्ञायते यद् अस्माकं जनाः स्वास्थ्यरक्षणे नैकविकल्पानां प्रयोगं कुर्वन्ति । अस्माकं स्वास्थ्यशिक्षाप्रणाली एकीकृता स्यात् अस्येदं तात्पर्यं वर्तते यद् एलोपैथिकचिकित्साशिक्षायाः सर्वेषां छात्राणां कृते आयुर्वेदस्य, योगस्य, प्राकृतिकचिकित्सायाः, यूनानीचिकित्सायाः, सिद्धस्य, तथा होम्योपैथी, (आयुष) चिकित्सायाः च मूलभूतं ज्ञानं स्यात् । इत्थमेव अन्यचिकित्सासम्बद्धविधार्थिनां कृतेपि

भवति। सर्वास्वपि स्वास्थ्यशिक्षासु निवारकस्वास्थ्यसंरक्षणे (प्रिवेंटिव हेल्थकेयर) सामुदायिकचिकित्सासु अधिकं बलं प्रदास्यते।

20.6 तान्त्रिकशिक्षायाम् उपाधि-डिप्लोमा-कार्यक्रमाः अन्तर्भूताः सन्ति तत्र अभियान्त्रिकम्, तन्त्रज्ञानम्,, प्रबन्धनम्, वास्तुकला, नगरनिर्माणम्, औषधालयः, भोजनालयप्रबन्धनम्, औदनिकतन्त्रज्ञानम् इत्यादीनि यानि भारतस्य विकासे महत्त्वपूर्णानि तानि अन्तर्भवन्ति । एतेषु क्षेत्रेषु न केवलं योग्यमानवशक्तेः अपेक्षा भवति किन्तु नवाचाराय अनुसन्धानस्य सुनिश्चयाय सम्बद्धोद्योगानामुच्चतरशिक्षासंस्थानां मध्ये घनिष्ठस्य सहयोगस्यापि आवश्यकता भविष्यति। एतदतिरिच्य समस्तमानवीयोद्यमेषु प्रयासेषु च तन्त्रज्ञानस्य प्रभावेण तन्त्रंशोपागमशिक्षायाः तथान्यविषयाणां मध्ये भेदसमाप्तेः सम्भावना वर्धमाना वर्तते। इत्थं तान्त्रिकशिक्षापि बहुविषयकशिक्षासंस्थासु कार्यक्रमेषु च प्रदीयते । तथान्यविषयैस्सह प्रगाढरूपेण संयोजनस्य अवसरेषु केन्द्रीक्रियते। भारतं कृतकबुद्धमत्ता (एआई) 3डी तन्त्रज्ञानम्,दत्तांशविश्लेषणम्, यान्त्रिकाध्ययनम् इत्यादिषु वृत्तिनिष्ठानां निर्माणे अग्रे सरेत् । अनेन सह जीनोमिकाध्ययनम्, जैविकतन्त्रज्ञानम् ,नैनोतन्त्रज्ञानम्, नाडीविज्ञानम् स्वास्थ्यम्, पर्यावरणम्, इत्यादिभिः सह दीर्घकालिकस्वस्थजीवने च एतेषां महत्त्वपूर्णानुप्रयोगैस्सह युवकेभ्यः आजीविकासंवर्धनाय अवरस्नातकशिक्षाकार्यक्रमस्य अभिन्नाङ्गरूपेण समावेशः क्रियते ।

## 21. प्रौढशिक्षा आजीवनम् अध्ययनं च

21.1 मूलभूतसाक्षरताप्राप्तिः, शिक्षाप्राप्तिः, तथा जिविकोपार्जनस्य अवसरः प्रत्येकं नागरिकस्य मौलिकः अधिकारः वर्तते । साक्षरता तथा मूलभूतशिक्षा जनस्य वैयक्तिकस्य, आर्थिकस्य, जीवनपर्यन्तशिक्षायाः च अवसरस्य नवीनायमम् उद्घाटयति यश्च व्यक्तेः वैयक्तिकस्तरे वृत्तिस्तरे च अग्रे गन्तुं सहायको भवति। सामाजिके राष्ट्रिये च स्तरे साक्षरता मूलभूतशिक्षा च तादृक्शक्तिरूपेण कार्यं करोति यत् विकासार्थं क्रियमाणप्रयासानां साफल्यं द्विगुणितं करोति। वैश्विकस्तरे विभिन्नदेशानां दत्तांशाः इदं प्रदर्शयन्ति यत् कस्यापि देशस्य साक्षरताप्रातिशतं तथा तस्य प्रतिव्यक्ति जीडीपी मध्ये सर्वोत्तमसम्बन्धं सूचयन्ति।

21.2 अनेन सह एकस्य समुदायस्य साक्षरताभावेन असंख्याकाः हानयः वर्तन्ते, यासु मूलभूतवित्तीयादानप्रदानाभावः, निर्धारितमूल्यविरुद्धमूल्येन क्रीतवस्तूनां गुणवत्तायाः / प्रमाणस्य वा तुलना, आजीविका, ऋणम्, सेवा, इत्यादीनां कृते आवेदनाय आवेदनपत्रपूरणम्, वार्तापत्रिकासु सार्वजनिकपरिपत्रणां लेखानां चावगमनम्, वाणिज्यस्य संप्रेषणाय संचालनाय च अन्तर्जालसंकेतस्य उपयोगः, निजजीवनेसौविध्याय उद्योगस्य संचालनाय च अन्तर्जालस्य तन्त्रज्ञानस्य चोपयोगः, औषधानि, राजमार्गादिषु दिशां सुरक्षानिर्देशानां च परिज्ञानम्, सन्ततेः शिक्षणे सहायः, भारतस्य नागरिकरूपेण मूलाधिकाराणाम् उत्तरदायित्त्वानां च परिज्ञानम्, साहित्यकृतीनां प्रशंसा, साक्षरतासम्बद्धे मध्यमे उच्चतरे वा उत्पादकताक्षेत्रे आजीविकायाः प्राप्तौ असमर्थतादयः सम्मिलितास्सन्ति। अत्र क्रमबद्धक्षमताः तत्परिणामानां साङ्केतिकसूची वर्तते अस्याः पौढशिक्षायां नवाचारेण सह समावेशं कृत्वा एतत्साधयितुं शक्यते।

21.3 भारते विश्वस्तरे च संजाताधिकशोधाध्ययनानि विश्लेषणानि च स्पष्टरूपेण दर्शयन्ति यत् राजनीतिकेच्छाशक्तिः, संघटनात्मकसंरचना, क्रमबद्धयोजना, पर्याप्तवित्तीयसहयोगः स्वयंसेविनां गुणवत्तापूर्णक्षमतायाः संवर्धनेन सह स्वयंसेविनः एवं समुदायभागग्राहिणः संभूय कार्यसंपानम्, इत्येतानि प्रौढसाक्षरताकार्यक्रमस्य सफलतायाः मुख्यकारणानि सन्ति।स्वयंसेव्याधारितसाक्षरताकार्यक्रमस्य फलितांशः न केवलं युवजनानां साक्षरतायां वृद्धिः भवति किन्तु समुदायस्य सर्वेषां बालानां कृते शिक्षाभियाचनायां वृद्धिः भवति । अथ च सकारात्मकसामाजिकपरिवर्तने समुदायस्य भागग्रहणमपि वर्धिष्यते ।1988तमे वर्षे यदा राष्ट्रियसाक्षरताभियानस्य आरम्भः संजातः तत्र मुख्यतया जनानां स्वैच्छिकभागग्रहणसहयोगाधारितः आसीत् । तेन देशे 1991-2011दशकमध्ये महिलानां साक्षरतायां सम्पूर्णसाक्षरतायां च उल्लेखनीया वृद्धिः संजाता । एवं तदा तत्कलिकसामाजिकविषयाणां चर्चा अपि संजाता ।

21.4 प्रौढशिक्षार्थं सुदृढनवीनोपक्रमाः - प्रमुखतः समुदायभागग्रहणस्य सरलीकरणम्, तथा तन्त्रज्ञानस्य सुगमतया प्रयोजनकारिसमेकीकरणं यथाशीघ्रम् आरम्भः भवति येन 100% शतप्रतिशतसाक्षरतायाः सर्वोत्कृष्टोद्देश्यं शीघ्रं साधयितुं शक्येत।

21.5 सर्वादौ प्रौढशिक्षां प्रति एनसीआरटी इत्यनेन संबद्धविभागः एकस्याः उत्कृष्टप्रौढ शिक्षणपाठ्यचर्यायाः स्वरूपं विकसयिष्यते येन साक्षरता, संख्यात्मकमूलभूतशिक्षणम्, व्यावसायिककौशलम् इत्येत् प्रति उत्तमपाठ्यचर्यानिर्माणे एनसीआरटी मध्ये वर्तमाननैपुण्यानुरूपं सामञ्जस्यं च स्थापयित्वा पौढशिक्षापाठ्यचर्यायाः स्वरूपं निर्मास्यते। अस्मिन् पाठ्यचर्यात्मकस्वरूपे न्यूनातिन्यूनम् अधोलिखिताः पञ्चविधाः कार्यक्रमाः सम्मिलिताः भविष्यन्ति, येषु प्रत्येकं परिणामः स्पष्टतया व्याख्यास्यते (क) मूलभूतसाक्षरता तथा संख्याज्ञानम्, (ख) महत्त्वपूर्णजीवनकौशलम्( तत्र आर्थिकसाक्षरता, तन्त्रज्ञानसाक्षरता,व्यावसायिककौशलम्,स्वास्थ्यसंबद्धजागरूकता, शिशुपालनं शिक्षणं कुटुम्बकल्याणम् इत्याद्यन्तर्भूतम् ) (ग) व्यावसायिककौशलविकासः (स्थानीयस्तरस्य वृत्तिप्राप्त्यर्थम्) (घ) मूलभूतशिक्षा(प्रारम्भिक-माध्यमिक-उच्चमाध्यमिकस्तरस्य समकक्षम्) (ङ) निन्तरशिक्षा (यथा- कला, विज्ञानम्,तान्त्रिकम्,संस्कृतिः,क्रीडा,मनोरञ्जनम्,इत्यादिभिः सह स्थानीयशिक्षार्थिनाम् अभिरुचिः लाभप्रदायकान्यविषयाः जावनकौशलसम्बन्धिन्यः सामग्र्यः इत्यादिषु प्रौढशिक्षापाठ्यक्रमः)। अस्मिन् सन्दर्भे एतदपि अवधातव्यं यद् विभिन्नसंदर्भेषु बालेभ्यः प्रयुज्यमानसामग्राणां स्थाने भिन्नप्रकारकशिक्षणाधिगमपद्धतीनां सामग्रीणां च आवश्यकता भविष्यति।

21.6 द्वितीयं तावत् समुचितं मूलभूतं स्वरूपं सुनिश्चेष्यते येन समेभ्यः इच्छुकेभ्यः प्रौढेभ्यः प्रौढशिक्षा तथा आजीवनाधिगमश्च प्राप्येत। अत्र महत्त्वपूर्णोपक्रमः विद्यालयकालांशात् परं सप्ताहान्ते, विद्यालयेषु /विद्यालयसंकीर्णेषु सार्वजनिकपुस्तकालयस्थानेषु च प्रौढशिक्षायाः पाठ्यक्रमं संचालयितुं शक्यते यथासंभवं आईसीटी इत्यनेन सुसज्जितानि भविष्यन्ति तथान्यसामुदायिकभागग्रहणार्थम् अन्यसंवर्धनगतिविध्यर्थं च एतत् करिष्यते। एवं विद्यालयशिक्षायै, उच्चशिक्षायै प्रौढशिक्षायै व्यावसायिकशिक्षायै अन्यसामुदायिकस्वयंसेविगतिविधिभ्यः मूलसौकर्यस्य प्रदानार्थं, भौतिकमानवोभयविधसंसाधनानां कुशलोपयोगस्य सुनिश्चयार्थं तथानेन सह चतुर्विधशिक्षायाः अन्यशिक्षायाश्च मध्ये सामञ्जस्यस्थापनाय एतत् महत्त्वपूर्णं भविष्यति। एतैः कारणैः उच्चशिक्षासंस्थासु व्यावसायिकप्रशिक्षणकेन्द्रादिषु तथान्यसार्वजनिकसंस्थासु अपि प्रौढशिक्षाकेन्द्राणि अन्तर्भावयिष्यन्ते।

21.7 तृतीयं तावत् पञ्चविधशिक्षासमन्वितस्य प्रौढशिक्षापाठ्यक्रमस्वरूपस्य प्रबुद्धशिक्षार्थिनां कृते प्रदानाय प्रशिक्षकाणाम् /शिक्षकाणाम्, /प्रेरकाणां च आवश्यकता भविष्यति। एतेषां प्रशिक्षकाणां कृते प्रौढशिक्षाकेन्द्रेषु शिक्षणगतिविधिव्यवस्थापनाय नेतृत्वाय च स्वयंसेवक प्रशिक्षकैः सह च समन्वयनाय च राष्ट्रियराज्यजनपदस्तरीयसंसाधनसहायसंस्थया प्रशिक्षणं प्रदास्यते। स्थानीयसमुदायैः सह सम्बन्धस्थापनाय उच्चशिक्षासंस्थायाः ध्येयस्य भागरूपेण उच्चशिक्षासंस्थाभिः सह समुदायस्य योग्यसदस्यानां प्रोत्साहनं क्रियते। लघ्वधिकप्रशिक्षणपाठ्यक्रमं स्वीकर्तुं तथा स्वयंसेविरूपेण प्रौढसाक्षरताबोधकरूपेण स्वयंसेविबोधकरूपेण वा सेवां कर्तुं प्रोत्साह्यते ।राष्ट्रं प्रति कृतायाः सेवायाः सम्मानोपि क्रियते। एते राज्यसाक्षरतां प्रौढशिक्षां च प्रति प्रयासानां प्रोत्साहनाय असर्वकारीयसंघटनैः अन्यसामुदायिकसंघटनैस्सह अपि कार्यं करिष्यन्ति।

21.8 चतुर्थं तावत् समुदायस्य सदस्याः प्रौढशिक्षा कार्यक्रमे भागं गृह्णीयुः एतदर्थं समेपि प्रयासाः करिष्यन्ते। ये सामाजिककार्यकर्तारः/परामर्शकाः समुदायेषु चरित्वा नामाङ्कनरहितान् त्यक्तविद्यालयान् छात्रान् च विज्ञाय तेषां भागग्रहणस्य निश्चयं कुर्वन्ति । संचरणकाले एतादृशानामभिभावकानाम्, किशोराणाम्, तथान्येच्छुकजनानां च दत्तांशसंग्रहणाय प्रौढशिक्षायाम् अभिरुचियुक्ताः अध्यापकाः/प्रशिक्षकाः अनुरुध्यन्ते। ततःपरं सामाजिककार्यकर्तारः/परामर्शकाः इमां सूचनां स्थानूयप्रौढशिक्षाकेन्द्रं (एईसी)प्रति दीयते। विज्ञापनम्, घोषणाः, सर्वकारेतरसंघटना, अन्यस्थानीयसंघटनानां कार्यविधिः इत्यादिना प्रौढशिक्षायाः व्यापकावसरस्य प्रचारः क्रियते ।

21.9 पञ्चमं तावत् समुदायेषु शिक्षणसंस्थासु च अध्ययनाभ्यासस्य विकासाय पुस्तकानामुपलब्धिः अत्यावश्यकी वर्तते। एषा नीतिः अनुशंसां करोति यत् सर्वे समुदायाः शिक्षासंस्थाः, विद्यालयाः, महाविद्यालयाः,विश्वविद्यालयाः च शिक्षार्थिनां, निशक्तजनानाम्, अङ्गविकलानाम् अन्यन्यूनवतां च कृते अपेक्षितानां पुस्तकानाम् आपूर्तिं कर्तुं सशक्तीक्रियन्ते आधुनिकीकरणं च क्रियते । केन्द्रसर्वकारः राज्यसर्वकारश्च निश्चेष्यते यत् संपूर्णे देशे समाजिकार्थिकरूपेण वञ्चितजनैः सह ग्रामीणक्षेत्रं दुर्गमक्षेत्रं च प्रति सर्वविक्रययोग्यनां पुस्ताकानाम् न्यूनमूल्येन उपलब्धतां कर्तुं योजनां निर्माति । सार्वजनिकसंस्थाः सर्वकारेतरसंस्थाः च पुस्तकानां गुणवत्तां वर्धयितुम् अधिकाकर्षणं च कर्तुं भारतीयभाषासु प्रकाशयितुं च योजनां निर्मास्यन्ति। पुस्तकानि अन्तर्जालमाध्यमेन उपलब्धानि यथा स्युः तदर्थं डिजिटलपुस्तकालयस्य व्यापकतायै प्रयासः करिष्यते। समुदायेषु शिक्षासंस्थासु च क्रीयाशीलपुस्तकालयानां निर्माणाय तेषां सफलसञ्चालनाय च यथोचितसंख्यायां

पुस्तकालयकर्मकराणामुपलब्धता स्यात् तथा तेषां व्यावसायिकविकासार्थम् अन्यवृत्तिमार्गस्य निर्माणाय वृत्तिप्रबन्धनविन्यसस्य अपेक्षा विद्यते ।एवम् अन्यप्रयासाः सम्मिलितानि भविष्यन्ति तद्यथा , विद्यालयस्य पुस्तकानां समृद्धिः, वञ्चितक्षेत्रेषु ग्रामीणपुस्तकालयानां पठनकक्षाणां च स्थापना, भारतीयभाषासु पठनसामग्रेः उपलब्धिः, बालपुस्तकालयः चलपुस्तकालयोद्धाटनम्, भारते अन्यविषयेषु सामाजिकपुस्तकानां समुदायस्थापनम्, शिक्षणसंस्थाभिः पुस्तकालयैः च सह परस्परं सहयोगस्य संवर्धनम् इत्यादि।

21.10 अन्ततः पूर्वोक्तानां सर्वेषामपि उपक्रमाणां दृढीकरणाय तन्त्रज्ञानस्य उपयोगः स्वीकरिष्यते। सर्वकारीयपरोपकार्युपक्रमैः सह समूहस्रोतोमाध्यमेन स्पर्धामाध्यमेन च पौढशिक्षार्थं गुणवत्तापूर्णानि तन्त्रज्ञानाधारितानि तन्त्रांशः, अन्तर्जालपाठ्यक्रमः/मानकानि, उपग्रहाधारितदूरदर्शनस्रोतः, अन्तर्जालपुस्तकानि, आईसीटी युक्तग्रन्थालयः, प्रौढशिक्षाकेन्द्रम् इत्यादीनि विकासयिष्यन्ते। बहुषु सन्दर्भेषु गुणवत्तापूर्णप्रौढशिक्षायाः संचालनम् अन्तर्जाल मिश्रितमाध्यमेन वा करिष्यते।

## 22. भारतीयभाषाणां कलायाः संस्कृतेश्च संवर्धनम्

22.1 भारतं संस्कृतेः समृद्धभाण्डागारः वर्तते या सहस्रवर्षतः विकसिता वर्तते । सा कलासु, साहित्यिककृतिषु, प्रथाषु, परम्परासु, भाषाभिव्यक्तिषु, कलाकृतिषु, ऐतिहासिकेषु सांस्कृतिकसम्पत्तिस्थलेषु च परिलक्षितो भवति । भारते भ्रमणम्, भारतीयातिथ्यसत्कारस्यानन्दः, भारतस्य सुन्दरहस्तशिल्पानां हस्तनिर्मितवस्त्रणां च क्रयणम्, भारतस्य प्राचीनसाहित्यस्य पठनम्, योगध्यानयोः अभ्यासः, भारतीयदर्शनशास्त्रेण प्रेरणा, भारतस्य विभिन्नपर्वसु भागग्रहणम्, भारतस्य वैविध्यपूर्णसंगीतस्य कलायाश्च प्रशंसनम्, भारतीयचलचित्रणां दर्शनम्, इत्यादयः केचनायामाः वर्तन्ते, येषां माध्यमेन विश्वस्य कोटिशः जनाः अस्यां सांस्कृतिकविविधतायां सम्मिलिताः भवन्ति एवम् अस्यानन्दं स्वीकुर्वन्ति लाभान्विताश्च भवन्ति। एषा एव सांस्कृतिकी प्राकृतिकी सम्पद् वर्तते यः भारतस्य पर्यटनघोषणा इत्यस्यानुसारेण भारतं वास्तवरूपेण अतुल्यभारतं निर्माति। भारतस्य अस्य सांस्कृतिकसम्पदः संरक्षणम्, संवर्धनम्, प्रसारश्च, देशस्योच्चप्राथमिकता स्यात्, यतोहि इयं देशस्या भिज्ञानेन सह अस्यार्थव्यवस्थायै अपि महत्त्वपूर्णा वर्तते।

22.2 भारतीयकलायाः तथा संस्कृतेश्च संवर्धना न केवलं राष्ट्राय प्रत्युत जनेभ्यः अपि महत्त्वपूर्णं वर्तते। स्वभिज्ञता, मामकीनभावः, अन्यसंस्कृतीनां गौरवप्रदानम् इत्यादीनां भावानाम् उत्पादनार्थं, सांस्कृतिकजागरूकता अभिव्यक्तिः इत्यादिक्षमतानां बालेषु विकासस्य अपेक्षा अधिका वर्तते । बालकेषु स्वकीयसांस्कृतिकेतिहासः, कला, भाषा, परम्परा इत्यादिभावनानां ज्ञानस्य विकासेनैव सकारात्मकसांस्कृतिकाभिज्ञानस्य संस्कारः भवितुमर्हति।अतः स्वकल्याणाय समाजकल्याणाय च सांस्कृतिकजागरूकता अभिव्यक्तिश्च अधिकमहत्त्वं विद्यते ।

22.3 संस्कृतेः प्रसारार्थं प्रमुखः माध्यमः वर्तते कला ।कला सांस्कृतिकाभिज्ञानार्थं जागरूकतायाः संपादनाय, समाजं समुन्नेतुं जनेषु सर्जनात्मकक्षमतानां समभिवर्धनाय स्वात्मानन्दस्याभिवृद्धये च कला अपेक्षिता वर्तते । बाल्यलालनात् शिक्षणात् च प्रारभमाणानां भारतीयकलानां स्वात्मप्रसन्नता/कल्याणगुणश्च , संज्ञानात्मकविकासः तथा सांस्कृतिकमभिज्ञानं इत्येदर्थं शिक्षणस्य सर्वेषु स्तरेषु बालानां कृते प्रदानं भवेत् ।

22.4 भाषा निःसंदेहं कलया संस्कृत्या च अविच्छिन्नरूपेण संयुक्ता वर्तते। विभिन्नभाषाः विश्वं विभिन्नरूपेण दर्शयन्ति अतः मूलरूपेण कस्यापि भाषायाः वक्ता स्वानुभवान् कथमवगच्छति कथं वा गृह्णाति, इदं सर्वं तस्याः भाषायाः संरचनाधारितं भवति।विशेषरूपेण भिन्नसंस्कृतेः जनः अन्यैः सह व्यवहारेण, परिवारसदस्यैः सह व्यवहारेण, आधिकारिकजनैः सह व्यवहारेण मित्रैः अपरिचितैः च सह व्यवहारेण च भाषा प्रभाविता भवति एवं व्यवहारकाले संभाषणशैली अपि प्रभावं जनयति । एकया भाषया द्वयोः परस्परसंभाषणकाले वार्तालापस्य स्वरे मामकभावना या भवति सा संस्कृतेः प्रतिबिम्बम् अङ्कनं च विद्यते । सा संस्कृतिः अस्माकं भाषासु समाहिता विद्यते । साहित्यम्, नाटकानि, संगीतं चलचित्रम् इत्यादिकलाप्रकारकाणां पूर्णरूपेण प्रशंसनं भाषां विना न संभवति। संस्कृतेः संरक्षणाय संवर्धनाय प्रसाराय च अस्माभिः तस्याः संस्कृतेः भाषाणां संरक्षणं संवर्धनं च करणीयं भविष्यति।

22.5 दौर्भाग्यवशाद् भारतीयभाषाणां समुचितसंरक्षणं नाभवद्, अतः राष्टे विगतेषु पञ्चाशत्वर्षेषु एव 220 भाषाः विलुप्ताः। यूनेस्को इत्यनेन 197 भारतीयभाषाः लुप्तप्रायाः

इति घोषितो वर्तते। नैकाः भाषाः विलुप्यमानाः सन्ति विशेषेण यासां लिपिः न वर्तते। यदा कस्यचित् समुदायस्य जनजातेः वा तस्य भाषाविदः वरिष्ठसदस्यस्य मृत्युः संजायते तदा प्रायः सा भाषापि तेन सह लुप्ता भवति । प्रायः एतासां समृद्धभाषाणाम् /संस्कृतीनाम् अभिव्यक्तीनां च संरक्षणाय तासां उल्लेखाय वा कश्चन दृढः उपायः न क्रियते।

22.6 एतदतिरिच्य याः भारतीयभाषाः अपि आधिकारिकरूपेण लुप्तप्रायसूच्यां न वर्तन्ते किन्तु अष्टमानुसूच्याः 22 भाषाः, एताः अपि विभिन्नसमस्याभिः आवृताः सन्ति। भारतीयभाषाणं शिक्षणमधिगमश्च विद्यालयस्य उच्चशिक्षायाश्च प्रत्येकं स्तरेण सह सम्बद्धः स्यात्।भाषाः प्रासङ्गिकाः जीविताश्च स्युः एतदर्थं भाषासु गुणवत्तापूर्णाधिगमः मुद्रणसामग्री सततप्रवाहिता स्यात् तत्र पाठ्यपुस्तकानि, अभ्यासपुस्तकानि,दृश्यग्रहणम्,नाटकानि, कविताः, उपन्यासः,पत्रिकाश्च अन्तर्भूताः सन्ति। भाषायाः शब्दकोशाः, शब्दभाण्डागारश्च आधिकारिकरूपेण सततं नावीन्ययुक्ताः भवेयुः तस्य व्यापकः प्रचारः प्रसारोपि भवेत् येन सामयिकविषयं समस्यां च प्रभावरूपेण चर्चां कर्तुं शक्यते।विश्वस्य विभिन्नदेशैः आङ्ग्लम्, फ्रेंच, जर्मन, हिब्रू कोरियाई, जापानी इत्यादिभाषासु अधिगमसामग्र्याः मुद्रणसामग्र्याश्च निर्माणं तथा विश्वस्य विभिन्नभाषाणां महत्त्वपूर्णसामग्रीणाम् अनुवादः क्रियते । एवं शब्दभण्डारश्च नियमेन नूतनीक्रियते। किन्तु अस्माकं भाषाणां संरक्षणाय एतादृशी अधिगमसामग्री, मुद्रणसामग्री तथा शब्दकोशादीनां निर्माणविषये भारतस्य गतिः अतीवमन्दा वर्तते।

22.7 एतदतिरिच्य बहूनामुपायानां सत्वेपि देशे भाषाबोधकानां कुशलशिक्षकाणामत्यधिकः अभावः वर्तते। भाषाशिक्षणेपि अभिवृद्धिः स्यात् । भाषाबोधनम् अधिकमनुभवाधारितं भवितुं तस्या भाषायाः संभाषणसंवहनक्षमतायां केन्द्रितं स्यात् न केवलं भाषायाः व्याकरणे,साहित्ये शब्दकोशे च । भाषाः व्यापकरूपेण वार्तालापाय तथा शिक्षणाधिगमाय प्रयुक्ताः स्युः।

22.8 विद्यालयच्छात्रेषु भाषां कलां संस्कृतिं च प्रति श्रद्धायाः वर्धनाय बहूनामुपक्रमाणां चर्चा चतुर्थे अध्याये कृता तत्र - विद्यालयस्तरेषु संगीते, कलायाम्, हस्तकौशले च अवधानम्। बहुभाषिकलायाः प्रोत्साहनाय त्रिभाषानियमस्य यथाशीघ्रं क्रियान्वयनम्। सहैव यथासंभवम् मातृभाषा/स्थानीयभाषया शिक्षणम्, अधिकानुभवाधारितभाषाशिक्षणम्,

स्थानीयविशिष्टकलाकाराणाम्,लेखकानाम्, हस्तकलाकाराणाम्, एवं विषयविशेज्ञानां विभिन्नविशेषैः सह विशिष्टप्रशिक्षकरूपेण विद्यालयैः सह समायोजनम्। पाठ्यचर्या,मानवीयमौल्यम्, विज्ञानम्, कला, हस्तकला, क्रीडा इत्यादिषु भारतस्य पारम्परिकज्ञानस्य समावेशः। तथा पाठ्यक्रमेषु आनम्यता विशेषतया माध्यमिकविद्यालयेषु उच्चशिक्षायां च स्यात् येन विद्यार्थिनः नवीनसर्जनात्मकरूपेण कलात्मकरूपेण सासंस्कृतिकरूपेण शैक्षणिकरूपेण स्वयं विकासं कर्तुं शक्नुयुः।

22.9 उच्चशिक्षया सह अग्रिमशिक्षसु सामञ्जस्येन सह पश्चादुल्लिखितप्रमुखोपक्रमाणां साफल्याय अग्रेपि अनेके प्रयासाः करिष्यन्ते। आदौ पूर्वोल्लिखितानां समेषामपि पाठ्यक्रमाणां विकासः, तेषां शिक्षणम्, शिक्षकाणां संकायस्य च उत्तमसमूहस्य विकासः भवेत्। भारतीयभाषाः, तुलनात्मकसाहित्यम्, सर्जनात्मकलेखनम्, कलाः, संगीतम् , दर्शनशास्त्रम् इत्यादीनां सशक्तविभागानां कार्यक्रमाणां च सम्पूर्णे देशे आरम्भः विकासश्च करिष्यते एवं एषु विषयेषु चतुर्वर्षशिक्षाशास्त्रिपाठ्यक्रसहितस्य द्वुपाधिपाठ्यक्रमस्य अभिवृद्धिः क्रियते ।एते विभागाः कार्यक्रमाश्च विशेषरूपेण योग्यवतां भाषाशिक्षकाणां बृहत्समूहस्य विकासाय सहायं करिष्यन्ति । एवं कलासंगीतदर्शनशास्त्राणां लेखनस्य च शिक्षकाणां निर्माणं करिष्यते एवं समग्रदेशे अस्याः नीतेः क्रियान्वयनाय अधिकापेक्षा विद्यते ।एनआरएफ इत्यादिषु क्षेत्रेषु गुणवत्तापूर्णानुसन्धानाय वित्तं प्रदास्यते। स्थानीयसंगीतस्य, कलायाः, भाषाणां हस्तशिल्पस्य च प्रोत्साहनाय छात्राः यत्राध्ययनरताः सन्ति तत्रत्यां संस्कृतिं स्थानीयं ज्ञानं च अवाप्तुं स्थानीयोत्तमकलाकारान् हस्तशिल्पकुशलजनान् अतिथिशिकक्षणरूपेण नियोजयिष्यन्ते।प्रत्येकम् उच्चशिक्षासंस्था, प्रत्येकं विद्यालयः, विद्यालयसंकुलं च अमुं प्रयासं कुर्यात् यत् कलाकाराः तत्र निवसेयुः येन छात्रः कलाम्, सर्जनात्मकतां तथा क्षेत्रस्य/देशस्य समृद्धिं सम्यग्रूपेण ज्ञातुं शक्नुयुः।

22.10 उच्चशिक्षासंस्थासु तथोच्चशिक्षायाः अधिककार्यक्रमेषु मातृभाषा/स्थानीयभाषा वा शिक्षायाः माध्यमेन उपयोक्ष्यते। अथवा कार्यक्रमाः द्विभाषिरूपेण संचालयिष्यन्ते। येन प्रवेशे नामाङ्कनानुपाते च वृद्धिः स्यात् । अनेन सह सर्वाः अपि भारतीयभाषाः दृढतां क्रियाशीलतां च प्राप्नुयुः। मातृभाषां/स्थानीयभाषां शिक्षायाः माध्यमरूपेण उपयोक्तुं कार्यक्रमान् द्विभाषिरूपेण संचालयितुं सर्वकारेतरप्रशिक्षणसंस्थाः अपि प्रोत्साह्यन्ते ।चतुर्वर्षीयशिक्षाशास्त्रि(बी.एड) द्वुपाधिकार्यक्रमं भाषाद्वये संचालयितुं सहायो भविष्यति ।

उदाहरणार्थं - देशस्य विद्यालयेषु विज्ञानं  द्विभाषिरूपेण पाठयितुं विज्ञानस्य गणितस्य शिक्षककाणां कृते  प्रशिक्षणम् ।

22.11 उच्चशिक्षाव्यवस्थायाम्  अनुवादः, विवेचना, कला, संग्रहालयप्रशासनम्, पुरातत्त्वम्, कलाकृतिसंरक्षणम्, चित्रोपमाविन्यासस्य वेबविन्यासस्य च गुणवत्तापूर्णकार्यक्रमाः उपाधयः इत्येतेषां सर्जनं करिष्यते। निजकलायाः संस्कृतेश्च संरक्षणाय अभिवृद्धयै च विभिन्नभारतीय भाषासु गुणवत्तायुक्तसामग्रेः विकासः, कलाकृतीनां संरक्षणम्, संग्रहालयानां, पर्यटनस्थलानां संचालनाय योग्यताप्राप्तव्यक्तीनां विकासः येन  पर्यटनोद्योगोपि सुदृढः स्यात्।

22.12 इयं नीतिः इदं स्वीकरोति यत् शिक्षार्थिभ्यः भारतस्य समृद्धविविधतायाः प्रत्यक्षज्ञानं प्राप्येत । अस्य तात्पर्यं छात्राः देशस्य विभिन्नभागेषु भ्रमणसदृशगतिविधिषु भागग्रहणं कुर्युः येन न केवलं पर्यटनस्य उत्तेजनं लभ्यते किन्तु भारतस्य विभिन्नभागानां वैविध्यम्, संस्कृतिः,परम्पराम्, ज्ञानं च  विज्ञातुं श्लाघितुं च शक्नुयुः । 'एकं भारतं श्रेष्ठभारतम्' इत्यस्य अन्तर्गतं   देशस्य  शतानां पर्यटनस्थलानाम् अभिज्ञानं करिष्यते। यत्र शिक्षासंस्थाः छात्रान् एतेषां क्षेत्राणां  विषये विज्ञातुं ,  तत्स्थलानाम् इतिहासः, वैज्ञानिकयोगदानम्, परम्पराः, स्वदेशिसाहित्यम् इत्यादीनामध्ययनाय प्रेषयिष्यन्ते।

22.13 उच्चशिक्षायां कला, भाषायाः मानवीयमौल्यस्य च क्षेत्रे एतादृशकार्यक्रमाणां निर्माणेन आजीविकायाः गुणवत्तापूर्णावसराः अपि प्राप्स्यन्ते। एताषां योग्यतानां प्रभावपूर्णोपयोगं कर्तुं समर्थाः भविष्यन्ति। सम्प्रत्यपि सहस्रसंख्यायाम् अकादम्यः, संग्रहालयाः, कलावीथिकाः, सम्पत्तिस्थलानि सन्ति येषां सुचारुसंचालनाय योग्यव्यक्तीनामावश्यकता वर्तते। योग्यव्यक्तिभिः एतानि पदानि पूर्यन्ते तदा  अधिककलाकृतीनां संग्रहं कृत्वा संरक्षणं  क्रियते । संग्रहालयाः अभासिसंग्रहालयाः/ ई- संग्रहालयाः वीथिकाः पारम्परिकस्थलानि अस्माकं परम्परां  भारत्य पर्यटनोद्योगं संरक्षेयुः ।

22.14 भारतं शीघ्रमेव अनुवादेन विवेचनया च संबद्धानां प्रयासानां विस्तारं करिष्यति, येन सामन्यस्य कृते विभिन्नभारतीयभाषासु, विदेशीयभाषासु च गुणवत्ता-युक्ताधिगमसामग्री तथान्यमहत्वपूर्णा लिखता मौखिकी च सामग्री प्राप्नुयात्। एतदर्थं

भारतीयानुवादव्याख्यानसंस्था (इन्सिट्यूट आँफ ट्रान्सलेशन एंड इंटरप्रिटेशन) (आईआईटीआई) इत्यस्य स्थापना करिष्यते।एतादृशसंस्थाः देशस्यास्य उन्नतये महत्वपूर्णसेवां करिष्यति। तेन सह विभिन्नप्रकारकाणां भाषाणां, विषयविशेषज्ञानां, अनुवादकानां तथा व्याख्याविशेषज्ञानां नियोजनार्थं प्रयतिष्यते । यस्य फलस्वरूपेण सर्वासामपि भारतीयभाषाणां प्रसारे प्रचारे च सहायं भविष्यति । आईआईटीई संस्थायाः स्व अनुवादनिमित्तं तथा व्याख्यानिमित्तं यः प्रयासः आचर्यते तं सुष्ठुरूपेण अग्रेसारयितुं प्रौद्योगिक्याः पूर्णोपयोगः करिष्यति । आईआईटीई संस्थाः कालक्रमेण स्वभाविकरूपेण उन्नतिं प्राप्स्यन्ति, यथा यथा अर्हाणां योग्यनां अपेक्षा भविष्यति, तथा तथा उच्चशिक्षासंस्थाभिः सह नैकाः संस्थाः सम्पूर्णदेशे भिन्नभिन्नस्थानेषु उद्घाटयिष्यन्ते, येन अनुसन्धानविभागेन सह सहभागग्रहणं सुलभं स्यात् ।

22.15 संस्कृतभाषायाः महत्वपूर्णयोगदानम्, विभिन्नविधानां विषयाणां साहित्यम्, सांस्कृतिकमहत्त्वम्, भाषायाः अस्याः वैज्ञानिकप्रकृतिं च वीक्ष्य संस्कृतं न केवलं संस्कृतपाठशालास्तरे विश्वविद्यालयस्तरे एव सीमितं न कृत्वा मुख्यधारां प्रति समानीयते । विद्यालयेषु त्रिभाषीनियमानुसारं वैकल्पिकरूपेण पुनश्च उच्चशिक्षायामपि उच्चपाठ्यक्रमरूपेण इयं भाषा समानीयते । इयं पृथक्तया न पाठ्यते किन्तु रुचिपूर्णविषयरूपेण, नवाचारविधिना अन्य समसामयिकप्रासंगिकविषयेषु यथा-गणितम्, खगोलशास्त्रम्, दर्शनशास्त्रम्, नाटकप्रभेदाः,इत्यादिषु समायोजनं भविष्यति। अतः अस्याः नीतेः अवशिष्टभागस्य संगततां सम्पाद्य संस्कृतविश्वविद्यालयाः अपि उच्चशिक्षायाः श्रेष्ठबहुविषयकसंस्थारूपेण परिवर्तनदिशि अग्रेसरेयुः। तेषां संस्कृतविभागाः संस्कृते तथा संस्कृतज्ञानव्यवस्थायां शिक्षणं तथा अन्तर्विषयकानुसन्धानादीनां संचालनं कुर्वन्तः सन्ति तान् सर्वान् पूर्णरूपेणनूतनबहुविषयकोच्चशिक्षाव्यवस्थायां संस्थाप्य सुदृढञ्च करिष्यते । छात्राणाम् अपेक्षा यदि स्यात् तदा संस्कृतम् उच्चशिक्षायाः स्वाभाविकम् अङ्गं भविष्यति । शिक्षाशास्त्रे संस्कृतविषये च वर्षचतुष्टयस्य बहुविषयकेण शिक्षाशास्त्रोपाधिना (बी.एड्. डिग्री) विनियोगमाध्यमेन (मिशन् मोड्) संपूर्णस्यास्य देशस्य संस्कृतशिक्षकेभ्यः व्यवसायिकशिक्षा प्रदास्यते ।

22.16 भारतं एवं रीत्या सर्वासां भारतीयभाषाणाम्, साहित्यानां च अध्येतृणां, संस्कृतसंस्थानां, विश्वविद्यालयानाञ्च विस्तारं वर्धनञ्च करिष्यति। अपरञ्च अस्य

ज्ञानभाण्डागारस्य स्रोतोभूतानां सहस्राधिकपाण्डुलिपीनां संग्रहणम्, संरक्षणम्, अनुवादकरणम्, अध्ययनञ्च कर्तुं पूर्णप्रयासं करिष्यतियत्र अद्यावधि लक्ष्यं न विहितम्। एवमेव सर्वासु संस्थासु विश्वविद्यालयेषु च यत्र शास्त्रीयभाषाणां साहित्यानां च अध्ययनाध्यापनप्रक्रिया वर्तते तस्याः विस्तारो भविष्यति। अद्यावधि उपेक्षितानां लक्ष्याधिकानां पाण्डुलिपीनां संग्रहार्थं,संरक्षणार्थं,अनुवादार्थं, अध्ययनार्थं च दृढप्रयासो भविष्यति । सम्पूर्णेस्मिन् देशे संस्कृतसंस्थानां तथा संस्कृतेतरभारतीयभाषासंस्थानां विभागानाञ्च दार्ढ्यं संपाद्यते । नूतनच्छात्राणां कृते पाण्डुलिपीनाम् अन्यविषयाणां च अन्तस्सम्बन्धस्याध्ययनार्थं समुचितप्रशिक्षणं प्रदास्यते । शास्त्रीयभाषासंस्थाः स्वस्वायत्तताम् अनुवर्तयन्त्यः विश्वविद्यालयैः सह संम्बद्धतां प्राप्तुं तत्र विलयार्थं वा प्रयासं कुर्युः येन सुदृढगहनबहुविषयकपाठ्यक्रमस्य भागरूपेण संकायः कार्यं करिष्यति छात्राः अपि प्रशिक्षिताः भविष्यन्ति । एतल्लक्ष्यं साधयितुं भाषाविश्वविद्यालयाः अपि बहुविषयकाः विश्वविद्यालयाः भविष्यन्ति । यत्र अपेक्षा भवति तत्र तद्भाषायां शिक्षाशास्त्र(बी.एड्.डिग्री)द्व्युपाधिं प्रदातुं शक्यते येन तद्भाषायाम् उत्तमभाषाशिक्षकाः निर्मिताः भवेयुः । एवमपि प्रस्तावितं वर्तते यत् सर्वेषां भाषाणां कृते नूतनसंस्थानां संस्थापनं भविष्यति । विश्वविद्यालयपरिसरेषु पाली-फारसी-प्राकृतादीनां भाषाणां राष्ट्रियसंस्थायाः स्थापना करिष्यते । तथा च यस्यां संस्थायां विश्वविद्यालयेषु वा भारतीयकला-कलेतिहास-भारतीयविद्यादयः अधीयते तत्रापि एतादृशः पदन्यासः विधीयते । एतेषु सर्वेषु क्षेत्रेषु उच्चानुसन्धानार्थं एन्आरएफ इत्यनेन सहयोगः प्रदास्यते।

22.17 शास्त्रीयभाषाभिः आदिवासिभाषाभिः लुप्तप्रायभाषाभिः च साकं सर्वेषां भारतीयभाषाणाञ्च संरक्षणार्थं संवर्धनार्थं च ऊर्जावतः नूतनप्रयासान् करिष्यते । तन्त्रज्ञानं जनसमवायश्च सामान्यजनानां पूर्णसहयोगेन सह एतेषु प्रयासेषु महत्त्वपूर्णभूमिकां निर्वहति।

22.18 भारतस्य संविधानस्य अष्टमानुसूच्याम् उट्टङ्कितानां सर्वासामपि भाषाणां कृते परिषत् (अकादमी) संस्थापयिष्यते यत्र सर्वासु भाषासु कृतश्रमाणां श्रेष्ठानां विदुषां तत्भाषाभाषिणां कुशलानाञ्च अत्र समागमः भविष्यति येन आधुनिकावधारणायुक्तायाः सरलोपयुक्तायाः शब्दसंपत्तेः निर्मितिः स्यात् तथा च अनुस्यूततया नूतनश्ब्दकोशस्य निर्माणं कर्तुं शक्यते । (विश्वस्मिन् अन्यत्र यथा अन्यभाषाणां कृते सफलप्रयत्नः कृतः तथा ।) एताः परिषदः परस्परं परामर्शेण शब्दकोशानां निर्माणं करिष्यन्ति। केषुचित् स्थलेषु सामान्यजनानामपि सूचनायाः ग्रहणमपि करिष्यते । यथासम्भवं तेषामेव सामान्यशब्दानां ग्रहणमिपि करिष्यते । एतेषां शब्दकोशानाम् अधिकः प्रसारः क्रियते येन शिक्षा-

पत्रकारिता-लेखन-सम्भाषणादिप्रक्रियासु उपयोगं कुर्युः तथा पुस्तकरूपेण च अन्तर्जालमाध्यमेनापि संप्राप्तुं शक्येत । अष्टमानुसूच्यां स्थिताभ्यः भाषाभ्यः केन्द्रसर्वकारः राज्यसर्वकारैः सह परामर्शं विधाय अथवा तैः सह संभूय परिषदः संस्थाप्ययिष्यति । एवमेव देशे सर्वत्र आधिक्येन सम्भाषणमाणानां भाषाणां कृते अपि परिषदः केन्द्रसर्वकारेण राज्यसर्वकारेण वा संस्थाप्यन्ते ।

22.19 सर्वासां भारतीयभाषाणां तथा तेन परिपोषितसमृद्धस्थानीयकला-संस्कृतेः संरक्षणार्थं अन्तर्जालाधारितम् आलम्बनम्(प्लेटफर्म)/पटलम्/विकीस्रोतः इत्यत्र सामग्रिसंग्रहणं क्रियते । आलम्बनाधारेस्मिन् चलनचित्र-शब्दकोश-ध्वनिमुद्रणेत्यादीनां सामग्रीणां संरक्षणं भविष्यति तत्र सामान्यजनानां संभाषण(विशेषरूपेण ज्येष्ठानाम्)कथावाचन-कवितापठन-नाटकप्रदर्शन-लोकगान-नृत्यादयोपि भविष्यन्ति । सम्पुर्णस्यास्य देशस्य सर्वेषामपि सामान्यजनानाम् अस्मिन् प्रयत्ने सहयोगार्थं आमन्त्रणं भविष्यति तेपि आलम्बनम्(प्लेटफर्म)/पटलम्/विकीस्रोतः इत्यत्र प्रासङ्गिकसामग्रीणां संयोजनं कर्तुं शक्नुयुः । विश्वविद्यालयाः, संस्थाः, शोधसंस्थाः च परस्परं मिलित्वा सम्पूर्णस्य देशस्यास्य विशिष्टसमुदायेन सह च मिलित्वा कार्यं करिष्यन्ति।येन अस्य आलम्बनस्य अधिकं समभिवर्धनं स्यात्। अस्मिन् संरक्षणात्मके प्रयत्ने अनुसंधानपरियोजनानां कृते, यथा इतिहास-पुरातत्व-भाषाविज्ञानादिविषयेषु एनआरएफ द्वारा वित्तीयसहायता दास्यते ।

22.20 स्थानीयविज्ञैः सह उच्चशिक्षाव्यवस्थान्तर्गतं भारतीयभाषा-कला-संस्कृत्यादीनां अध्ययनाय सर्वेभ्यः छात्रवृत्तिः प्रदास्यते अत्र कापि वयःसीमा न भविष्यति । भारतीयभाषाणां संवर्धनं प्रसार-प्रचारश्च तदा संभविष्यति यदा तासां भाषाणां सततसंभाषणेन शिक्षणाधिगमप्रक्रियायाम् प्रयोगेणैव । सर्वासु भारतीयभाषासु सजीवकविताः, उपन्यासाः, पाठ्यपुस्तकानि, कथासाहित्यम्, पत्रकारिता इत्यादिषु उत्तमकार्यस्य निश्चितये उत्कृष्टकविता-गद्यादिनिमित्तं पुरस्कारव्यवस्था भविष्यति । औद्योगिकयोग्यतायाः अर्हतायाः वा मानदण्डरूपेण भारतीयभाषाप्रवीण्यमपि अन्तर्भावः क्रियते ।

## 23. तन्त्रज्ञानोपयोगः समेकीकरणं च

23.1 भारतम् सूचनाप्रसारणम्, तन्त्रज्ञानम्, अन्तरिक्षाद्यन्यात्याधुनिकक्षेत्रेषु वैश्विकस्तरे नेतृत्वं निर्वहति । डिजिटलभारतम्- अभियानं सम्पूर्णदेशं डिजिटलमाध्यमेन सशक्तसमाजं ज्ञानाधारितार्थव्यवस्थारूपेण परिवर्त्तयितुं सहायं करिष्यति । परिवर्तनेस्मिन् गुणवत्तापूर्णशिक्षा मुख्यं पात्रं निर्वहति तथापि तन्त्रज्ञानम् अपि शैक्षिकप्रक्रियायां तथा परिणामनिर्वहणे महत्वपूर्णभूमिकां निर्वहति । एवं प्रतिस्तरं तन्त्रज्ञानशिक्षयोः मध्ये घनिष्ठसम्बन्धः अस्ति ।

23.2 तान्त्रिकविज्ञानां शिक्षकाणां तथा छात्रोद्यमपतिभिः सह उद्यमपतीनां च वास्तविकरचनात्मकतया तान्त्रिकज्ञानविकासस्य तीव्रस्परूपं दृष्ट्वा एतत् सुनिश्चितमेव यत् तन्त्रज्ञानं शिक्षां बहुषु आयामेषु प्रभावयिष्यति इति। तेषु अधुना कानिचन एव ऊहयितुं शक्यते । नवीनं तन्त्रज्ञानक्षेत्रं यथा - कृत्तिमबुद्धिमत्ता,यान्त्रिकाध्ययनम्,ब्लॉकचेन स्मार्ट बोर्ड, हस्तसंचालित विगणनोपकरणम् इत्यादयः, छात्राणां विकासार्थं यथोचितसंगणकपरीक्षा, अन्यप्रकारकशैक्षिकतन्त्रांशाः यन्त्रांशाश्च च न केवलं छात्राः कक्षासु किमधीयते इत्यस्य परिवर्तनापेक्षया कथम् अधीयते इत्यस्यापि परिवर्तनं कुर्वन्ति। अतः अस्मिन् क्षेत्रे भविष्यति काले अपि तन्त्रज्ञानदृष्ट्या शैक्षिकदृष्ट्या च अधिकशोधस्यावश्यकता भविष्यति ।

23.3 शिक्षायाः विभिन्नांशानाम् अभिवर्धनार्थं तन्त्रज्ञानस्य उपोयोगस्य समेकीकरणस्य समर्थनं समावेशश्च क्रियते किन्तु व्यापकतया समन्वयात् प्राक् प्रसङ्गानुगुणं दृढतया पूर्णपारदर्शितया समाकलनं क्रियते । विद्यालये उच्चशिक्षायाञ्च क्षेत्रद्वयेपि शिक्षण-मूल्याङ्कन-नियोजन-प्रशासनादि स्तरेषु तन्त्रज्ञानस्य उपयोगविषये स्वविचाराणां मुक्तरूपेण आदान-प्रदानार्थं स्वतन्त्राधारस्य निर्माणाय स्वायत्तनिकायरूपेण राष्ट्रियशैक्षिकतन्त्रज्ञानसंस्थायाः (एनईटीएफ) निर्माणं भविष्यति। एनईटीएफ इत्यस्य उद्देश्यम् शिक्षासंस्थायाः केन्द्रसर्वकारस्य राज्यसर्वकाराणाम् अन्यहितधारकाराणां च कृते नवीनज्ञानेन अनुसन्धानेन च सह अवसरप्रदानाय तन्त्रज्ञानस्य समावेशार्थं, व्यूहसंरचनार्थं उपयोगसंबद्धनिर्णयस्य सुगमतां च कर्तुं एवं सर्वोत्तमाभ्यासस्य समालोचनार्थं विनिमयार्थं च विद्यते। एनईटीएफ इत्यस्य अधोलिखितकार्याणि भविष्यन्ति यथा -

क. तन्त्रज्ञानाधारितान्तरायविषये केन्द्रसर्वकारस्य राज्यसर्वकारस्य च संस्थानां कृते स्वतन्त्रतया प्रमाणाधारितपरामर्शस्य प्रापणम् ।

ख. शैक्षिकतन्त्रज्ञाने बौद्धिकसांस्थिककक्षमतायाः निर्माणम्।
ग. अस्मिन् क्षेत्रे रचनात्मककरूपेण अत्यन्तप्रभाविकार्यस्य परिकल्पना ।
घ. अनुसंधानार्थं नवाचारार्थं नूतनलक्षस्य स्पष्टता ।

23.4 शैक्षिकतन्त्रज्ञानं वेगेन परिवर्तमाने क्षेत्रे स्वस्य प्रासङ्गिकमहत्वस्य निरन्तरतायै एनईटीएफ शैक्षिकतन्त्रज्ञानस्य आविष्कारकाः विज्ञाः इत्यादिविविधस्रोतोभ्यः अधिकृतदत्तांशस्य निरन्तरतां रक्षति । तथा दत्तांशस्य विश्लेषणं विविधस्तरीयशोधकर्तृभिः सह संभूय क्रियते । ज्ञानस्य तत्प्रयोगस्य तथा तदर्थं सततनूतनसर्जनस्य प्रोत्साहनार्थं, एनईटीएफ अन्तराष्ट्रीयशैक्षिकतन्त्रज्ञानशोधकर्तृणां, उद्यमिपुरुषाणां तन्त्रज्ञानोपयोक्तृणां जनानां च विचारविमर्शनस्य लाभाय भिन्नभिन्नस्थानेषु क्षेत्रीय-राष्ट्रियसम्मेलनानां, कार्यशालादीनाम् आयोजनं करिष्यति ।

23.5 तन्त्रज्ञानहस्तक्षेपस्य मुख्योद्देश्यं शिक्षणाधिगमप्रक्रियायाः मुल्याकलनप्रक्रियाणां अभिवृद्धिः, शिक्षकाणां निर्माणम्, व्यावसायिकविकासार्थं सहयोगः, शैक्षिणिकप्रवेशस्य वर्धनम्, शैक्षिकनियोजनम्, प्रबन्धनस्य प्रशासनस्य सरलीकरणं च तत्र प्रवेश-उपस्थिति-मूल्याङ्कन-संबद्धप्रक्रियादयः सम्मिलिताः सन्ति ।

23.6 उपर्युक्तसर्वेषामपि उद्देश्यानां प्राप्त्यर्थं प्रतिस्तरे शिक्षकाणां विद्यार्थीनां कृते विभिन्नप्रकारकाणां शैक्षिकतन्त्रांशादीनां विकासं कृत्वा तेषां कृते उपलब्धिः कार्यते। एतादृशाः तन्त्रांशाः प्रमुखभारतीयभाषासु उपलभ्यन्ते एतेषाम् उपलब्धि सुदूरक्षेत्रेषु स्थितैः छात्रैः दिव्याङ्गविद्यार्थिभिः च सह सर्वेषां कृते भविष्यति । सर्वराज्यैः तथा एनसीईआरटी-सीआईईटी-सीबीएसई-एनआईओएस-इत्यादिभिः अपि च अन्यसंस्थाभिः विभिन्नक्षेत्रीयभाषासु विकसितशिक्षणाधिगमसम्बन्धी अन्तर्जालसामग्री दीक्षाप्लेटफार्म-इत्यत्र समायोजनं भविष्यति । अस्मिन् प्लेटफार्म-मध्ये उपलब्धानां अन्तर्जालसामग्रीणाम् उपयोगं शिक्षकाणां व्यवसायसम्बन्धिविकासार्थं कर्तुं शक्यते। दीक्षाप्लेटफार्म-इत्यनेन साकम् अन्यशैक्षिकतन्त्रज्ञानसम्बद्धोपायानां संवर्धनाय प्रसारणाय च सीआईईटी-इत्यस्य स्वरूपं सुदृढं करिष्यते। विद्यालयेषु शिक्षकाणां कृते उपयोगाय योग्योपकरणनाम् उपलब्धिः कार्यते येन शिक्षकाः स्वशिक्षणाधिगमप्रक्रियायां ई-सामग्रीणाम् उपयोगं कर्तुं शक्नुयुः। तन्त्रज्ञाना धारित शिक्षाप्लेटफ़ॉर्म यथा -दीक्षा/स्वयम् इत्येतेषां सर्वेषु विद्यालयेषु, उच्चशिक्षासु च

समन्वयो भविष्यति तत्र उपयोगकर्तृणां रेटिंग /समीक्षा अन्तर्भवति, येन गुणत्माकविषयस्य संवर्धनार्थम् अवसरो लभ्यते।

23.7 संपूर्णशिक्षाव्यवस्थायाः अनिवार्यरूपेण परिवर्तनाय शीघ्रविकासपरिवर्तनशीलतन्त्रज्ञानस्य विषये विशेषलक्ष्यं स्यात् । यदा 1986/1992 तमे वर्षे राष्ट्रियशिक्षानीतिनिर्माणम् अभूत् तदा अन्तर्जालस्य अद्यतनक्षिप्रप्रभावम् अनुमातुं कठिनमासीत्। अस्माकम् अद्यतनशिक्षाप्रणाल्याः एतादृशतीव्रतया युगान्तरकारिपरिवर्तनस्य सम्मुखीकरणस्य असमर्थता अस्मिन् प्रतिस्पर्धामयेस्मिन् संसारे अस्माकं (व्यक्तिगतरूपेण राष्ट्ररूपेण च) भयङ्करीं हानिकारकस्थितिं प्रति नयति । उदाहरणं यथा अद्य संगणकं तथ्यात्मकप्रक्रियात्मकज्ञानविषये मनुष्यं पश्चादभिमुख्यकरोत् तथापि अस्माकं शिक्षाव्यवस्था उच्चस्तरदक्षतायाः विकाससन्दर्भे छात्रेषु शिक्षणाधिगमप्रक्रियायाः प्रतिस्तरे ज्ञानस्य अधिकभारं निदधाति ।

23.8 एतादृशसमये अस्याः नीतेः निर्माणमभवत् यदा कृत्रिमबुद्धिमत्तायाः (आर्टिफ़िश्यल इंटेलिजेंस) 3डी/7डी वर्चुअल रिएल्टी-इत्यादीनां निश्चितपरिवर्तनकारितन्त्रज्ञानस्य विकासः जायमानो वर्तते । यथा यथा कृत्रिमबुद्धिमत्ताधारितपूर्वानुमानानाम् मौल्यं न्यूनं भविष्यति तथा तथा कृत्रिमबुद्धिमत्तासाधकैः सह साम्यं भवितुमरभते तदा ते अपि तेषामपेक्षया अग्रे सरिष्यति । वैद्यसदृशवृत्तिपराणां कृते पूर्वानुसूचकनिर्णयकार्येषु सहायो भविष्यति। एआई इत्यस्य परिवर्तनाय क्षमतानिर्णयः स्पष्टः अस्ति यत्र त्वराप्रतिक्रियानिमित्तं शिक्षाव्यवस्था सज्जा भवेत् । एनईटीएफ इत्यस्य स्थायीकार्येषु विकासशीलस्य तान्त्रज्ञानस्य क्षमतासंपादनार्थं परिवर्तनार्थं च अनुमानितसमयसीमायाः आधारेण वर्गीकरणार्थं समये समये एतेषां विश्लेषणानाम् उपस्थापनं शिक्षामन्त्रालयस्य समक्षं भविष्यति। सूचनायाः अस्याः आधारेण शिक्षामन्त्रालयः औपचारिकरूपेण एतादृशतन्त्रज्ञानं चिह्नितं करिष्यति यस्य उत्पत्त्यर्थं शिक्षाप्रणाल्याः प्रतिक्रिया अपेक्ष्यते।

23.9 शिक्षामन्त्रालयेन औपचारिकरूपेण नवीनपरिवर्तनकारितन्त्रज्ञानस्य औपचारिकरूपेण स्वीकर्तुं प्रतिक्रियारूपेण राष्ट्रिय-अनुसंधान-प्रतिष्ठानं तन्त्रज्ञानक्षेत्रे अनुसंधानस्य आरम्भं विस्तारं च करिष्यति । कृत्रिमबुद्धिमत्ता (एआई) इत्यस्य संदर्भे एनआरएफ त्रिमुखीविधानं परिगणयति।(क) सहकृत्रिमबुद्धिमत्तानुसंधानस्य अनुवर्तनम् (ख)एप्लिकेशन आधारितानुसंधानस्य विकासः प्रयोगश्च, तथा (ग) स्वास्थ्य-कृषि-

जलवायुसदृशवैश्विकापत्काले प्रत्याह्वानं सम्मुखीकर्तुं कृत्रिमबुद्धिमत्तायाः उपयोगं करिष्यन् अन्ताराष्ट्रीयानुसंधानस्य प्रयत्नस्य प्रारम्भः भविष्यति ।

23.10 उच्चशिक्षासंस्थाः न केवलं परिवर्त्यमान-तन्त्रज्ञानस्य अनुसंधाने सक्रियभूमिकां निर्वहति अपि तु अत्याधुनिकक्षेत्रे प्रारम्भिकनिर्देशात्मकसामग्र्याः तथा पाठ्यक्रमस्य (अन्तर्जालपाठ्यक्रमेण सह) अपि निर्माणेन सह व्यावसायिकशिक्षादिषु विशिष्टक्षेत्रेषु तस्य प्रभावस्य आकलनं करिष्यति । यदा तन्त्रज्ञानं परिपक्वतास्तरं प्राप्स्यति तदा सहस्राधिकच्छात्रैः समवेता उच्चशिक्षासंस्था एतादृशशिक्षणकौशलनिर्माणकार्यस्य मापनार्थम् आदर्शरूपेण भविष्यति यत्र वृत्तिपरकसिद्धतां लक्षीकृत्य प्रदीयमानप्रशिक्षणप्रयत्नाः अपि अन्तर्भवन्ति। परिवर्तनकारितन्त्रज्ञानं काश्चन वृत्तीः निरर्थकं करिष्यति अतः नूतनवृत्तीनां सर्जनार्थं तथा वृत्तेः संरक्षार्थं च कौशलम्, डि-स्किलिंग-प्रति प्रभाविगुणवत्तापूर्णदृष्टिः महत्वपूर्णा भविष्यति । संस्थानां कृते कौशलैः उच्चशिक्षया सह एकीकरणयोग्य प्रशिक्षणं प्रदातुं संस्थागतसंस्थेतरविभागानां भागग्रहणस्य स्वीकृतिप्रदानार्थं स्वातन्त्र्यं भविष्यति।एवं तस्य कौशलोच्चशिक्षणसंबद्धरूपरेखाभिः सह एकीकरणं भविष्यति।

23.11 विश्वविद्यालयानाम् उद्देश्यं संरचनाध्ययनादिमूलक्षेत्रे, बहुविषयकक्षेत्रे "कृत्रिम-बुद्धिमत्ता" क्षेत्रे स्वास्थ्य-कृषि-विध्यादिव्यावसायिकक्षेत्रे शोधोपाधेः, स्नातकोत्तरपाठ्यक्रमस्य प्रदानम् । स्वयम् इत्यस्य सहयोगेन अस्मिन् क्षेत्रे आधिकारिकतया पाठ्यक्रमाणां विकासं कृत्वा तस्य प्रसारप्रचारं कर्तुं शक्नुवन्ति । शीघ्रतया समन्वयं कर्तुम् उच्चशिक्षासंस्थाः प्रारम्भतः एतेषाम् अन्तर्जालपाठ्यक्रमाणां पारम्परिकशिक्षणाधिगमप्रक्रियायां स्नातके व्यावसायिकपाठ्यक्रमे च सम्मेलयितुं शक्नुवन्ति । उच्चशिक्षासंस्थाः कृत्रिमबुद्धिमत्तायाः कृते सहायप्रदानार्थं न्यूनविशेषज्ञापेक्षावति क्षेत्रे, यथा दत्तांशाङ्कनम्(डेटा एनोटेशन) चित्रवर्गीकरणम् (इमेज क्लासिफिकेशन), भाषणप्रतिलिपिः इत्यादौ प्रशिक्षणमपि दातुं शक्नुवन्ति । विद्यालयीयविद्यार्थीनां भाषाशिक्षणप्रयत्नं भारतस्य विविधभाषाभ्यः स्वाभाविकभाषाप्रक्रिया - प्रोत्साहनस्य प्रयासेन सह संयोजयिष्यते ।

23.12 यथा यथा परिवर्तनकारितन्त्रज्ञानस्वरूपस्य विकासः भवति विद्यालयीयशिक्षा अग्रिमशिक्षा च एतस्य प्रभावविषये समाजस्य जागरूकतायाः वर्धने सहायताम् आचरति अपि च एतेन संबद्धान्यविषयाणां समाधानं करिष्यति । तन्त्रज्ञानेन साकं संबद्धविषयेषु एकस्य सुविचारित-सार्वजनिकैकमत्यर्थम् अस्याः जागरूकतायाः आवश्यकता अस्ति । विद्यालयस्तरे अध्ययनचर्यायां नैतिकविषये समसामयिकविषये एनईटीएफ़/शिक्षामन्त्रालयेन

चिह्नितस्य अधिकप्रभावशालितन्त्रज्ञानस्य विषये च चर्चायाः अवसरोपि प्रकल्प्यते। निरन्तरशिक्षार्थं अपेक्षितनिर्देशात्मकविमर्शात्मक-सामग्र्याः अपि निर्माणं करिष्यते ।

23.13 कृत्रिमबुद्धिमताधारिततन्त्रज्ञानं प्रति दत्तांशः महत्वपूर्णः इन्धनसदृशो वर्तते । गोपनीयतायाः विषयेण, दत्तांशसंधारणदत्तांशसंरक्षणादिविषयेण च सह सम्बद्धां सुरक्षां विधिं मानकं च प्रति जागरूकतायाः अधिकापेक्षा वर्तते। तेन सह कृत्रिमबुद्धिमत्ताधारिततन्त्रज्ञानस्य विकासार्थं प्रयोगार्थञ्च नैतिकविषयेषु जागरूकतायाः अपेक्षा अस्ति । शिक्षा एतेषु विषयेषु जागरूकतायाः उत्पादनप्रयत्ने महत्वपूर्णभूमिकां निर्वहति। अन्यपरिवर्तनकारितन्त्रज्ञानं यथा स्वच्छपुनर्नवीकरणोर्जा, जलसंरक्षणम्, स्थिरकृषिः, पर्यावरणसंरक्षणम्, हरिदुपक्रमाः इत्यादयः अस्माकं जीवननिर्वाहक्षेत्रे तथा छात्राणां शिक्षाप्रदाने प्रभावं जनयन्ति । अतः एतेष्वपि विषयेषु शिक्षायाः प्राथमिकदृष्टिः भविष्यति ।

## 24. सद्यस्क-डिजिटल-शिक्षा - तन्त्रज्ञानस्य यथाक्रमम् उपयोगस्य निश्चयः

24.1 नवीनपरिप्रेक्ष्यस्य वास्तविकतायाः च कृते नूतनोपक्रमाः अपेक्ष्यन्ते । सांक्रामिकरोगाणां, वैश्विकमाहापदां च साम्प्रतं विवृद्धिं दृष्ट्वा अधुना एतत् अनिवार्यमभवत् यत् यदा यत्र च शिक्षायाः पारम्परिकविशेषसाधनानां संभावना न भवति तत्र वयं गुणवत्तापूर्णशिक्षायाः वैकल्पिकसाधनेन सह सिद्धा भवेम । अस्मिन् विषये नूतनशिक्षानीतिः-2020 तन्त्रज्ञानस्य महत्त्वं स्वीकुर्वन्ती तस्मात् जायमानस्य हानिम् अपायमपि ख्यापयति । एतस्य निर्धारणाय यथा सद्यस्क/डिजिटल-शिक्षायाः प्रतिकूलप्रभावं न्युनीकुर्वन् कथं लाभं स्वीकर्तुं शक्यते इति विचिन्त्य सावधानपूर्वकम् उपयुक्तरूपेण विन्यासः कृतः एवम् अग्रणी(पाईलेट)अध्ययनार्थमपि सहायम् आचरति । अपि च सर्वेषां कृते गुणवत्ताशिक्षां प्रदातुं भाव्यधुनाप्रत्याह्वानानि सम्मुखीकर्तुं च साम्प्रतं डिजिटल-वेदी, क्रियान्वित-आईसीटी-आधारितोपक्रमाणां गुणवत्ता वर्धेत तथा तेषां विस्तारः च भवेत् ।

24.2 तथापि सद्यस्क/डिजिटल-शिक्षायाः लाभं तावत् न स्वीकर्तुं शक्यते यावत् डिजिटल-इंडिया-अभियानस्य, अत्युत्तमसंगणकोपकरणानां च उपलब्धिः इत्यदेः दृढप्रयत्नेन विभिन्नमाध्यमेन च डिजिटल-अंतरस्य समाप्तिः न क्रियेत । एतत् गुरुत्वपूर्णमस्ति यत् सद्यस्क-डिजिटलशिक्षायाः कृते तन्त्रज्ञानस्य उपयोगस्य चिन्तां समर्पकरूपेण परिहरेत् ।

24.3 प्रभावशाली सद्यस्कप्रशिक्षको भवितुं शिक्षकाणां योग्यप्रशिक्षणस्य विकासस्य च आवश्यकता अस्ति । एतत् निर्धारयितुं न शक्यते यत् पारम्परिककक्षासु एकः उत्तमः शिक्षकः स्वचालितरूपेण प्रचाल्यमानायां सद्यस्ककक्षायाम् अपि एकः उत्तमशिक्षको भवतीति । अध्यापने अपेक्षितपरिवर्तनं विहाय सद्यस्काकलनार्थमपि भिन्नदृष्टेः आवश्यकता भवति । बृहत्स्तरे अधिकाधिकानां कृते सद्यस्कपरीक्षाम् आयोजयितुं बहु प्रत्याह्वानानि सन्ति। यत्र सद्यस्कपरिवेशे प्रष्टव्यानां प्रश्नानां प्रकारसंबद्धसीमाः, नेटवर्क, विद्युदादिव्यवधानैः सह संघर्षः, अनैतिकाभ्यासस्य अवरोधः इत्यादयः अत्र अन्तर्भवन्ति। विभिन्नप्रकारकेषु पाठ्यक्रमेषु/विषयेषु यथा प्रदर्शनकला-विज्ञानादि-व्यावहारिक-सद्यस्क / डिजिटलशिक्षाक्षेत्रे सीमाः भवन्ति, येषां नूतनोपायैः सह संयोज्य किञ्चित् दूरीकर्तुं शक्यते । एतत् अतिरिच्य यावत्पर्यन्तं सद्यस्कशिक्षाम् अनुभवात्मकगतिविध्याधारितशिक्षया साकं संयोजनं न भविष्यति तावत् अस्य अध्ययनस्य सामाजिक- भावनात्मक मानसिकतायामपर्यन्तं सीमितलक्ष्याधारितं जवनिकावत् भविष्यति ।

24.4 डिजिटलतन्त्रज्ञानस्य उद्भवः तथा विद्यालयादारभ्य उच्चशिक्षापर्यन्तं सर्वेषु स्तरेषु शिक्षणाधिगमप्रक्रियानिमित्तं तन्त्रज्ञानस्य विकासशीलमहत्त्वं वीक्ष्य - इयं नीतिः अधोलिखितानां प्रमुखप्रयासानाम् अनुशंसां करोति -

**क. सद्यस्कशिक्षार्थम् अग्रणी-अध्ययनम् :** सद्यस्कशिक्षायाः हानिं न्यूनीकृत्य शिक्षया सह एकीकरणस्य लाभस्य मूल्याङ्कनार्थं तथा छात्राणां कृते उपकरणाभ्यासः, ई-सामग्रीणां अभीष्टप्रारूपादिसम्बद्धाध्ययनार्थं च तेन सह अग्रण्यध्ययनस्य संचालनाय एनईटीएफ़, सीआईईटी, एनआईओएस,इग्नू,आईआईटी,एनआईटी इत्याद्युपयुक्तसंस्थानां चयनं भविष्यति । एतादृशानां अग्रण्यध्ययनस्य परिणामान् सार्वजनिकरूपेण सूचयिष्यन्ते एवं निरन्तराभिवृध्यर्थं एतस्योपयोगः क्रियते।

**ख.) डिजिटल-मूलसौकर्यम् :** भारतस्य क्षेत्रफलम्, वैविध्यम्, संकीर्णतां साधनासमावेशं च परिहर्तुं शिक्षाक्षेत्रे स्वतन्त्र-परस्पर-विकसित-सार्वजनिक-डिजिटलमूलसौकर्यस्य निर्माणस्य अपेक्षा विद्यते । यस्योपयोगः विभिन्न-प्लेटफार्ममाध्यमेन, निर्दिष्टपरिहारेण च कर्तुं शक्यते।

यतः एतत् सुनिश्चितं भविष्यति यत् तन्त्रज्ञानक्षेत्रस्य शीघ्रप्रगत्या सह तान्त्रिकाधारितसमाधानं पुरातनं न भवति इति ।

**ग.) सद्यस्क-शिक्षण-वेदी उपकरणञ्च :** शिक्षार्थीनां प्रगतेः निरीक्षणार्थं शिक्षकाणां कृते उत्तमसंरचनायुताम्, उपयोक्त्रनुकूलां, सहायकसामग्रीं प्रदातुं स्वयम/दीक्षा-इत्यादेः उपयुक्त-ई-अध्ययनस्य वेदिनः विस्तारः भविष्यति । साम्प्रतं महारोगसमस्या इदं स्पष्टमकरोत् यत् सद्यस्ककक्षा आयोजनार्थं मार्गद्वयेपि चित्रग्रहणस्य तथा मार्गद्वये ध्वनिग्रहणस्य उपकरणस्य वास्तवरूपेण अधिकापेक्षा अस्ति इति।

**घ.) सामग्रीनिर्माणं, डिजिटल-भाण्डागारः, प्रसारश्च :** पाठ्यक्रमः, अवगमक्रीडा, प्रतिमानविधानम् (सिमुलेशन), ऑगमेंटेड-रियलिटी, वर्चुअल-रियलिटी-इत्यादीनां निर्माणेन सह सामग्रीणां डिजिटल-भाण्डागारः विकासितो भविष्यति । यस्मिन् प्रभावशीलता गुणवत्तायाः कृते उपयोगकर्तृभिः तौल्या प्रदानाय स्पष्टसार्वजनिकप्रणाली भविष्यति । छात्रणां कृते मनोरञ्जनाधारिताधिगमाय उपयुक्तसाधनानि तद्यथा, ऐप, भारतीयकलासंस्कृत्योः गेमफिकेशन च नैकासु भाषासु स्पष्टसंचालननिर्देशेन सह निर्माणं भविष्यति। छात्रेभ्यः ई-सामग्र्याः प्रसारार्थं एकस्य विश्वसनीय- प्रतिस्वीकृति (बैक अप)कार्यविधानं प्रदास्यते ।

**ङ.) डिजिटल-व्यवधानस्य परिहारः :** एतादृशविशिष्टतथ्यं दृष्ट्वा ज्ञायते यत् जनसंख्यायामस्यां कस्मिंश्चित् बृहद्भागे डिजिटल-उपयोगः न्यूनो विद्यते। अतः एतस्य उपयोगार्थं, प्रसारार्थं, च अधुना विद्यमानानां जनमाध्यमानानां दूरदर्शनम्, आकाशवाणी, सामुदायिकाकाशवाण्यादीनाम् अधिकोपयोगः सर्वत्र भविष्यति । एवमेव शैक्षिककार्यक्रमाः छात्राणां भिन्नापेक्षायाः पूरणार्थं विभिन्नभाषासु 24/7 अहोरात्रम् उपलब्धिः कार्यते । सर्वासु भारतीयभाषासु सामग्रीणामुपरि विशेषावधानं भविष्यति येन यावत्शक्यं शिक्षकेभ्यः छात्रभ्येश्च डिजिटलसामग्री अध्ययनभाषया उपलब्धिः स्यात् ।

**च.) आभासीयप्रयोगशाला(वर्चुअल-लैब्सः) :** आभासीयप्रयोगशाला(वर्चुअल-लैब)निर्माणार्थं दीक्षा, स्वयम्, स्वयम्-प्रभा-इत्यादीनां साम्प्रतं ई-अधिगमवेदी इत्यस्य च उपयोगः करिष्यते। येन सर्वेभ्यः छात्रेभ्यः गुणवत्तापूर्णव्यावहारिकप्रयोगाधारितानुभवस्य समानावसरः प्राप्तः

भविष्यति । एसईडीजी छात्रेभ्यः शिक्षकेभ्यश्च पूर्वविषयारोपितसामग्री टैबलेट-इत्यादीनाम् उपकरणानाम् अपेक्षानुगुणं प्रदातुं विचारः भविष्यति एवं तेषां विकसोपि भविष्यति ।

**छ.) शिक्षकेभ्यः प्रशिक्षणं प्रोत्साहनञ्च :** शिक्षकेभ्यः शिक्षार्थिकेन्द्रिताध्यापनविषये गहनप्रशिक्षणं दास्यते। एतदपि प्रबोध्यते यत् ते सद्यस्क-शिक्षण-वेदिनाम् उपकरणानां च उपयोगं कृत्वा गुणवत्तायुक्त सद्यस्क-सामग्र्याः स्वयं सर्जनं कर्तुम्। ई-सामग्र्या सह छात्रेषु परस्परसहयोगस्थापनार्थं शिक्षकस्य भूमिकायाः विषये दृष्टिः भविष्यति ।

**ज.) सद्यस्काकलनं परीक्षाः च :** उपयुक्तसंस्थाः यथा अनुशंसितं राष्ट्रियाकलनकेन्द्रम् अथवा 'परखा', विद्यालयपरिषत्(स्कूलबोर्ड), एनटीए, एवं अन्यचिह्नितसंस्था इत्याद्यः आकलनस्वरूपस्य निर्धारणं कृत्वा। कार्यान्वयनं च करिष्यन्ति । तत्र दक्षता, निवेशः, रुब्रिक्स, मानकीकृताकलनम्, आकलन-विश्लेषणं च अस्मिन् प्रचनायम् अन्तर्भवन्ति । एकविंशतिशतकस्य कौशल्यं लक्ष्यीकुर्वत् शिक्षा-तन्त्रज्ञानस्य उपयोगेन सह आकलनस्य नूतनप्रक्रियायाः अध्ययनं भविष्यति ।

**झ.) अधिगमस्य मिश्रितप्रतिमानम् :** डिजिटल-अधिहमस्य शिक्षायाश्च प्रोत्साहनेन सह परम्परागत-व्यक्तिगतरूपेण शिक्षकच्छात्रयोः परस्परं सम्मुखीभूय शिक्षणाधिगमप्रक्रियायाः महत्त्वमपि स्वीक्रियते । तदनुगुणं अधिगमार्थं विभिन्नविषयेषु विभिन्नमिश्रितप्रभाविप्रतिमानानि उपयुक्त-प्रतिकृति-निमित्तं चिह्नितानि भविष्यन्ति ।

**ञ.) मानकस्य पूरणम् :** यथा यथा सद्यस्क/डिजिटल-शिक्षायां शोधाः सम्पत्स्यन्ते तदा एनईटीएफ तथा अन्योपयुक्तसंस्थाः सद्यस्क/डिजिटल-शिक्षणार्थं सामग्रीणां, तन्त्रज्ञानस्य, शिक्षाविषयस्य मानकस्य स्थापनं भविष्यति । मानकानि राज्यैः, बोर्ड-विद्यालयैः विद्यालयपरिसरैः, उच्चशिक्षीसंस्थाभिः च ई-अधिगमनिमित्तं दिशानिर्देशस्य निर्माणार्थं सहयोगं करिष्यन्ति ।

**24.5 विश्वस्तरीयभवनम् डिजिटल-मूलसौकर्याणि,शैक्षणिक-डिजिटल-सामग्रीः सामर्थ्यं च प्रति समर्पितस्य निकायस्य सर्जनम्**

शिक्षायां तन्त्रज्ञानं प्रयाणं वर्तते न तु गम्यं स्थानम्। नीतिगतोद्देश्यान् अनुष्ठाने समानेतुं विभिन्नपरिस्थितीः सम्मुखीकर्तुं क्षमतावतः जनस्य अभिवृद्धिः अपेक्षिता विद्यते । विद्यालयोच्चशिक्षयोः कृते ई-शिक्षायाः अपेक्षायां केन्दीकर्तुं मन्त्रालयेन मूलभूतसौकर्यम्,डिजिटल-सामग्री,क्षमतानिर्माणम् इत्यादिव्यवस्थां कर्तुं समर्पितस्य निकायस्य स्थापना क्रियते । यतोहि वेगेन तन्त्रज्ञानस्य विकासो जायमानो विद्यते अतः गुणवत्तापूर्ण- ई-अधिगमस्य वितरणार्थं विशेषज्ञनाम् अपेक्षा भविष्यति ।एतदर्थं सक्रियपरिसरव्यवस्थायाः समाधानार्थं प्रोत्साहनं भवेत् । तत् न केवलं भारतस्य आकारवैविध्यसमतासम्बद्धप्रत्याह्वानं परिहरेत् किन्तु वेगेन परिवर्त्यमानं तन्त्रज्ञानं मनिसि निधाय विकासः भवेत्। तन्त्रज्ञानस्य केचन भागाः वर्षार्धे एव पुरातनाः भविष्यन्ति । अतः अस्मिने केन्द्रे प्रशासनम्,शिक्षा, शैक्षिकम्, तन्त्रज्ञानम्,डिजिटल-शिक्षाशास्त्रम् आकलनं च, ई-प्रशासनम् इत्यादिक्षेत्रैः संबद्धाः विशेषज्ञाः अन्तर्भवन्ति ।

## भागः – IV क्रियन्वयनस्य नीतिः

**25. केन्द्रीयशिक्षाशंसनापरिषदः सशक्तीकरणम्**

25.1 अस्याः नीतेः सफलक्रियान्वयनाय राष्ट्रस्तरे राज्यस्तरे संस्थास्तरे जनस्तरे च दीर्घकालिकलक्ष्यस्य, विशेषज्ञानां सततोपलब्धेः, संबद्धाधिकारिभिः दृढकार्यनीतेः च अपेक्षा विद्यते । अपि च इयं नीतिः केन्द्रीयशिक्षकानुशंसापरिषत् (केब)इत्यस्य सशक्तीकरणार्थम् अनुशंसां करोति। येन न केवलं शैक्षिकसांस्कृतिकविकाससंबद्धस्य विषयं प्रति समीक्षापरामर्शार्थं वेदिकां प्रददाति किन्तु एतदपेक्षया अधिकोद्देश्यार्थं विद्यते । पुनारचितः पुनर्जीवितः केब शिक्षामन्त्रालयस्तरस्य राज्यस्तरस्य संस्थया निकायेन च मिलित्वा देशे शिक्षायाः लक्ष्यस्य निरन्तरं विकासार्थं, तत्र स्पष्टतां समानेतुं, तस्य मूल्याङ्कनार्थं, संशोधनार्थम् उत्तरदायी भवति । केब इदं लक्ष्यं साधयितुं सहायम् कुर्वाणाभ्यः संस्थाभ्यः प्रतिमानं निर्माति तन्निरन्तरं परिशीलयति ।

25.2 अधिगमे शिक्षायां च अधिकावधानं प्रदातुं मानवसंसाधनविकासमन्त्रालयं शिक्षामन्त्रालयः इति नाम्ना पुनर्नामकरणं कर्तुम् अनुंशसति ।

## 26. वित्तपोषणम् - सर्वेषां कृते प्रदानयोग्या गुणवत्ताशिक्षा

26.1 इयं नीतिः शैक्षिकनिवेशस्य अधिकवृद्ध्यर्थं प्रतिबद्धा विद्यते ।यतः समाजस्य भविष्यार्थं युवकानां कृते गुणवत्ताशिक्षायाः अपेक्षया नान्यः उत्तमः निवेशो विद्यते । दौर्भाग्यात् भारते शिक्षां प्रति जायमानः सार्वजननिकव्ययः अनुशंसितस्य जीडीपी 6% स्तरस्य समीपमपि नागतः यस्य अनुशंसा 1968 शिक्षानीतौ कृता एवं 1986 शिक्षानीतौ 1992 नीतिसमीक्षायां पुनरनुंशसिता च आसीत् । अधुना शिक्षां प्रति सार्वजनिकव्ययः(केन्द्रराज्यसर्वकारैः) जीडीपी (आयव्ययविश्लेषणम् 2017-18 अनुगुणम् ) 4.43% समीपं विद्यते एवं सर्वकारव्ययस्य 10% प्रतिशतमेव शिक्षां प्रति व्ययः क्रियते(आर्थिकसमीक्षा 2017-18) इयं संख्या अभिवर्धितानाम् अभिवृद्धिशीलानां च देशानाम् अपेक्षया न्यूना विद्यते ।

26.2 भारते उत्कृष्टतया शिक्षायाः लक्ष्यस्य अवाप्तये, देशेन अर्थव्यवस्थया च संबद्धस्य लाभस्य स्वीकाराय केन्द्रसर्वकारः राज्यसर्वकारः च शिक्षायां निवेशम् आधिक्येन वर्धयितुं निस्सन्देहं शिक्षानीतिः समर्थनं करोति । केन्द्रसर्वकारः राज्यसर्वकाराश्च शिक्षाक्षेत्रे सार्वजनिकनिवेशस्य अभिवर्धनार्थं जीडीपी 6% पर्यन्तं शीघ्रं प्राप्तुं मिलित्वा कार्यं कुर्वन्ति । भारतस्य भविष्यार्थम् आर्थिक- समाजिक-सांस्कृतिक- बौद्धिक-तन्त्रज्ञान-समुन्नतये विकासार्थं च गुणवत्तापूर्ण-समतापूर्ण-सर्वकारशिक्षाव्यवस्थार्थम् अयं निवेशः अधिकमहत्त्वपूर्णो विद्यते ।

26.3 विशेषरूपेण शिक्षासंबद्धान् अंशान् अङ्गानि च प्रति वित्तीयसहायः करिष्यते तत्र मुख्यतया सर्वेषां कृते शिक्षाप्राप्तिः, अधिगमसंसाधनानि, पोषणांशसहायः,विद्यार्थिनां सुरक्षा स्वास्थ्यं च, पर्याप्तरूपेण शिक्षकाणां कर्मचारिणम् उपलब्धिः, शिक्षकाणां विकासः, पश्चवर्तिसमूहस्य एवं सामाजिकार्थिकरूपेण पश्चवर्तिसमूहस्य च कृते समतापूर्णगुणवत्ताशिक्षायाः प्रदानाय करिष्यमाणाः प्रयासाः इत्याद्यर्थं वित्तीयसहायः करिष्यते ।

26.4 अनेन सह मूलभूतसौकर्यार्थं संसाधनार्थं च सकृत् व्ययदानेन सह इयं नीतिः शिक्षाप्रणालीविकासार्थं वित्तप्रदानाय अधोलिखित-महत्त्वपूर्णप्रसृतक्षेत्रस्य अभिज्ञां करोति क)गुणवत्तापूर्णबल्यावस्थपालनपोषणशिक्षायाः सार्वत्रिकप्रदानम् ख) पठनलेखनगणनादिप्ररम्भिक -शिक्षायाः सुनिश्चयः ग) सर्वेषां विद्यालयानां/संकुलानां च कृते पर्याप्तापेक्षितसंसाधनानाम् उपलब्धिः घ) पौष्टिकाहारस्य प्रदानम् ( अल्पाहारः मध्याह्नभोजनं च) ङ) शिक्षकशिक्षायां निवेशः शिक्षकाणां व्यावसायिकशिक्षायाः अभिवर्धनं च च) उत्कर्षस्यावाप्तये महाविद्यालयानां विश्वविद्यालयानां च परिष्करणम् छ) शोधस्य विकासः ञ) तन्त्रज्ञानसद्यस्कशिक्षायाः अधिकोपयोगः ।

26.5 भारते शिक्षार्थं प्रदत्तन्यूनवित्तराशेः अपि जनपदस्तरे संस्थास्तरे यथोचितं यथासमयं व्ययः न क्रियते ।येन तेन वित्तराशिना यत् लक्ष्यम्प्राप्तव्यम् आसीत् तदवाप्तुम् अवरोधो भवति ।अतः नीतौ अपेक्षितांशस्य परिवर्तनेन उपलब्धवित्तराशेः समुचितोपयोगदक्षतायाः अभिवर्धनस्य अपेक्षा विद्यते । वित्तीयप्रशासनस्य प्रबन्धनस्य च लक्ष्यम् अनायासेन यथासमयं यथापेक्षं वित्तस्य आपूर्तौ यथोचितव्यये च स्यात् । प्रशासनप्रक्रियायां संशोधनं विधाय क्रमबद्धता क्रियते येन वित्तस्य वितरणविधाने अव्ययीकृतवित्तराशिः अधिको न स्यात् । सर्वकारस्य संसाधनानां कुशलतयापयोगार्थं वित्तस्थगनं वारयितुं जीएफआर् पीएफएमएस यथासमयं वितरणम् इत्यादिप्राविधानं कार्यान्वयनसंस्थानां कृते संयोजयितुं सूच्यते ।राज्येषु/उच्चशिक्षसंस्थासु च कार्यक्षमताधारितस्य वित्तपोषणतन्त्रं समायोजयितुं शक्यते ।तथा च एसईडीजी इत्येदर्थं संदत्तवित्तराशेः समर्पकवितरणार्थम् उपयोगार्थं च उत्तकार्यविधानस्य निश्चितिः भवति । आशंसितायां नवीननियामकव्यवस्थायां निर्वहणभूमिकायाः विभाजनं पारदर्शितया प्रदर्शनं च ,संस्थानां सशक्तीकरणं स्वायत्तता च, उत्तमयोग्यविशेषज्ञानां प्रमुखपदेषु नियुक्तिः इत्यादयः अन्तर्भवन्ति येन सुगमतया वेगेन पारदर्शितया च वित्तस्य उपयोगः स्यात् ।

26.6 इयं नीतिः शिक्षाक्षेत्रं पुनरुज्जीवयितुं सक्रियसंवर्धनार्थं शिक्षाक्षेत्रे वैयक्तिकलोकोपकारिगतिविधीनां समर्थनार्थं च अनुशंसां करोति। विशेषरूपेण सार्वजनिकायव्यया - तिरिक्तम् अधिकं तेभ्यः प्रदीयते । या कापि सार्वजनिकसंस्था स्वशैक्षिकानुभवस्य अभिवर्धनाय वैयक्तिकलोकोपकारिवित्तस्य संग्रहाय उपक्रमं स्वीकर्तुं शक्नोति ।

26.7 अस्यां नीतौ शिक्षायाः व्यावसायकीकरणस्य विषये बहुषु क्षेत्रेषु निवारयीतुं प्रयासः कृतः अस्ति । तत्र सरलं किन्तु कठोरम् इति नियमोपि अन्तर्भूतो विद्यते ।यत् वित्तविषये, प्रक्रियायाम्, कार्यविधाने, उपलब्धपाठ्यक्रमे, कार्यक्रमे च पूर्णरूपेण पारदर्शितया सार्वजनकीकरणम्। एतत् सार्वजनिकशिक्षणे अधिकनिवेशार्थं सर्वकारीयसंस्थासु सर्वकारेतरसंस्थासु च उत्तमप्रशासने तन्त्रे च बलं प्रददाति । एवं रीत्या अपेक्षितवर्गस्य योग्यवर्गस्य कृते क्षतिं विना अधिकशुल्कस्य स्वीकारस्य अवसरोपि परिशोध्यते ।

## 27 क्रियान्वयनम्

27.1 कस्याः अपि नितेः परिणामः तस्याः कार्यन्वयने निर्भरो भवति । एतादृशक्रियान्वयनाय नैकाभिः संकायैः समन्वितरूपेण उत्तमोपक्रमैः च पूर्वमेव प्रारम्भः भवेत् एवम् अपेक्षितक्रममपि स्वीकुर्यात् । अतः अस्याः नीतेः क्रियान्वयनाय नैके संकायाः तत्र शिक्षामन्त्रालयः,केब, केन्द्रसर्वकारःराज्यसर्वकारश्च, शिक्षासंबद्धमन्त्रालयाः, राज्यानां शिक्षाविभागः, बोड्र्स, एनटीए, विद्यालयस्य उच्चतरशिक्षायाः च संकायाः, एनसीईआरटी, एससीईआरटी, विद्यालयाः, उच्चतरशिक्षणसंस्थाः, च अन्तर्भवन्ति मिलित्वा शिक्षया सह सम्बद्धासु सर्वासु संस्थासु इयं नीतिः यथाक्रमम् यथोत्साहं यथोद्देशं समायोजिता उत नेति परिशीलयिष्यन्ति ।

27.2 क्रियान्वयनार्थम् अग्रेलिखितः मार्गदर्शी सिद्धान्तो भवति । प्रथमः - नीतौ भावना प्रयोजनं च क्रियान्वयनाय अधिकमहत्त्वपूर्णो विषयः विद्यते । द्वितीयश्च नीतिगतानाम् उपक्रमाणां यथाक्रमं क्रियान्वयनम् अधिकं महत्त्वपूर्णं यतोहि नीतेः प्रत्येकं बिन्दौ बहवः स्तराः सन्ति । प्रत्येकं स्तरोपि अतिमहत्त्वपूर्णं यतोहि सः स्तरः अग्रिमस्तरस्य क्रियान्वयनाय आधारो भवति । तृतीयः - नीतिबिन्दूनां यथाक्रमं निर्धारणे प्राथम्यं मुख्यं भवति यतोहि अतिमहत्त्वपूर्णं कार्यं पूर्वं कुर्यात् येन सुदृढः आधारः निर्मितः स्यात् ।चतुर्थः- समग्ररूपेण क्रियान्वयनम् अधिकं मुख्यं भवति । इयं नीतिः परस्परान्तःसम्बद्धयुक्ता व्यापिका च विद्यते अतः पूर्णरूपेण क्रियान्वयनम् अपेक्षितं नतु खण्डशः क्रियान्वयनम् , तदैव वाञ्छितलक्ष्यं साधयितुं शक्यते । पञ्चमः - शिक्षा एककालिकः विषयः विद्यते अतः केन्द्रराज्ययोः मध्ये सावधानपूर्वकं योजनानिर्माणस्य, मिलित्वा पर्यवेक्षणस्य, समन्वयपूर्वकं क्रियान्वयनस्य च अधिकापेक्षा विद्यते । षष्ठः - सुखेन कार्यनिष्पादनाय मानवसंसाधनानां, संरचनागतसंसाधनानां, वित्तीयसंसाधनानां च काले काले राष्ट्रस्तरे राज्यस्तरे च एकत्रीकरणं मुख्यबिन्दुः विद्यते।अन्तिमः - क्रियान्वयनार्थम् अनुष्ठीयमानानां विविधोपायानां मध्ये परस्परसंबन्धस्य निश्चितिः विश्लेषणं च अधिकम् अपेक्षितम् अस्ति । अत्र केषुचित् कार्येषु अभिनिवेशस्य अपेक्षा वर्तते (उदाहरणार्थं प्रारम्भिकबाल्यावस्थाशिक्षायाः मूलभूतव्यवस्था

इत्यादि) तेन  न केवलं सुदृढाधारस्य दृष्ट्या किन्तु भाविकार्यक्रमान् कार्याणि च विना बाधां संचालयितुम् अधिकावश्यकता विद्यते।

27.3 नीतेः लक्ष्यावाप्तये उपर्युक्तसिद्धान्तानुगुणं नीतेः प्रत्येकं स्तरस्य क्रमबद्धक्रियान्वयनाय संबद्धमन्त्रालयानां समन्वयेन तैः सह परामर्शं कृत्वा केन्द्रस्तरे राज्यस्तरे च विषयानुगुणं क्रियान्वयनविशेषज्ञसमितयः आरच्यन्ते । नीतेः क्रियन्वयनस्य प्रगतेः संयुक्तरूपेण परामर्शं प्रत्येकं निर्दिष्टकार्यस्य लक्षानुगुणं शिक्षामन्त्रालयेन राज्यैः  च नियोजितसदस्यसमितिः करिष्यति अपि तं परामर्शं केब इत्यनेन संविभज्यते । 2030-40 समये संपूर्णनीतिः क्रियान्विता भवति ततःपरं पुनः समग्रविश्लेषणं भवष्यति।

********

## प्रयुक्तसङ्केताक्षरसूची

| | |
|---|---|
| एबीसी | शैक्षणिकाङ्कसंचयकोशः |
| एआई | कृत्रिमबुद्धिमत्ता |
| एसी | स्वायत्तापदव्यनुमोदनमहाविद्यालयः |
| एईसी | प्रौढशिक्षाकेन्द्रम् |
| एपीआई | मध्यस्थानुप्रयोगकार्यक्रमः |
| आयुष | आयुर्वेदशोगप्राकृतिकचिकित्सा यूनानी सिद्ध होम्योपैथी |
| बीएड | शिक्षाशास्त्री |
| बीईओ | खण्डशिक्षाधिकारी |
| बीओए | खण्डीयाध्यपकशिक्षासंस्था |
| बीओए | आकलनपरिषत् |
| बीओजी | प्रशासनपरिषत् |
| बीआरसी | खण्डीयसंसाधनकेन्द्रम् |
| बी.वोक् | वृत्त्यात्मकशैक्षिकोपाधिः |
| सीएबीई | केन्द्रीयशिक्षासूचनापरिषत् |
| सीबीसीएस | चयनाधारितसमाकलप्रक्रिया |
| सीबीएसई | केन्द्रीयमाध्यमिकशिक्षापरिषत् |
| सीआईईटी | केन्द्रीयशैक्षिकतन्त्रज्ञानसंस्था |
| सीएमपी | वृत्तिप्रबन्धनं प्रगतिश्च |
| सीओए | वास्तुकलापरिषत् |
| सीपीडी | सततव्यावसायिकविकासः |
| सीआरसी | संसाधनसंकुलकेन्द्रम् |

| | |
|---|---|
| सीडब्ल्यएसएन | विशेषापेक्षिबालाः |
| डीएई | परमाणूर्जाविभागः |
| डीबीटी | जैविकतन्त्रज्ञानविभागः |
| डीईओ | मण्डसशिक्षाधिकारी |
| डाआईईटी | मण्डलशिक्षाप्रशिक्षणसंस्था |
| दीक्षा | ज्ञानविनिमयडिजिटलसौकर्यम् |
| डाएसई | विद्यालयशिक्षानिदेशालयः |
| डीएसटी | विज्ञानतन्त्रज्ञानलविभागः |
| ईसीसीई | बाल्यपोषणं शिक्षा च |
| ईईसी | विशेषज्ञसमितिः |
| जीसीईटी | वैश्विकनागरिकशिक्षणम् |
| जीडीपी | सकलदेशीयोत्पादना |
| जीईसी | सामान्यशिक्षापरिषत् |
| जीईआर | सकलनामङ्कनानुपातः |
| जीएफआर | वित्तीयसामान्यनियमाः |
| एचसीआई | भारतस्य उच्चशिक्षायोगः |
| एचईजीसी | उच्चशिक्षानुदानपरिषत् |
| एचईआई | उच्चशिक्षासंस्था |
| आईसीएआर | भारतीयकृष्यनुसन्धानपरिषत् |
| आईसीएचआर | भारतीयैतिहासिकुसन्धानपरिषत् |
| आईसीएमआर | भारतीयचिकित्सानुसन्धानपरिषत् |
| आईसीटी | सूचनसंचारतन्त्रज्ञानम् |

| | |
|---|---|
| आईडीपी | सांस्थिकविकासयोजना |
| इग्नू | इन्दिरागान्धीराष्ट्रियमुक्तविश्वविद्यालयः |
| आईआईएम | भारतीयप्रबन्धनसंस्था |
| आईआईटी | भारतीयतन्त्रज्ञानसंस्था |
| आईआईटीआई | भारतीयानुवादव्याख्यानसंस्था |
| आईएसएल | भारतीयसाङ्केतिकी भाषा |
| आईटीआई | प्रौद्योगिकप्रशिक्षणसंस्था |
| एमएड | शिक्षा आचार्यः |
| एमबीबीएस | औषधीयशस्त्रचिकित्सीयोपाधिः |
| एमईआरयू | बहुविषयकशिक्षानुसन्धानविश्वविद्यालयः |
| एमएचएफडब्ल्यू | स्वास्थ्यपरिवारकल्याणमन्त्रालयः |
| एमएचआरडी | मानवसंसाधनविकासमन्त्रालयः |
| एमओई | शिक्षामन्त्रालयः |
| एमओओसी | बृहन्मुक्तअन्तर्जालपाठ्यक्रमः |
| एमओयू | प्रबोघनापत्रम् |
| एम फिल | मास्टर आफ फिलासफी |
| एमडब्ल्यूसीडी | महिलाबालविकासमन्त्रालयः |
| एनएसि | राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषत् |
| एनएएस | राष्ट्रियसाधनासर्वेक्षणम् |
| एनसीसी | राष्ट्रिय कैडरकोर |
| एनसीईआरटी | राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषत् |
| एनसीएफ | राष्ट्रियपाठ्यचर्याविन्यासः |

| | |
|---|---|
| एनसीएफएसई | विद्यालयशिक्षापाठ्यचर्याविन्यासः |
| एलसीआईवीई | व्यावसायुकशिक्षैकीरणसमितिः |
| एनसीपीएफईसीसीई | बाल्यपोषणपालनशिक्षार्थं राष्ट्रियपाठ्यचर्या शिक्षणशास्त्रं च |
| एनसीटीई | राष्ट्रियाध्यपकशिक्षापरामर्शः |
| एनसीवीईटी | राष्ट्रियव्यावसायिकशिक्षाप्रशिक्षणपरमार्शः |
| एनईटीएफ | राष्ट्रियशैक्षिकतन्त्रज्ञानवेदी |
| एनजीओ | सर्वकारेतरसंस्था |
| एनएचईक्यूएफ | राष्ट्रियोच्चशिक्षायोग्यताविन्यासः |
| एनएचआरसी | राष्ट्रियोच्चशिक्षानियामकपरिषत् |
| एनआईओसी | राष्ट्रियमुक्तविद्यालयशिक्षासंस्था |
| एनईटी | राष्ट्रियतन्त्रज्ञानसंस्था |
| एनआईटीआई | भारतपरिवर्तनराष्ट्रियसंस्था |
| एनपीई | राष्ट्रियशिक्षानीतिः |
| एनपीएसटी | शिक्षकेभ्यः राष्ट्रियव्यावसायिकमानकम् |
| एनआरएफ | राष्ट्रियशोधप्रतिष्ठानम् |
| एनएसक्यूएफ | राष्ट्रियकैशलयोगयताप्रबन्धः |
| एनएसएसओ | राष्ट्रियादर्शसर्वेक्षणकार्यालयः |
| एनटीए | राष्ट्रियपरीक्षासंस्था |
| ओबीसी | अन्याविकसितजातिः |
| ओडीएल | दूरस्थशिक्षा |
| परख | समग्रविकासाय प्रदर्शनाकलनम्, समीक्षा ज्ञानविश्लेषणं च |
| पीसीआई | भारतीयौषधागारसमितिः |

| | |
|---|---|
| पीएॅफ़एमएस | सार्वजनिकवित्तीयप्रबन्धनप्रणाली |
| पीएचडी | विद्यावारिधिः |
| पीएसएसबी | वृत्तिविषयकमानकस्थापनासमितिः |
| पीटीआर | छात्रशिक्षकानुपातः |
| आर एंड आई | शोधः एवं नवाचारः |
| आरसीआई | भारतीयपुनर्वासपरिषद् |
| आरपीडब्ल्यूडी | विकलाङ्गव्यक्तीनाम् अधिकारः |
| एसएएस | राज्योपलब्धिसर्वेक्षणम् |
| एससी | अनुसूचितजातिः |
| एससीडीपी | परिसर / संकुलविकासयोजना |
| एससीईआरटी | राज्यशैक्षिकानुसंधानप्रशिक्षणपरिषद् |
| एससीएफ | राज्यपाठ्यक्रमप्रबन्धः |
| एससीएमसी | विद्यलयपरिसरप्रबंधनसमितिः |
| एसडीजी | सततविकासलक्ष्यम् |
| एसडीपी | विद्यालयविकासयोजना |
| एसईडीजी | सामाजिकार्थिकरूपेण वञ्चितसमूहः |
| एसईजेड | विशेषशिक्षामण्डलम् |
| एसआईओएस | राज्यमुक्तविद्यालयशिक्षासंस्थानम् |
| एसएमसी | विद्यालयप्रबंधनसमितिः |
| एसक्यूएएएफ | विद्यालयमूल्याङ्कनप्रत्यायनप्रबन्धः |
| एसएसए | सर्वशिक्षाभियानम् |
| एसएसएस | सरलमानकसंस्कृतम् |

| | |
|---|---|
| एसएसएसए | राज्यविद्यालयमानकप्राधिकरणम् |
| एसटी | अनुसूचितजनजातिः |
| एसटीईएम | विज्ञानम्, प्रौद्योगिकी, तान्त्रिकम्,गणितम् |
| एसटीएस | संस्कृतमाध्यमेन संस्कृतम् |
| स्वयम | स्टडी वेब्स ऑफ़ एक्टिव लर्निङ्गग फॉर यंग एस्पायररंग माइंड्स |
| टीईआई | शिक्षकशिक्षकसंस्था |
| टीईटी | शिक्षकपात्रतापरीक्षा |
| यू-डीआईएसई | एकीकृतजिलाशिक्षासूचनाप्रणाली |
| यूजीसी | विश्वविद्यालयानुदानायोगः |
| यूनेस्को | संयुक्तराष्ट्रशैक्षणिकवैज्ञानिकसांस्कृतिकसंघटनम् |
| यूटी | संघराज्यक्षेत्रम् |
| वीसीआई | भारतीयपशुचिकित्सापरिषद् |

************